# आधुनिक-संस्कृतसाहित्यविमर्शः (विशांतिशताब्दी-एकविंशतिशताब्दी परिप्रेक्ष्ये)

**धर्मेन्द्र कुमार**

दिल्लीस्थ संस्कृत अकादमी, दिल्ली सर्वकारः, नई दिल्ली

dharmendra064@gmail.com

संस्कृतभाषा सर्वासां भाषाणां जननी। संस्कृतभाषात एव सर्वा जगद्भाषा: प्रादुरभूवन्निति भाषातत्वविदामाघोषः। ऋग्वेदादयाः दिव्या वैदिकाग्रन्थाः, उपनिषदः, वेदांगसाहित्यम्, रामायणम्, महाभारतम्, पुराण-साहित्यश्च संस्कृतभाषायाम् ईदृशं साहित्यमस्ति यद्यत्वेऽपि पवित्रयति उल्लासयति च अस्मान्। कविकुलगुरूकालिदासः अश्वघोषः भारवि-माघ भवभूति-श्रीहर्षप्रभृतीनां काव्यानि संस्कृतसाहित्यस्य महार्हाणि रत्नानि इति अद्यत्वेऽपि सन्नाद्याणि समाकलनीयानि च। इदमपि वक्तुं शक्यते यत् संस्कृत साहित्यादर्शी भारतीय जन-मानसं जन-जीवनञ्च प्रतिफलितम् पश्यामः। अतोहेतोः संस्कृतसाहित्यं भारतीयायाः संस्कृतेर्वहनमिति कृत्वा प्रत्येकं भारतीयेन आकलनीयम्।

एषा संस्कृतधारा सर्वेषु अपि युगेषु अप्रतिहतगतिका प्रवहन्ती प्रावर्तत इति आश्चर्यम् इतोऽपि अधिकमाश्चर्यं यत् विगतायां प्रवर्तमानायाच शताब्द्यां विशालम् उच्चकोटिकम संस्कृतसाहित्यम् अद्यत्वेऽपि आकलनविषयतामधिगच्छति इति महदिदं प्रमोदस्थानं अस्माकं समेषां कृते।

आधुनिक संस्कृतसाहित्येतिहासस्य लेखने अनेके भारतीया विद्वांसः अस्यां दिशि प्रवृत्ता दरीदृश्यन्ते तेषु समुल्लेखनीयाः सन्ति डॉ. कृष्णमाचारियरमहेशशर्माः, आचार्य पं. बलदेवोपाध्यायश्च। संस्कृत साहित्यस्य आधुनिक कालः कस्मात् कालविशेषादारब्ध इति प्रश्नः। अत्र विदुषां अ ऐकमत्यम्। तथाहि

डॉ. अभिराजराजेन्द्र मिश्र महोदयानुसारेण –

- पुनर्जागरणकाल (1784-1884)
- स्थापना कालः (1884-1856)
- समृद्धि कालः (1950 - अद्यावधि)[१]

आधुनिक संस्कृत साहित्येतिहासे यानि परिवर्तनानि सम्पन्नानि नवासु विधासु लेखनस्य, तत्र संस्कृतपत्र-पत्रिकाणां महद योगदानम् वर्तते। पण्डितः संस्कृत चण्डिका, सूक्तिसुधा, सहृदया, शारदा, सुप्रभातम, उद्योत., सूर्यादयः, कालिंदी, मञ्जूषा, संस्कृत चन्दिका, संस्कृत मञ्जरी इत्येता भिन्न भिन्न पत्रिका संस्कृत भाषायामेव प्रकाश्यन्ते। आसु पत्रिकासु त्रैमासिक्य, मासिक्य, पाक्षिक्य, साप्ताहिक्यश्च प्रकाशिता भवन्निति। आधुनिक संस्कृते अनूदितं साहित्यमपि प्रकाशितम् नैरन्तर्येण बोभूगते। आधुनिक संस्कृतीज्ञैः विद्वद्भिः बाईबिल-आदयः धार्मिका ग्रन्थाः संस्कृतेऽनूदिता सन्ति। एवमेव डॉ. वनेश्वरपाठकैः 'यीशुचरितम्' इति नाम्ना बाइबिल न्यूटेस्टामेंट इत्यस्य संस्कृत पद्यानुवादः 1989 वर्षे संधी नगरत प्राकाश्यं नीतः। 'ज्ञानेश्वरी' मराठी भाषायां प्रस्तुता सन्तज्ञानेश्वरस्य (भगवद्गीता कारका) लोकमान्य बालगंगाधर तिलक महोदयस्य गीतारहस्यम् इति द्वयमपि संस्कृते अनुदितं विलसति। संस्कृतस्य आधुनिके साहित्ये अधिकतया महाकाव्यानि विरचितानि विद्वद्भिः। इदमपि चात्र ध्यातव्यं भवति यन्महाकाव्यानां नायकत्वेन गुरूगोविंदसिंहः, महात्मा गांधी, स्वामी दयानन्दः, लोकमान्यो बालगंगाधर तिलकः एवमादयो राष्ट्रिया नेतारो मनीषिणश्च इति। एवमेव

अनेके मौलिका उपन्यासाः प्रस्तुताः, तथाहि डॉ. केशवचन्द्रदारशैः अनेके उपन्यासा लिखिताः सन्ति । डॉ. रामकरणशर्मणामुपन्यासद्वयम् सीमा (1987) रचीशः (1994) अपि प्रकाशितं विराजते ।

संस्कृते गीतिकाव्यस्य परम्परा अति प्राचीनतमा। वेदस्य अनेकासु ऋक्षु गीतात्मकत्वम् अनुभवितुं शक्यते । कालिदासस्य मेघदूतेऽपि गीतात्मकत्वम् अनुभूयते। विशतितमायां शताब्याम् गीतिकाव्यानि व्यापकतया मार्मिकतया च निर्मितानि। गीतिकारेषु पण्डिता क्षमा, मधुरानाथ शास्त्री, जानकीवल्लभ शास्त्री, रामनाथपाठकः, मधुकरगोविन्दमाइणकरश्च उल्लेखनीया सन्ति। माईणकरमहाभागेन संस्कृते मुक्तकद्वयोः काव्ययोः, रचना कृता अस्ति - स्मृतितरङ्गम् - गायिका शिल्पकारश्च। 'स्मृतितरङ्गम्' मन्दाक्रान्ता छन्दसि निवद्धं एक शोकगीतिकाव्यमस्ति। करूणरसश्चात्र अंगी रसः ।

परमेश्वर अय्यरविरचितरचनासु (देवीनवरत्नमाला) स्तोत्रं 'भारतगौरवम्' आभाणकर्मजरी इमानि गीतिकाव्यानि (देववाणीपरिषद् दिल्ली) उल्लेखनीयानि सन्ति । एवमेव प्रसिद्धविदुषा श्रीनिवासरथमहोदयेन अनेकानि गीतानि संस्कृतभाषायां विरचितानि । श्री शंकरदेव अवतरे महोदयेन मुक्तकद्वयं विरचितम् नारी गीतम्- जीवनमुक्तं च । भास्कराचार्य त्रिपाठीवर्य्येण प्रभूतानि गीतिकाव्यानि विरचितानि सन्ति प्रायशः शतम् गीतिकाव्यानि लघुकाव्यानि विभिन्न पत्रपत्रिकासु प्रकाशितानि सन्ति। आधुनिक संस्कृत साहित्ये मूर्धनि प्रतिष्ठिता। स्वनामधन्याः काव्यशास्त्रविशारदाः पण्डितप्रवराः राजेन्द्रमिश्र महाभागा सन्ति । एतेषां महानुभावानाम् अनेकासु संस्कृत विधासु विशिष्टं योगदानं वर्तते । तथाहि एकांकी (भाण-प्रहसन आदि) महाकाव्यम् (जानकीजीवनम् वामनावतरणच) एवमेव लघुकाव्यम् गीतिकाव्येषु वाग्वधूटी (1978) मृद्वीका (1985) श्रुतिम्भरा (1989) इत्यादयः ग्रन्था प्रकाशिता सन्ति।

राधावल्लभत्रिपाठी महोदयानामपि न केवलं गीतिकाव्य पक्षे एतेषां विशिष्टं योगदानमस्ति अपितु नैकासु संस्कृत विधासु एतेषां उल्लेखनीयं योगदानं चकास्ति । संस्कृत भाषायाम् काव्यद्वयं प्रकाशितमस्त । सन्धानम् इत्याख्ये कार्यें पञ्चपञ्चाशत् कविता अन्तर्जवनिकम्, वहिर्जवनिकम् इति पञ्चखंडेपु विभाजितम् अस्ति । एकप्रकारेग आधुनिक गीतिकाव्येषु अनेकविद्वद्भिः प्रभूतं साहित्यं निर्मितम अस्ति नैकासां पत्रपत्रिकाणां प्रकाशनेनापि गीतिकाव्यविधा समधिकं प्रश्रयमुपलब्धवती ।

एवमेव गद्यकाव्यमाक्षित्य अपि संस्कृते उपन्यासा लघुकथाः इस्यादयो अनेका विद्या विकासमधिगता आधुनिका संस्कृतगधकाराः सर्वथा नूतनामेका लेखनपद्धति प्रकल्पितवन्तः अथ च ते साफल्यगपि अर्जितवन्त इति ।

आधुनिककालस्य संस्कृतनाट्यसाहित्य- यस्मिन् रूपक-भेदाः नाटक प्रहसनादयः समाहृताः समधिकतया निर्मिता सन्ति । एतेषु च केचन प्रसिद्धा सन्ति-लीलाराव- एता हि संस्कृतस्य प्रसिद्धा लेखिका तुकारामचरितम्-ज्ञानेश्वर-चरितम, मीरा चरितम् इत्यादीनि अनेकानि रूपकाणि प्रसिद्धानि सन्ति ।

श्रीरामवेलणकरमहोद्येनापि अनेकानि नाटकानि विरचितानि सन्ति - रानी दुर्गावती (1964) 'स्यातन्त्र्यलक्ष्मी' (छत्रपतिशिवराज) (1974) पञ्च अंकेषु विभक्तं नाटकमिदम् । श्रीमता गजानन पलसुले -1961 ई. 'समानमस्तु मे मनः' इति त्रिषु अंकेषु विभाजित नाटकं उल्लिखितमस्ति । श्रीमता विद्धुवरेण्येन रेवाप्रसाद द्विवेदी महोदयेन शेक्सपीयर इत्यस्य

नाम्नि नाटिका 'यूथिका' रोमियों जूलियट इति आधृत्य 'इन्दिराविजयम्' लिखिता अस्ति । वेंकटरत्नमहोदयेन नाटकम् मध्ये लिखितमस्ति । श्रीमत 1972ा कलानाथशास्त्रीमहाभागेन ध्वनिरूपकाणाम् रचना कृता अस्ति । संस्कृते महाकाव्यलेखनं अद्यापि समधिकं बोभूयते । आधुनिके काले महाकाव्यविद्यायां संस्कृते लेखनं समधिकतया जायते । तच्चेदं काव्यं श्रव्यं- दृश्य भेदाद् द्विविधम्। तच्च श्रव्यं काव्यं , महाकाव्यखण्डकाव्य-, गीतिकाव्यभेदात् त्रिविधम् । विंशतिशताब्द्याः के केचन प्रसिद्धाः महाकाव्यकाराः सन्ति-

**अखिलानन्दशर्ममहाभागाः उ.प्र.** (1880-1955 ई.), अनेन काव्यकृता स्वामिदयानन्दजीवनपरिचयम् आश्रित्य 'दयानन्ददिविजयम्' इति महाकाव्यस्य रचना कृता अस्ति । यस्य प्रकाशनम् आर्यधर्म प्रकाशन शामली 1970 ई. मध्ये संजातम् ।

**मेघाव्रताचार्य** : नासिक जनपदान्तर्गते जनिं लब्धवन्तः एते महात्मवर्यः । अनेन काव्यकृता प्रभूतं साहित्यं विरचितमवलोक्यते। 'कुमुदिनीचन्द्र' इति उपन्यासोयम् । अनेन महाकाव्यद्वयं प्रणीतम् 'दयानन्ददिग्विजयम्' ब्रह्मर्षिविरजानन्दचरितच । उभयोः प्रकाशनं संजातम् अस्ति ।

**क्षमाराव** (1890-1954 ई.) पुणेनगरे जनि लब्धवती एषा । नवसर्गेषु विरचितम् 'श्रीतुकारामचरितमहाकाव्यम्' त्रयोदशसर्गेषु निबध्दम् श्रीरामदासचरितम् अष्टसर्गेषु निवध्दम् श्रीज्ञानेश्वरचरितम् । एतत् त्रयं महाकाव्यमनेन प्रणिबद्धम । अन्यान्यपि महाकाव्यानि एतया विरचितानि सत्याग्रहगीता. शंकरजीवनच ।

**गंगाप्रसाद उपाध्याय** : एते दार्शनिकविद्वांस आसन् । अपि च अनेकासु हिन्दी-आग्ल-संस्कृत-उर्दू-अरबी भाषासु एतेषां अव्याहतज्ञानम् आसीत् । अनेन विदुषा "आर्योदयमहाकाव्यम्" विरचितम् । (कलाप्रेस प्रयागः 1951 ई.) मध्ये प्रकाशितम् अस्ति ।

**गगवदाचार्यपादाः** (1880-1977 ई.) अनेन काव्यकृता श्रीमहात्मनो गांधिचरितगाक्षित्य भागत्रयेषु विभक्त महाकाव्यम् "श्रीमहात्मगांधिचरितम्" प्रणियद्धमस्ति ।

**विश्वनाथ केशव छत्रे** (1906) तत्र भवानेष छत्रेमहोदयः महाराष्ट्रप्रदेशमलञ्चकार स्वजनुषा । सुभाषचरितमहाकाव्यम्- एकनाथचरितम्, श्रीसातवलेकरचरितम्, भारतीययातोदयम्, इत्येतत्, चतुर्विधं महाकाव्यम् अनेन प्रणिबद्धम् ।

**सत्यव्रतशास्त्री -** आधुनिके काले संस्कृतवाङ्मयमहोदधेस्तत्र भवान् महाकविसत्यव्रतः खल्वत्यन्तभासुरं रत्नम् । श्री गुरूगोविंदसिंहचरितमिति काव्यस्य प्रणेता । एतदतिरिच्य श्रीबोधिसत्वचरितम्, इन्दिरागांधीचरितम् श्रीरामकीर्ति महाकाव्यञ्च । एतत् त्रयं महाकाव्यमनेन विरचितम्।

**रेवाप्रसाद द्विवेदी -** महाकविः रेवाप्रसाद द्विवेदी काव्याकाशे किमपि महनीयं पदमलंकरोति । कविरयं जन्मना मध्यप्रदेशम् विभूषयामास । काव्यद्वयं प्रकाशितम् अस्ति अनेन- सीताचरितम् (1960 ई.) स्वातत्र्यसंभवश्च।

**श्रीधरभास्करवर्णेकरः** महाकविरयं आधुनिक संस्कृतसाहित्ये विशिष्ट पदमलंकरोति । कवेरस्य महाकाव्यम् "श्रीशिवराज्योदयम्" शारदा गौरवग्रन्थमाला सदाशिवपेठ पूना 1972 मध्ये प्रकाशितम अस्ति।

**त्र्यंबक आत्माराम भंडारकरः** कविराजो महाराष्ट्रप्रदेशं स्वजनुषाऽलञ्चकार । अनेन महाकविना "विद्यार्थि" नामा "आत्मचरितमित्यस्य" प्रणयनम् कृतम् अस्ति । एवमेव अष्टादशसर्गेषूपनिबद्धम् श्रीस्वामिविवेकानन्दाचरितमहाकाव्यम् प्रणीतमस्ति ।

चौखंभा संस्कृत सीरिज वाराणसीतः 1973 मध्ये प्रकाशनं संजातम् अस्ति।

**राजेन्द्रमिश्र**: स्वातन्त्र्योत्तरकाले आधुनिक संस्कृत - साहित्ये अनेके महनीयकीर्तयः कवीन्द्राः बाभान्ति । एषु कविषु महाकविराजेन्द्र मिश्र नामात्युच्चपदमलंकरोति । एकविंशतिसर्गैपूपनिवद्धम् अस्य परमप्रथितं 'जानकीजीवनाख्यम्' महाकाव्यम् । वामनावताराख्यम् नामस्यापरं महाकाव्यम्।

**डॉ. सुभाष वेदालंकार** : प्रतिष्ठित संस्कृतलेखकेन कविना गायकेन, विधिधसर्वकारपुरस्कारैः सभाजितेन, नैकविश्वविद्यालयेषु प्रतिष्ठितपदलंकुवार्णेन श्रीमता डॉ. सुभाष वेदालंकारेण "अमेरिकावैभवम्" इतिनाम्ना महाकाव्यम् विलिखितम् । काव्यमिदं चतुर्विंशेषु सर्गेषु विभक्तम् । विविधभाषासु अमेरिका-वर्णनं दरीदृश्यते परं या सर्वासां भाषाणां जननी देववाणी संस्कृतं तस्याम् न किमपि ईदृशं महाकाव्यं आसीत् अनेन महानुभावेन एतत् महाकाव्यं लिखित्वा संस्कृत जगति विशिष्टं कार्यं कृतम् इत्यत्र नास्ति कोऽपि संशयः अतः लेखकस्य अयं प्रयास सर्वथा स्तुत्यः वरेण्यश्च । "अलंकारप्रकाशनम् 74 तनेजा ब्लॉक आदर्श नगर जयपुर - 4" इत्यस्मात् अस्य प्रकाशनम् 2019 ई. मध्ये संजातम्।

**रसिक बिहारी जोशी** :- अनेन कविना मोहभंगम इति नामा महाकाव्य व्यलेखि । सुबोधचन्द्रपन्त महादयेन झांसीश्वरीचरितम्' इति नाम्ना महाकाव्यम् लिखितम् । कालिका प्रसाद शुक्ल महाभागेन त्रयोदश सर्गेपु रचितं राधाचरितम् महाकाव्यम् व्यधायि । प्रसिद्धेन विदुषा श्रीमता हरिनारायण दीक्षित महाभागेन 'श्रीमदप्पयदीक्षितचरितम्' (गद्यकाव्य) 'मेनकाविश्वामित्रम्' (दृश्यकाव्यम्) 'श्रीहनुमद्दूतम्' (संदेशकाव्यम्) गोपालबंधु (कथाकाव्यम्) विंशतिसर्गनिवद्धं भीमचरितं च लिखितम् अस्ति । पांडुरंग शास्त्री महोदयेन दशसर्गनिबद्द 'श्रीगुरूक्षेत्रम्' महाकाव (1959) रचितमस्ति । के बालरामपन्निकर महोदयेन 'श्रीनारायणविजयमिति' एकविंशतिसर्गनिवद्धं महाकाव्यम् व्यलेखि।

एवञ्च आधुनिक संस्कृतसाहित्ये भारतीयवाङ्मयाकाशे अनेके महान्तः साहित्यकाराः सन्ति सर्वेषां नामानि नैव अत्र उदाहर्तुं शक्यन्ते । दिङ्मात्रमिह प्रस्तुतमस्ति । किंच इदमेवात्र वक्तुं शक्यते। यत् अद्यापि विंशंति शताब्द्याम् एकविंशंति शताब्द्यां च संस्कृतसाहित्ये सर्वासु प्राचीनासु नवविकसित्तासु च विधासु लेखने संवृत्तं सम्प्रवर्तमान चारित । एतादृशं - संस्कृतसाहित्यम् कश्मीरतः कन्याकुमारी यावत् जनानां मध्ये साहित्यसमुचितस्य व्यवहारस्य माध्यमभूतमस्ति । अद्यापि अनेकेषु संस्कृतविश्वविद्यालयेषु आधुनिकविश्वविद्यालयेषु महाविद्यालयेषु आधुनिकनसंस्कृतस्य रचनाकाराणां साहित्यामाश्रित्य शोधकार्यं प्रचलितमस्ति । नैकेषु स्थानेषु आधुनिक संस्कृतसाहित्यमधिश्रितानां, संगोष्ठीनामायोजनम्, समकालिकस्य संस्कृतसाहित्यस्य नैकासां संस्कृतपत्रिकाणां प्रकाशनं द्रुतगत्या प्रचलदस्ति।

एकविंशतिशताब्द्यां संस्कृतसाहित्यमन्यदेव किमपि नवतरं भविता, नास्मिन् केयलम् अखिलभारतस्तरीया प्रत्युत विश्वस्तरीया रचनाकाराः साहित्यरचनायां प्रवृत्ता भविष्यन्ति इति अस्माकं समेषां संस्कृतज्ञानाम् अस्ति द्रढीयान् विश्वासः।

**संदर्भग्रन्था -:**


- संस्कृत वाङ्मय का बृहद् इतिहासः उ.प्र. संस्कृतसंस्थानतः प्रकाशितम्
- संस्कृत साहित्यविमर्शः
- संस्कृत के महाकवि और काव्य - रामनारायणलाल बेनीमाधव प्रकाशन इलाहाबाद – २
- संस्कृत साहित्य सौरभ - सस्ता साहित्यमंडल नई दिल्ली
- संस्कृत साहित्य का इतिहास - वाचस्पति गैरोला
- संस्कृत साहित्य का समीक्षात्मक अध्ययन - डॉ. कपिलदेव द्विवेदी

# आधुनिकसंस्कृतसाहित्यस्य परम्परा उपादेयताच

उमेश यादव

भारतीया संस्कृतिः संस्कृतज्ञानं विना नैव सम्यक् विज्ञातुं शक्यते इति सर्वे विदन्ति एव। संस्कृतिः हि सद्भावानां भावयित्री, गुणगणस्य ग्राहयित्री सदाचारस्य च संचारयित्री इति संस्कृतेः माहात्म्यं मानवजीवने स्पष्टम् एव परिलक्ष्यते। सा इयं संस्कृतिः सदा रक्षणीया परिवर्धनीया इति भारतीसंस्कृतेः समुद्धाराय अववोधाय च संस्कृतज्ञानम् अतीव अनिवार्यम्। अत एव उच्यते –'**संस्कृतिः संस्कृताश्रिता**'इति।

**संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः।**

इति महाकविना दण्डिना संस्कृतभाषाम् उद्दिश्य युक्तियुक्तम् उक्तं वर्तते। "**विद्ययाऽमृतमश्नुते**" इति वेदोक्तं मानवेषु विद्यागौरवं प्रतिष्ठापयितुं पुराकालाद् एव साहित्यरचनासु व्यवह्रियमाणायाः संस्कृतभाषायाः विलोकनेन पदे पदे एतस्याः दिव्यतायाः भव्यतायाः वैज्ञानिकतायाः च सुपरिचयः सम्प्राप्यते। '**सा संस्कृतिः प्रथमा विश्ववारा**' इति वेदोक्ता मानवीया वैदिकी संस्कृतिः प्राथम्येन वेदोपनिषदादिशास्त्रेषु संस्कृतभाषायाम् एव निबद्धा अभूत्। तस्माद् अनन्तरं मानवजीवने पुरुषार्थचतुष्टयपुरस्सरं धर्मकर्मव्यवस्थायै तत्तद्विद्याविदैः आचार्यैः वेदाङ्ग-उपाङ्ग-स्मृति-पुराणादयः विविधाः साहित्यरचनाः संस्कृतभाषया एव अक्रियन्त। तस्माद् आरभ्य अद्यापि संस्कृतसाहित्यस्य धारा न्यूनाधिकतया निरन्तरं प्रवहन्ती वर्तते।

भारतवर्षे राज्ञः पृथ्वीराजस्य शासनाद् अनन्तरं द्वादशशताब्द्यां मुस्लिमशासने स्थापिते सति अरबी-फारसीभाषयोः प्रभावः यदा विपुलः सञ्जातः, तदापि संस्कृतभाषायां साहित्यरचनाः प्रावर्तन्त एव। मुगलकालेऽपि अनेकानि महाकाव्यानि अन्याश्चापि रचनाः अक्रियन्त।

**'आसफविलासः', 'जहांगीरचरितम्', 'शेकशुभोदयम्', 'पारसीकप्रकाशः', 'चिमनीचरितम्'**

इत्येवमादयः तत्कालस्थाः मुख्याः रचनाः विज्ञायन्ते। केषाञ्चिद् विदुषाम् इदं मतं यत् संस्कृतसाहित्यरचनायाः युगं सप्तदशशताब्दीं यावदेव अवर्तत। प्रायेण जनाः पण्डितराजजगन्नाथम् एव संस्कृतसाहित्यस्य अन्तिमं कविं अलङ्कारशास्त्रस्य वा आचार्यं मन्यन्ते। यथा संस्कृतसाहित्यस्य आधुनिकैः इतिहासविद्भिः अपि एकोनविंशयाः विंशयाश्च शताब्द्याः कस्यचिदपि कवेः काचिदपि रचनाधर्मिता न स्वकीये ग्रन्थे उल्लिखिता वर्तते। अथ स्वातन्त्र्योत्तरे काले अस्मिन् विषये बहवः विद्वांसः अनेकानि तथ्यानि प्रकाशितवन्तः। तत्र हि 1900-2000 खीस्ताब्दीं यावत् प्रायेण 350 महाकाव्यानां रचनाः अभूवन्। पाश्चात्यकाव्यशास्त्रस्य अपि विधाः स्वीकृत्य संस्कृतभाषायां गीतिकाव्यानां लघुकथानाम् उपन्यासादीनां च रचनाः ब्रिटिशशासनकाले एव लोकप्रियाः प्रसिद्धाः च अजायन्त। यत्र छत्रपतिशिवाजीमहाराजम् आधारीकृत्य पण्डिताम्बिकादत्तव्यासस्य उपन्यासविधया '**शिवराजविजयः**'इत्याख्या रचना अत्यन्तं प्रसिद्धा वर्तते। उमापतिद्विवेदिनः '**पारिजातहरणम्**',काशीनाथस्य च '**रुक्मिणीहरणम्**'इत्येवमादीनि महाकाव्यानि अस्यैव कालस्य रचनाः वर्तन्ते। अस्मिन् एव उपक्रमे आधुनिके काले वैदिकधर्मस्य पुनरुद्धर्तुः आर्यसमाजस्य च संस्थापयितुः महर्षिदयानन्दस्य जीवनीम् आधारीकृत्य आचार्यमेधाव्रतशास्त्रिणा '**दयानन्ददिग्विजयम्**'इति महाकाव्यस्य रचना कृता। मूलशङ्करमाणिक्यलालयाज्ञिककृतं

'छत्रपतिसाम्राज्यम्' इति प्रसिद्धं नाटकमपि आधुनिकसंस्कृतसाहित्यपरम्परायाम् एव गण्यते।

भातरतवर्षे आङ्ग्लीयैः प्रचालितव्यवस्थायाः साहित्यरचनाधारया विरोध: अपि आधुनिकसंस्कृतसाहित्यस्य तात्कालिकी विशेषता अवर्तत। अयं विरोध: 1835 खीस्ताब्दे मैकालेद्वारा स्थापितायाः भाषानीतेः परिणाम एव ज्ञातव्य: । लार्डमैकाले भारतवर्षे ब्रिटिशसाम्राज्यस्य विस्तारे संस्कृतभाषां बाधिकां मन्यते स्म। अत एव इंग्लैण्डदेशस्य संसदि स: नूतनाम् एव भाषानीतिं पारयितुं प्रस्तावम् अकरोत्। यत्परिणामत: आंग्लभाषा तात्कालिकी राजभाषा सञ्जाता । एतस्याः भाषानीते: सम्पूर्णे अपि भारतदेशे प्रचुर: विरोध: अजायत । तदानीं संस्कृतस्य समृद्धये महर्षिदयानन्दसरस्वती, ईश्वरचन्द्रविद्यासागरः, महर्षिः अरविन्दः इत्यादयः अनेके सत्पुरुषाः काले काले संस्कृतस्य पक्षपोषका: सन्त: घोरं संघर्षं कृतवन्तः।

एकोनविंशशताब्द्या: संस्कृतसाहित्यस्य रचनाधारासु अयम् एव संघर्ष प्रायेण तात्कालिकी व्यवस्थां प्रति विद्रोहरूपेण अभिव्यक्तः अभूत्। कांग्रेसस्य स्थापनाया: पश्चात् अयं संघर्षः स्वाधीनतासंग्रामस्य आन्दोलनरूपेण परिवर्तित: अभूत् । संस्कृतस्य प्रायेण सर्वा: अपि रचना: इमम् एव केन्द्रबिन्दुम् आधारीकृत्य प्रावर्तन्त।

आधुनिकसंस्कृतसाहित्यम् इति शीर्षकम् आधृत्य अयं प्रश्न: बहूनां जायते यत् अत्र प्रयुक्त: आधुनिक: शब्द: कालेन सम्बद्ध: साहित्येन वा इति। एतस्य उत्तरम् इदम् अस्ति यत् भूतं भविष्यं वर्तमानं च कालस्य एव धर्माः भवन्ति। एतेषु कालखण्डेषु स्थितं साहित्यम् अपि व्यवहारतया प्राचीनम् वर्तमानं भविष्यं च व्यवह्रियते जनैः। अत एवं आधुनिकेन कालेन सम्वद्धं संस्कृतसाहित्यम् आधुनिकसंस्कृतसाहित्यम् इति वक्तुं शक्यते।

**आधुनिकसंस्कृतसाहित्यस्य वैशिष्ट्यम् -**

1784 खीस्ताब्दे सरविलियमजोन्सद्वारा आंग्लभाषया अभिज्ञानशाकुन्तलस्य अनुवादेन सहैव आधुनिकसंस्कृतसाहित्यरचनायाः सूत्रपातः समारब्धः इति मन्यते इतिहासबुधैः। ततः आरभ्य अद्यावधि सा साहित्यधारा प्रवर्तत एव अनारतम् । संस्कृते निबद्धानां अधुनातनसाहित्यरचनानां निमित्तं वैशिष्ट्यं च अधोलिखितरूपेण गणयितुं शक्नुमः :

- अभिज्ञानशाकुन्तलस्य आंग्लानुवादेन सहैव चिरकालेन संस्कृतभाषायाम् अवरुद्धायाः रचनाधर्मितायाः पुनरारम्भ: अजायत । अनेन सहैव मौलिकसर्जनानाम्, समीक्षाणाम्, भाषान्तरस्य, अनुसन्धानस्य च सम्भावनानाम् अन्ताराष्ट्रियाणि द्वाराणि अनावृतानि जातानि ।
- संस्कृतभाषा भूयः अपि विश्वभाषारूपेण प्रतिष्ठिता जाता
- संस्कृतस्य साहित्यरचनासु परम्परया प्रतिपाद्यविषयाणां स्थाने अधुना नवयुगस्य व्यवस्थाविषयाः प्रतिपादयितुम् आरब्धाः ।
- पाश्चात्त्यदेशानां काव्यशास्त्रीयाः सिद्धान्ताः संस्कृते सम्मिश्रिता: सन्तः एकीकृताः अभूवन् ।
- आधुनिकानि संस्कृतसाहित्यानि प्राचीनकाव्यशास्त्रस्य निर्देशेभ्यः लक्षणेभ्यः च रहितानि अलिख्यन्त ।
- संस्कृतसाहित्यस्य आधुनिकरचनासु भाषाया: सारल्यम्, आधुनिकसमाजेन सह सम्बन्ध:, अन्ताराष्ट्रियघटनानां समीक्षा, वैदेशिककाव्यस्य च रचनासिद्धान्तानां स्वीकारः इत्यवेमादीनि वैशिष्ट्यानि सन्ति। अत एव आधुनिकसंस्कृतसाहित्यानां लोकप्रियता पाठकजनेषु उत्तरोत्तरम् अभिवृद्धा जाता ।

एभिः वैशिष्ट्यैः युक्ताः आधुनिकसंस्कृतसाहित्यस्य कविता: कथा: नाटकानि समीक्षादयश्च भारतदेशस्य अन्यासु भाषासु प्रणीतानाम् आधुनिकसाहित्यानाम् अपेक्षया उत्कृष्टतरा: प्रतीयन्ते।

**आधुनिकसंस्कृतसाहित्यरचना: :-**

अधुनातनीषु साहित्यिकविधासु अन्यविधानाम् अपेक्षया महाकाव्यानां रचनाः अधिका: वर्तन्ते। न केवलं प्राचीनान् एव, अपितु आधुनिकान् अपि महापुरुषान् ऐतिहासिकविषयान् घटनाश्च आधारीकृत्य संस्कृतमहाकाव्यानि काव्यलक्षणग्रन्थानां सिद्धान्तेन विरचितानि सन्ति। यत्र श्रीधरभास्करवर्णेकरकृतं 'शिवराज्योदयम्', उमाशंकरत्रिपाठिकृतं 'छत्रपितचरितम्', श्रीहरिअणेकृतं 'तिलकयशोर्णवम्', मेधाव्रतशास्त्रिकृतं 'दयानन्ददिग्विजयम्', सत्यव्रतशास्त्रिकृतं 'वोधिसत्त्वचरितम्', 'इन्दिरागान्धिचरितम्', रेवाप्रसादद्विवेदिकृतं 'स्वातन्त्र्यसम्भवम्', द्विजेन्द्रनाथशास्त्रिकृतं 'स्वराज्यविजयम्', वसन्तत्र्यम्बकशवेडेकृतं 'स्वामिविवेकानन्दचरितम्',जी.बी.पलसुलेकृतं 'वीरसावरकरचरितम्' इत्यादानि प्रसिद्धानि महाकाव्यानि उल्लेखनीयानि सन्ति।

इत्थम् एव आधुनिकं गद्यकाव्यं भाषाशैलीदृष्ट्या विविधासु धारासु विभक्तं वर्तते। केचिद् बाणभट्टस्य पाञ्चालीं शैलीम् अनुसरन्ति, केचित् च दण्डिनः सरलां ललितां च पदावलीम् आतिष्ठन्ते। केचित् रचनाकाराः अलङ्कारसमाससन्धिविरहितं विशुद्धोक्तियुक्तम् एव विन्यासं कुर्वन्ति। सामान्यतः आधुनिकेषु संस्कृतस्य गद्यबन्धेषु लघुकथासु च इयम् एव शैली परिलक्ष्यते। आहत्य आधुनिकगद्यरचनायाः चत्वारः प्रकाराः लक्ष्यन्ते :- लघुकथा, दीर्घकथा, कथानिका, उपन्यास: च।

आधुनिकेषु संस्कृतगद्यकाव्येषु पण्डिताम्बिकादत्तव्यासकृतः 'शिवराजविजयः", क्षमारावकृता 'कथामुक्तावली', मेधाव्रतविरचितः 'कुमुदिनीचन्द्रः', रामजी-उपाध्यायकृता 'द्वासुपर्णा', रामशरणत्रिपाठिकृता 'कौमुदीकथाकल्लोलिनी' इत्यादयः प्रसिद्धाः बहव: रचनाः विद्यन्ते। आधुनिककथाकारेषु प्रशस्यमित्रशास्त्री, राधावल्लभ: त्रिपाठी, राजेन्द्रमिश्र इत्यादय: रचनाकाराः प्रमुखाः विद्यन्ते।

एतस्मिन् एव उपक्रमे साहित्यकाराणाम् संस्कृतस्य आधुनिकानि नाट्यानि अपि प्रचुरतया उपलभ्यन्ते। आधुनिकीनां नाट्यकृतीनाम् अभिनयादिकार्यक्रमाः विभिन्नेषु विशिष्टेषु अवसरेषु द्रष्टुं शक्यन्ते। एतासु रचनासु आधुनिकीनां सामाजिकसमस्यानां चित्रणद्वारा सामाजिकजनानां बौद्धिकी जागरितिः विधीयते। आधुनिकानां वा मध्यकालिकानां वा महापुरुषाणां जीवनचरितचित्रणद्वारा समाजस्य प्रेरणापि आधुनिकसाहित्यरचनायाः प्रमुखम् उद्देश्यम् अवर्तत। प्रमुखेषु रूपकेषु मथुराप्रसाददीक्षितकृतं 'बीरप्रतापम्', 'शङ्करविजयम्', 'गान्धिविजयम्', 'भारतविजयम्' च, हरिदाससिद्धान्तवागीशकृतं 'मेवाड़प्रतापम्, "शिवाजीचरितम्' इत्यादीनि प्रसिद्धैः रचनाकारैः कृतानि बहुनि रूपकाणि विद्यन्ते।

पत्रकारितासरणीम् अवलम्ब्य बहव: संस्कृतपत्रिका: अपि साम्प्रतिकेषु बहुविधविषयेषु निबन्ध-कथा-व्यङ्ग्य-शोधलेखादिविधाभिः जनजागरणाय आधुनिके युगे प्रकाशमाना: सन्ति । अनया रीत्या अपि समाजेषु संस्कृतस्य महति प्रचार प्रसारे च योगदानं जायते। अनुवादसरणीम् अपि स्वीकृत्य अन्यासु भाषासु प्रख्यातकृतीनां संस्कृतानुवादः अपिसंस्कृतसाहित्यपरम्परागौरवम् एव संवर्धयति।

इत्थम् उपसंहृत्य इदं वक्तुं शक्यते यत् आधुनिकेऽपि काले पुराकालवत् संस्कृतसाहित्यम् अभिवर्धयितुं महाकाव्यानि, खण्डकाव्यानि, नाटकानि, कथाः, उपन्यासाः च अनवरतं विरच्यमानाः एव सन्ति।

अतः इदं वक्तुं सुकरं यत् आधुनिकसंस्कृतसाहित्यरचनासु विविधप्रकोरण आदर्शवादस्य निरूपणेन सह याथार्थ्यस्य समाधानपरकं चित्रणं सुतराम् उपलभ्यते। यत्र अधुतातनरचनासु समाजस्य राष्ट्रस्य विश्वस्य च परिदृश्यस्य संवेदनायाः यथायथं प्रचुरं वर्णनं सम्प्राप्यते।

# मुक्तकाञ्जलिविमर्शः

**अंबरीष वसंत खरे**

समन्वयक, संस्कृत विभागटिळक महाराष्ट्र विद्यापीठ, 142 सदाशिव पेठ, पुणे– 411 030

avkhare@gmail.com

**सारांशः**

*एकोनविंशतितमे विंशतितमे च सहस्रकद्वये संस्कृतभाषामधिकृत्य संस्कृतज्ञैः नैकानि काव्यानि निर्मितानि । ख्रिस्ताब्दस्य चतुःषण्णवैकतमे वर्षे (1964) प्रकाशितोऽयं मुक्तकाञ्जलिः दि. द. बहुलीकरमहोदयैः । काव्यप्रकारेष्वेकं मुक्तकनामानमधिकृत्यैषः सङ्ग्रहो विनिर्मितः । प्रस्तुते शोधनिबन्धे मुक्तकाञ्जलिस्थानि कानिचन मुक्तकान्युद्धृत्य विमर्शः कृतः ।*

---

**प्रमुखशब्दाः** बहुलीकरमहोदयाः, मुक्तकम्, मुक्तकाञ्जलिः

## प्रस्तावना

आधुनिके कालेऽस्मिन्नेकोनविंशतितमे विंशतितमे च सहस्रकद्वये संस्कृतभाषामधिकृत्य नैकानि काव्यानि निर्मितानि संस्कृतभाषाभिज्ञैः। तेषु कानिचन महाकाव्यानि व्यरचि महाकविभिस्तथैव बहु कथासाहित्यं च निर्मितं साहित्यकारैः। काव्यप्रकारेष्वेकं मुक्तकनामानमधिकृत्यैका रचना कृता दि. द. बहुलीकरमहोदयैः। मुक्तकाञ्जलिरिति सङ्ग्रहस्यास्य नाम वर्तते। तस्मान्नाम्नैव स्वविषयं प्रतिपादयितुमेष सङ्ग्रहः समर्थः। ख्रिस्ताब्दस्य चतुःषण्णवैकतमे वर्षे (1964) प्रकाशितोऽयमञ्जलिः। भारतवाणी-संस्कृत-पाक्षिकस्य सप्तमवर्षस्याङ्कयोरिदं काव्यं प्रथमतया प्राकाश्यं नीतम् । तदनन्तरं तत्पाक्षिकसंपादकैः व. ग. राहूरकरमहोदयैः भारतवाणीप्रकाशनमालायामेकादशपुष्परूपेण काव्यसङ्ग्रहोऽयं पुनरपि समग्ररूपेण प्रकाशितः।

## ग्रन्थविशेषाः

पूर्वापरनिरपेक्षेणापि हि येन रसचर्वणा क्रियते तदेव मुक्तकमिति व्याख्यामधिकृत्य कविनेतेन सहृदयहृदयान्याह्लादयितुं स्वरचितोऽयमञ्जलिः समर्पितः। प्रत्येकस्मिन्मुक्तके लघुकाव्यमेतल्लघुतरमर्थमाविष्करोति। परं भाव्यरम्यतापेक्षया चिन्तनमाधिक्येन वर्ततेऽस्मिन्मुक्तकाञ्जलौ। ग्रन्थविस्तारवशात्शतककाव्यमिति नामाभिधानमपि प्राप्तुं समर्थोऽयं काव्यसङ्ग्रहः। ग्रन्थेऽस्मिन्कविना स्वकृतानि पञ्चोत्तरशतानि सुभाषितानि संगृहीतानि । सर्वत्र सन्देशं प्रदातुं प्रवर्तितः कविः परं स सन्देशस्त्वसरलो गूढश्च व्यञ्जनयावृत एव। पदविन्यासश्चारमणीयस्तथाप्यर्थगौरवान्वितो दरीदृश्यते। तस्माद्भारवेरर्थगौरवं स्मारयन्ती कवेर्भारती विदुषां शेमुषीमानन्दयितुमलमित्यत्र नास्ति संशयलेशोऽपि। व्यवहारे विद्यमानां विसङ्गतिं प्रकटयति प्रच्छन्नतया कविः। स तु भासकालिदासादिप्रभृतिभिश्चाप्रभावितो नानभिज्ञस्तेषां कृतीनाम्। परं भिन्नरुचिर्हि जन इति न्यायेन कविः स्वविचारान्स्वतन्त्रतया प्रकटीकरोति। भारतवाण्यामनलङ्कृतिरपि गुणवती कविता प्रकाशिता तेन । ग्रन्थोऽयं न तु सुपरिचितस्तथापि “ हा दलन्ति कुसुमानि कियन्ति लोकलोचनपथे न पतन्ति। म्लायतां विजनकानन एषां सौरभं क्षयमभुक्तमुपैति।।” इति न्यायेन काव्यकुसुमस्यास्य सौरभः सहृदयरसिकैरभुक्त एव मा तावत्क्षयमुपेयादिति भारतवाणीसंपादकैरेषः सङ्ग्रहः प्रकाशितः।तयैव बुद्ध्या संक्षेपेण मुक्तकाञ्जलिविमर्शः प्रस्तूयतेऽत्र ।

## काव्यविषयाः

मनोज्ञे काव्येऽस्मिन्स्थालीपुलाकन्यायेनापि विषयवैविध्यं विद्यते। अत्र सृष्टिः पुराणकथा लोकव्यवहारः संस्कृतकाव्यसङ्केतः परम्परा विरोधस्तथा विषमता विभिन्ना मन्नोवृत्तयश्चेत्यादयो बहुविधाः विषयाः विलसन्ति। स्वप्रतिभया कल्पनावैचित्र्याण्यपि चित्रितानि । यथा–

ये केचिद्वसुधां सुधोपमरसैराह्लादयन्ति स्वयं
यत्नस्तान्प्रति नीरदानिव भवेद्यर्थोऽयमुच्चैः स्थितान्।
सद्वृक्षा इव तोयमल्पमपि ये बालार्पितं गृह्णते
संलापं नभसा च ये विदधते तेभ्योऽयमस्त्वञ्जलिः ।।१।।(पृ.२)

अत्र कविना मेघवृक्षयोस्तुलनां प्रदर्श्य मेघेभ्यो वृक्षा महत्त्वमधिकं भजन्त इति व्यञ्जनया सूचितम्। परं विनम्रतया रसिकान्वन्दते मङ्गलाचरणे। अन्यस्मिन्श्लोके लोकव्यवहारं प्रकाशयितुमुद्यतः कविर्वदति–

वैरूप्यं प्रतिमागतं किमिति यो नित्योपहास्यास्पदं
तिष्ठन्केलिवनान्तिकेऽपि च सदा प्राप्नोषि यः कण्टकान् ।
घन्वान्धक्रमणे क्रमेलक नृभिस्त्वं सोऽधुना स्मर्यसे
साकं गच्छसि तादृशैरवहितं रक्षोदरस्थं जलम् ।।६।। (पृ.२)

स्वार्थपरायणो जनो यं जनं वृथैव परिहसति तमेव स्वार्थायोपयुज्यत इति जननीतिमधिकृत्य क्रमेलकस्योदाहरणमत्र चातुर्येण दत्तम्। परिहसितमपि क्रमेलं स्वार्थयुपयुज्य क्वचिदुदरं तस्य विदीर्यायं जनो जलमपि पिबेत्प्रसङ्ग इति व्यञ्जना मनोज्ञा। कुत्रचित्कविना कल्पनावैचित्र्यं प्रयुक्तम्। शिल्पमेकं शिवस्य दृष्ट्वा स्थानमाहात्म्येन गर्वान्धो जनः कथमन्यं जनमुपहसति तद्दर्शितमस्मिन्पद्ये। संकेतभिन्न स्वतन्त्रकल्पनात्र दृश्यते ।

स ोदर्यैति शिवालये पशुपतावाभाषिते नन्दिना
भुङ्क्ष्वौद्धत्यफलं शिला भव जडेत्याकर्णिता शापवाक् ।
उक्षा मीलितलोचनो विहसतीवैतत्स नीचैर्वदन्
ग्रावा लब्धमहापदो विधिवशाद्ग्रावाणमास्कन्दति ।।२१।।(पृ.४)

नैके श्लोकाः पुराणग्रन्थेषु विद्यमानाः कथाः सूचयति । परमेकस्तु सुन्दरो यत्र व्यथितो रामः सीतापरित्यागेन वर्णितः । सिंहासनपदवीं सरलामपि विषमामिव दृष्ट्वा विनिन्दति । रामस्यैषोऽपराधः सीतां प्रति कस्य न दुःखाय? परं स स्पष्टतया कविना प्रस्तुतो धर्मासनं वेपत इति । पदद्वयमिदं व्यञ्जकमुत्तमकाव्यस्य द्योतकं च । अपराधिनस्त्वन्तो चेखिद्यते प्रकाशं च परं निन्दतीति जननीतिरपि सूचिता ।

एषा गर्ह्यते सुतापरिभवाक्लिष्टा धरा कम्पिता
वैदेही जहतोऽद्य भीतिमिव किं धर्मासनं वेपते ।
इत्थं चेतसि चिन्तयन्प्रतिपदं बाष्पाकुलत्वात्स्खलन्
प्राकाश्ये विषमां विनिन्द पदवीं सैंहासनीं भूपतिः।।१६।।(पृ.३)

अयशोभाजनं भूत्वा जनश्च परिहस्यत अन्यं च सततं विनिन्दतीत्यहो विचित्रमेतदिति सूचितं त्रिशङ्कुविषये रचिते पद्ये ।

भूमौ स्वाद्भुतकर्मनिर्वृतमनाः शेते मुनिः स्वाश्रमे
यत्नो वासवकुण्ठितो द्युगमने वृन्दारकैर्हस्यते ।
तिष्ठन्सानुशयास्त्रिशङ्कुरुभयभ्रष्टोऽन्तरा रोदसी
स्वर्गं निन्दति कौशिकं च शपते सेर्ष्यं धरां वीक्षते।।११।।(पृ.२)

केचन श्लोकाः संस्कृतसङ्केतच्छेदं दर्शयन्ति । प्रथमोदाहरणं चातकस्य पश्यामः। संस्कृतपरम्परायां चातकस्तु स्वाभिमानस्य द्योतको वर्तते । किन्तु कविस्त्वन्यमेव विचारं विशदयति ।

भ्रातर्वारिकणार्थमुन्नतमुखो धिक्चातक प्रेक्षसे
मन्ये नीतिरयं कदापि भवता नालोकिता लौकिकी ।
पश्यैतन्नयवेदिसारसबकैराविष्कृतं पाटवं
येनैव ं विहरन्तिनित्यविनतग्रीवाश्चिरं वारिषु ।।७।। (पृ.२)

द्वितीयोदाहरणं शरदभ्रखण्डस्य । गर्जति शरदि न वर्षतीति नरः शरदभ्रखण्डं निन्दन्तीति कविसङ्केतः। परमत्र कविरत्र

कलाशेषश्चन्द्रमा इव तं दानेन रिक्तो दानवीर इति मत्वा तस्य यशो जेगीयते । तद्वारा तस्य दानशौर्यं सूचयति निर्भर्त्स्यति यथा-च ।

त्वं नैवाद्य घनो न वा जलधरः कुत्राम्बुदत्वं च ते
सद्यस्तच्छरदभ्रखण्ड न भवेर्वायोः कथं क्रीडनम् ।
हित्वा त्वां चपलाप्यगाद्वहति को लोके कृशे सौहृदं
पूर्वं नैव विचार्य दत्तमखिलं भुङ्क्ष्वाधुना तत्फलम् ।।१००।।
(पृ.१६)

यथा च– दैवविडम्बनमपि विडम्बयन्तं कर्णदर्पहरणस्य नूतना रीतिर्दानवीरस्य कर्णस्य दैवायत्तं कुले जन्म मदायत्तं तु पौरुषमिति वचनं तमेव स्मारयन्त्येषा व्यङ्ग्योक्तिः कवेः स्वतन्त्रैव कल्पना । यथा–

पूर्वं चात्मविसृष्टमङ्गकवचं हृत्वा द्विजच्छद्मना
प्रच्छन्नं भुवि चागिलद्रणमुखे दैवं रथाङ्गं बलात् ।
स्वायत्तं निजपौरुषं यदि तव क्वैतद्गतं साम्प्रतं
दैवेनेति विडम्बितोऽङ्गनृपतिः स्वोक्तं पुनः स्मारितः
।।4।।(पृ.1)

**निष्कर्षः**

एवंप्रकारेण कविरेषः काव्येऽस्मिन्स्वां प्रतिभां प्रकटयति । तया स्वतन्त्रो विचारः सङ्केतानां च्छेदनं यथा मेघं चोरमपि सूचयतीत्यस्त्यपरो विशेषः । व्यञ्जनाप्रधानमर्थगौरवान्वितं काव्यमिति निश्चप्रचं वक्तुं शक्यतेऽस्मिन्मुक्तकाञ्जलिविषये ।

नैका अर्थच्छटाः कविना एकस्मिन्नेव पद्ये सुनिहिताः ।पुराणकथानामुपयोगः कृतः कविना नैकेषु पद्येषु परं तत्रापि स्वकीयां दृष्टिं नियोज्य तासु भिन्नाशयः प्रकटित इति दृश्यते । यथा युध्यपि स्थिरं युधिष्ठिरमन्ते लोकालोकाचलमात्मानं स्थिरं द्रष्टुमिच्छन्नप्यस्थिर एव दृश्यते । क्व धैर्यमाप्नुयादेष इति ननु प्रश्नः ।

निर्भयचेतसा कविना परम्परामनुसृत्यापि यथामति स्वविचाराणां नूत्नं मण्डनं स्वतन्त्रतया विनिर्मितम् । कवेरात्मचिन्तनशीलस्य कवितापि गम्भीरा । दुर्दिनकाले नृत्यन्मयूरोऽस्य कृते न हर्षनिर्भरः किन्तु केवलं विद्युन्नृत्यमनुकुर्वाणोऽभ्यासतत्परः।कीदृशी भिन्नैषा कल्पना। सङ्ग्रहेऽस्मिन्विशेषा लघुकाव्यस्य सर्वे यथावत्परिपालिता सर्वत्र । शिवशिल्पकवितां दृष्ट्वा शिवस्तथा तस्य वाहनमिति बहिरङ्गभिन्नतान्तस्त्वेकत्वमेव पाषाणत्वमिति विचार आपाततो घातकः परमार्थतस्तु सर्वं खल्विदं ब्रह्मैकमिति चिन्तनं प्रति नेतुं समर्थ इति मन्ये । एवमन्यैव दृशा पश्यति द्रष्टुं च प्रेरयत्ययं कविरिति सत्यम् ।

सृष्टिर्लोकः पुराणमित्याश्रयत्रयमधिकृत्य विनयचिन्तनं प्रायेण दरीदृश्यते । गूढरम्यता तथैवोपहासगर्भलेखनमिति विशेषद्वयं सर्वत्र प्रकटीभवति । काठिन्यं च वितनुते । न प्रसादो न वा श्रुतिसुभगत्वमनुभूयते तथापि नारिकेलपाकन्यायेनाभ्यसनीयमेतत्काव्यं गिर्यारोहणमिव कष्टप्रदमपि सुखदं भवेदिति शम् ।

**सन्दर्भग्रन्थः**

बहुलीकर, दि. द. १९६४. *मुक्तकाञ्जलिः (पञ्चाधिकशत-स्वतन्त्र-स्वकृत-सुभाषितानि)*. भारतवाणीप्रकाशनमाला ११. पुणे: भारतवाणी.

# एकविंशतिशतके संस्कृतभारत्या प्रकाशितमनूदितसंस्कृतसाहित्यम्।

**जयश्री अनिरुद्ध सकलकले**

शंकरलाल खंडेलवाल महाविद्यालय, अकोला

jayashree.sakalkale@gmail.com

**सारांशः**

*संस्कृतभारती संस्कृतस्य प्रसाराय प्रचाराय चैव प्रयतते। व्याकरणप्रशाला–सम्भाषणशिबिर-व्यावहारिकसंस्कृतपुस्तक– व्याकरणग्रन्थ– बालकेन्द्र-मेलनादयः तेषां केचित् प्रयासाः। एतैः सार्धं संस्कृतभारती इदानीं संस्कृतनूतनसाहित्यनिर्माणाय, अन्यभाषातः साहित्यस्य संस्कृतानुवादाय प्रेरयति। 2013 खिस्ताब्दे जानेवारी मासे बेङ्गलुरुनगरे बृहत्सम्मेलनम् अभवत्। तस्मिन् सम्मेलने नैकैः नूतनसंस्कृतग्रन्थैः सह नैके अनूदिताः ग्रन्थाः अपि प्रकाशिताः। एतत् कार्यम् अद्यापि प्रचलति। अस्मिन् संशोधनपत्रे संस्कृतभारत्या प्रकाशितानां अनूदितानां ग्रन्थानां विवेचनं क्रियते।*

**मुख्यबिन्दवः** – संस्कृतभारती, अनुवादः, अनूदितं साहित्यप्रकाराः, भाषावैशिष्ट्यानि

## प्रस्तावना

वेदकालतःसंस्कृतसाहित्यस्य खण्डिता अक्षुण्णा परम्परा भारते अस्मिन् वर्तते। ततः संस्कृतसाहित्यस्य धारा इमां सस्यश्यामलां भारतभूमिं पावनं करोति। वेदात् अनन्तरम् साधाराब्राह्मणोपनिषद्सूत्रस्मृति - शास्त्रग्रन्थार्षमहाकाव्यलौकिक- साहित्यरूपेण अद्यापि प्रवहति। अर्वाचीनसंस्कृतसाहित्ये पुरातनविषयैः सह नवीनतमविषयाणां प्रवेशः स्वाभिकतया अभवत्-आत्मचरित्र निबन्धादयः-काव्य-मुक्तछन्द-लघुकथा-रवासवर्ण्प नवीनतमप्रकाराःअर्वाचीनसंस्कृतसाहित्ये दृश्यते।तेषु प्रकारेषु विपुलसाहित्यनिर्मितिः अपि जाता। एतेन सह अन्यभाषातः साहित्यं अपि अनूदितम् । एकविंशतिशतके अपि संस्कृते विपुलसंस्कृतसाहित्यं प्रकाशितम्। आधुनिकसाहित्ये अनूदितसाहित्यं प्रचुरतया लभ्यते । संस्कृतसंघट्नानि संस्कृताय प्रयतन्ते । तेषु संस्कृतभारती अग्रगण्या सरस्वतीयोजनायाः माध्यमेन संस्कृतसाहित्यनिर्मितिं प्रेरयति। संस्कृतभारत्याः सरस्वतीयोजनायां प्रकाशितानां अनूदितपुस्तकानां विवेचनं अस्मिन् संशोधनपत्रे प्रस्तूयते।

## संशोधनस्य उद्दिष्टः

1. अनुवादशास्त्रस्य स्वरूपम्।
2. ग्रन्थानां तेषां लेखकानां च परिचयः।
3. तेषां विवेचनं , कार्यमहतेः चर्चा अपेक्ष्यते।

## अनुवादशास्त्रस्य स्वरूपम्-

एकविंशतिशततमे वैश्विकीकरणेन एषा भाषान्तरस्य प्रक्रिया अचिरादेव विस्तृता। इदानीं भाषान्तरसाहित्यस्य स्वतंत्रं शास्त्रं वर्तते। संशोधनस्य नूतनशाखारूपेण वर्धमाना दृश्यते।अनुवादः नाम अनुवचनम् । यद् पूर्वकविना उक्तं तदेव अनुवक्तव्यम् । साहित्यकलाकृतेः अनुवादः नाम पूर्वम् उक्तं तदेव पुनः अपरया भाषया उत तया एव भाषया लेखनम्।भाषान्तरम् इति अपरः शब्दः। भाषान्तरं नाम अन्या भाषा इति कर्मधारयसमासः।[1]

इदानीन्तने काले भिन्नभाषीजनानां भृशं सम्पर्कः जातः। अतः उत्तमसाहित्यस्य परिचयः सर्वेषां भवेत् इति विचारः दृढमूलः। तस्मादेव अनूदितसाहित्यं प्राचुर्येण निर्मीयते। साहित्यकृतेः भाषा मूलभाषा तथा अनुदितायाः भाषा लक्ष्यभाषा। भाषान्तरस्य विशेषाः नैकाः । अनुवादकस्य भाषाद्वयस्य ज्ञानम् उत्तमं भवेत्, द्वयोः साहित्ययोः संस्कृतेः

च ज्ञानं भवेत्, मूललेखकस्य आशयः, बन्धः च न त्रुटितः भवेत्, रसहानिः न भवेत्, तथापि तत् मनोहारि भवेत् इति अपेक्षा। समुचितान् सुन्दरान् शब्दान् सः योजयेत्। प्रादेशिकसंस्कृतेः महत्ता, पार्श्वभूमिः च खण्डिता न भवेत् । अनुवादे अभिव्यक्ति-आशयोः द्वौ अपि महत्त्वपूर्णौ स्तः इति अपेक्ष्यते।

अनुवादस्य केचित् प्रकाराः – शब्दानुवादः अर्थानुवादः भावानुवादः, अनुवादस्य अनुवादः, अनुप्रेषणं, युगपदनुवादः, एखभाषिकानुवादः, अनुप्रस्तुतिः, यांत्रिकानुवादः च सन्ति।

**ययातिः**

कैविष्णुसखारामखाण्डेकरः मराठीभाषायां ख्यातकीर्तः कादम्बरीकारः। तस्य कौञ्चवधययातिपहिलेप्रेम-दोनमने–दोनध्रुव-कांचनमृगअमृतवेलादय्राः नैकाः कादम्बर्याः प्रसिद्धाः। तस्य विपुलं ललितगद्यलेखनमपि मराठीभाषायां प्रसिद्धम्। ययातिः महाभारताधारिता कादम्बरी। कुरुणां पूर्वजः ययातिः महाभारते प्रसिद्धः। तस्य शुक्राचार्यस्य कन्या देवयानी दानवराजवृषपर्वणः कन्या शर्मिष्ठा च इति द्वे भार्ये। विषयलोलुपः सः शापादनन्तरं सहसा एव वृद्धः जातः तदा सः स्वपुत्रस्य पुरोः तारुण्यम् आदाय पुनश्च युवाभवत् ।अन्ते सः ज्ञातवान् यत् विषयानां तृष्णा अपूरणीया एव अस्ति। तदा सः शरीरं त्यक्तवान् । विषयानां तृष्णा अपूरणीया एव अस्ति इत्येव विचारस्य प्रतिपादनं अस्यां कादम्बर्यां वर्तते। ययातेः रचनायाः कृते भारतसर्वकारस्य ज्ञानपीठपुरस्कारः खाण्डेकरमहाभागेन प्राप्तः।[2]

**कन्नडरचनाकारः एस् एल् भैरप्पामहाभागस्य साहित्यस्य अनुवादः**

डॉ एस् एल् भैरप्पः ज्ञानपीठपुरस्कारेण सम्मानीतः कन्नडस्य प्रसिद्धउपन्यासकारः। तस्य उपन्यासानां अनुवादः नैकासु भारतीयप्रादेशिकभाषासु जातः। संस्कृते तस्य उपन्यासानाम् अनुवादः इदानीं संस्कृतभारत्याः प्रयासेन उपलब्धः अस्ति। पर्व-आवरण-उल्लङ्घनादयानाम् अनुवादः डॉ विश्वासमहाभागेन कृतः। वंशवृक्षः धर्मश्री इति उपन्यासद्वयम् डॉ जनार्दनहेगडेमहाभागेन अनूदितम्।[3] अनाथो ऽ सि इति उपन्यासः गुगणपय्यहोळ्ळमहाभागेन अनूदितः। सार्थः नाम्ना उपन्यासः एच्-व्हि-नागराजराव्-महाभागेन अनूदितः।[4] एषः एकः उत्तमप्रयासः ।

**वङ्गोपन्यासानां अनुवादः**

देवदासः नाम्ना श्रीशरत्चन्द्रचटोपाध्यायेन विरचितः प्रसिद्धः उपन्यासः। तस्य अनुवादः विश्वजितप्रामाणिकमहाभागेन कृतः। आनन्दमठः नाम बङ्किमचन्द्रचटोपाध्यायेन विरचितं स्वातंत्र्यगीतम् एव। डॉशिवचरणशर्मामहाभागेन अस्य उपन्यासस्य संस्कृतानुवादः कृतः।

**अमीना**

अमीना इति उपन्यासः मोहम्मदकबीरउमरमहाभागेन रचितः । तस्य अनुवादः डॉरमाकान्तशुक्लमहाभागेन कृतः। अनुवादसाहित्ये वैविध्यस्य प्रतीकरूपेण अमीनोपन्यासस्य अनुवादः द्रष्टुं शक्यते।

**अगस्त्यः**

के एस् नारायणाचार्यः वस्तुतः आङ्ग्लभाषायाः अभ्यासकः किन्तु तेन विरचितः अगस्त्यः इति उपन्यासः तस्य वेदोपनिषदां भारतीसंस्कृतेः च सूक्ष्माभ्यासं प्रतिपादयति। अगस्त्यः प्राचीनभारत अतीव महान् ऋषिः सप्तर्षिषु एकः च । तेन दृष्टानि कतिपयसूक्तानि ऋग्वेदे लभ्यते। अगस्त्यलोपामुद्रासंवादसूक्तं तत्र महत्त्वपूर्णम्। रामायणे अपि तस्य उल्लेखः वर्तते। इतिहासे सः कश्चित् ज्ञानी, यशस्वी लोकोत्तरपुरुषः च। विन्ध्यपर्वतं सः शायितवान्। वातपि नाम रक्षसं मारितवान्। दक्षिणापथे वैदिकसंस्कृतेः प्रसाराय यः स्वस्य जीवनम् अर्पितवान्। तस्य जीवनम् एव एतस्य

उपन्यासस्य वर्ण्यविषयः। कथामध्ये आगताः मन्त्राः लेखकस्य वेदेषु निपुणत्वं प्रथयति। अस्माकं प्राचीनेषु ग्रन्थेषु प्राप्तकथानां सूत्रबद्धं मण्डनं खलु एतत्। मूलतः कन्नडोपन्यासः। संस्कृतभारत्याः पूर्णकालिककार्यकर्त्री श्रीमती शान्तला अस्य संस्कृतेन अनुवादं कृतवती।अत्यन्ता प्रभाविनी किन्तु सुगमा सुलभा संस्कृतभाषा अत्र प्राप्यते।[5]

**अभिशप्तंपुष्पम्** – अयं अपि लघूपन्यासः एव।पन्नादाय्याः नाम इतिहासे अङ्कितम्। सा आसीत् चितोडदुर्गस्य युवराजस्य धात्री। राज्ञः पितृव्यबन्धुः वनवीरः यदा उदयं मारितुम् आगतः तदा तया स्वपुत्रस्य प्राणदानेन युवराजा रक्षितः। तस्याः पुत्रस्य नाम चन्दनः आसीत् । तस्य कथा अस्मिन् उपन्यासे ग्रथितं वर्तते। पन्नादाय्याः, उदयस्य, चंदनस्य च स्वकथनानि उपन्यासे सन्ति। अन्ते पन्ना उदयस्य स्थाने स्वपुत्रं राष्ट्राय अर्पयति किन्तु सा तु कदापि चन्दनस्य अनुमतिं न अपृच्छत्।मूलतः हिन्दी उपन्यासः। नागपुरस्था मंजुषाचन्नेठेमदेवमहाभागया संस्कृतेन अनूदितः । चंदनस्य दुःखं वाचकान् प्रति प्रापयितुं सा सफला।[6]

**मधुराः कथाः** - मूलतः सानेगुरोः माठीभाषायां लिखिताः कथाः डॉमाधवीजोशीमहाभागया अनूदिताः । अस्मिन् कथासंग्रहे षड्कथाः सन्ति। सानेगुरोः पूर्णनाम पाण्डुरङ्गसदाशिवसाने इति आसीत्। सानेगुरुजी इत्येव नाम्ना सः महाराष्ट्रे प्रसिद्धः। सः अतीव मृदूहृदयः सौम्यशीलः मातृवत् वत्सलः आसीत्। अस्मिन् कथासंग्रहे स्वेदस्य पुष्पं-वामनभटस्य धेनु-आदय्राः कथाः आशयेन परिपूर्णाः। जीवनहितोपदेशाय च सन्ति।रत्नागिर्यां संस्कृतं पाठयन्ती डॉमाधवीजोशी । तया एव सानेगुरोः एताः कथाः रसिकानां कृते कल्पिताः। करुणादेवी नाम्ना सानेगुरोः अपरं पुस्तकम् अपि मञ्जुषाचन्नेठेमदेवभगिन्या अनूदितम्।[7]

**श्यामस्य माता-**

श्यामची आई इति मराठीभाषायां रचितम् अक्षरवाङ्मयं ललामभूतं खलु एतत्। इयं मातुः वात्सल्यस्य महन्मङ्गलस्तोत्रम् अस्ति इति आचार्यअत्रेमहाभागेन प्रशंसितम्। माता बालकस्य आद्यगुरुः। तस्याः शिक्षया संस्कारैः एव सः वर्धते। अयं ग्रन्थः करुणरसेन परिप्लुतः अस्ति। औरंगाबादनगरे गव्हर्नमेंटमहाविद्यालये संस्कृतं पाठयन्त्या डॉमंजूषाकुलकर्णीभगिन्या भाषान्तरितम् एतत् मातुः स्तोत्रं संस्कृतानुरागिणां कृते।

**रसरङ्गः**

भिन्नभिन्नमराठीलेखकानां अनूदितपञ्चनाटकानां संग्रहः। डॉलीनारस्तोगी नागपुरे संस्कृतक्षेत्रे ज्येष्ठतमा । संस्कृताय एव तस्याः जीवनम्। आशुकवियित्री सा। अमुनां भाषान्तरं कृतवती। प्रत्येकस्य विषयः भिन्नः। मोहवनं-नाटके यूनां उन्मादयितृकं यौवनं कथं दुःखाय परिणमति इति कथयति। बण्डुः अभिनयं करोति- एतन्नाटकं मराठीभाषायाः प्रसिद्धलेखकस्य गंगाधरगाडगीलमहाभागस्य नाटकम्। विकसतु एषा कलिका- अस्ति गजाननदेशपांडेमहाभागस्य लघुनाटकम्। वीरा मीना सर्वेषां विरोधं निराकृत्य स्वसख्याः संगीतायाः अत्याचारिनः परिचिनोति।गृहहीनः-नाटके परित्यक्तानां वृद्धानाम् एकाकित्वं ग्रथितम् अस्ति। नरकवासः एव वरम् इति अजयघारेमहाभागस्य हास्यनाटकम्। एतानि सर्वाणि नाटकानि मञ्चनार्थम् एव अनूदितानि।[8]

**जीवनमूल्यानि**

प्रगसहस्त्रबुद्धेः मराठीमूलम् जीवनमूल्यानि। अस्मिन् ग्रन्थे भारतीयसंस्कृतेः आदर्शभूतानि षोडशमूल्यानि वर्ण्यते। अस्य अनुवादिका डॉ मङ्गलामिरासदार पुण्यपत्तने फर्ग्युसनमहाविद्यालये अध्यापयति। ज्ञानदयायज्ञ-दानदमतपसात्विकता -निर्भयतादीमूल्यानाम् अस्माकं संस्कृतेः अनुसारं वर्णनं विवेचनम् एव वर्तते।

**वसुदेवः –**

एषः श्रीमान्नरेन्द्रकोहलीमहाभागेन रचितः बृहताकारः उपन्यासः। प्राचीनकथायाः आधुनिकदृषा उपन्यासरूपेण लेखनम् एतत् सामान्यं सर्वप्रादेशिकभाषासु। वसुदेवः कृष्णपितुः वसुदेवस्य कथा। अस्य सरिताकृष्णशास्त्री भाषान्तरमकरोत्। अनुवादसाहित्ये तस्याः कार्यम् अनुपममेव। तस्याः दशाधिकानूदितानि पुस्तकानि प्रकाशितानि। आधुनिकोपन्योस्य उत्तमोदाहरणं वर्तते वसुदेवः।

**प्रबुद्धात्मा-**

स्वामीविवेकानन्दजीवने स्वामिनः विचाराः च शुभामहाभागया भाषान्तरिताः सन्ति। लघुलघुसरलाकथाः विचारप्रवणं कुर्वन्ति मानवम्। स्वामिनः विचाराः तु दीपस्तंभवत्। संस्कृतेन तेषां वाचनं आनन्ददायिनम्।

**पलायितः चणकः-**

मूलतः तेलुगुग्रन्थः। श्रीमान्गीतासुब्बाराव प्रथितयशः लेखकः पञ्चाशततेलगुग्रंथानाम्। पारिपोयिन् बठानी इति पुस्तकस्य मूलनाम। अयम् उपन्यासः पूर्वं उर्दुबंगालीहिन्दीभाषाभिः अनूदितः। उपन्यासाधारितं चलचित्रमपि निर्मितम्। अस्य भाषान्तरं डॉ केवरलक्ष्म्याकृतम्।सा सम्प्रति हैदराबादे संस्कृतकादम्यां उपनिर्देशिकारूपेण कार्यरता विद्यते। एषा गृहतः पलायितः निर्धनशिक्षकपुत्रस्य चणकस्य कथा। गृहात् पलायनस्य कारणं तु अतीव लघु, किन्तु बहिः विशालं बहु निर्घृणं वर्तते।ग्रन्थे घटनाक्रमः एतादृशः अस्ति - तस्मिन् पिशुने विश्वे सः चणकः कथं जीवति, अपराधिनां जगति तस्यप्रवेशःकथं भवति, बलात् ते चणकं कृष्णकृत्यं पाठयति, कारयति , ततो निर्गत्य तेन अनन्तरं मन्त्रीमहोदयस्य गृहं प्राप्यते, ततः सः कालिमातुः मन्दिरं गच्छति, मन्दिरे उपहाररूपेण आनीतां चाकलेहां रक्षति, अन्ते सर्वं सुखं भवति, सः चणकः पुनः गृहं प्राप्नोति। गृहात् अन्यत्र बालकः कदापि कुत्रापि सुरक्षितः नास्ति एतदेव भावयति अयम् उपन्यासः। बालानां पालकानां कृते वाचनीयः उपन्यासः।[9]

**अनूदितकथासाहित्यम्**

संस्कृतभारत्या विपुलं संस्कृतकथासाहित्यं प्रकाशितम्। एताः सर्वाः नूतनाः लघुकथाः। लघुकथासंग्रहेषु केचित् अनूदितानां कथानां संग्रहाः सन्ति। डॉ तन्मयकुमारभट्टाचार्य डॉ नारायणदाशडॉराकेशकुमारदाशादिभिः अनूदिताः रवीन्द्रनाथठाकोरस्य कथाः कवीन्द्रकथाकल्लोलिनी नाम्ना संग्रहे प्रकाशिताः। तासु रथयात्रा-व्यवधानम्-वीथी-पत्रालयाध्यक्ष-कङ्काल-क्षुधितप्रस्तरा-उद्धारकृतघ्न-शोक-आदयाः प्रमुखाः। त्रयाणां लेखकानां सरलस्य किन्तु प्रगल्भसंस्कृतस्य परिचायिकाः एताः कथाः।[10]

विश्ववारा इति लघुकथासंग्रहः डॉ राधावल्लभत्रिपाठीमहाभागेन संपादितः किन्तु अस्मिन् कथासंग्रहे एण्डरसन–ओहेन्रि- ऑस्करवाईल्ड-गायडिमापासाँ- सॉमसेटमॉम– पर्लबक-लिओटॉलस्टॉय-एन्जीवेल्सआदिनां विश्वविख्यातानां कथालेखकानां कथा अनूदिताः सन्ति। मनुलताशर्मा–दीक्षितपुष्पा–धर्मेन्द्रसिंगदेव– हरिःअरविन्दः-अच्युतानन्ददाशः-देवर्षिकलानाथशास्त्री–रमाकन्तपाण्डेय–विनय-शङ्करजीझाआदिभिः अनूदिताः कथाः । हाउ मच लैण्ड डझ मैन रिक्वायर्ड इति लिओटॉलस्टॉयस्य प्रसिद्धा कथा इदानीं संस्कृतवाचकानां कृते उपलब्धा।[11] युरोपिअनलघुकथानां परिचयः अपि अस्मिन् संग्रहे भविष्यति। अङ्कुशस्तरअनाहतादयः अपि अनूदितानां कथानां सङ्ग्रहाः एव सन्ति।नरेन्द्रकोहलीमहोदयस्य स्मरणीयकथाः भागद्वये अनूदिताः । विश्वम्भरा इति कथासङ्ग्रहे

वनमालीविश्वालराकेशदाशनारायणदाशैः सम्पादितः विविधानूदितकथानां सङ्ग्रहः।श्रीमधुकरलिमयेरचितानां असमस्य प्रादेशिककथानां अनुवादःअपूर्वशर्मणा कृतः।

**भाषावैशिष्ट्यानि**

एतत् साहित्यस्य कानिचित् भाषावैशिष्ट्यानि सन्ति।

1) अत्यन्तसरलसुगमसंस्कृतभाषा अस्मिन् साहित्ये लभ्यते। समासप्रचुरा भाषा या मध्ययुगीन संस्कृतसाहित्यस्य वैशिष्ट्यम्। किन्तु अत्र संस्कृतं लीलया अवगम्यते।क्लिष्टवाक्यरचना लेखकैः प्रयत्नैः वारिता। मूलकृतयः भिन्नभाषीयाः, किन्तु सरलाभाषया सत्वरम् अवगन्तुं शक्यते।
2) अनूदितसाहित्ये मूलभाषा तथा लक्ष्यभाषा इति भाषाद्वयम्। मूलभाषायाः प्रभावः स्पष्टं दृश्यते। यथा मराठीतः अनूदिते साहित्ये मराठीभाषायाः प्रभावः वर्तते।
3) सरलवाक्यक्रमः इति अस्य संस्कृतस्य वैशिष्ट्यम्। संस्कृते वाक्यक्रमः यावत् महत्त्वपूर्णं न तावत् प्रादेशिकभाषासु वर्तते। किन्तु वाक्यक्रमे अपि प्रादेशिकभाषायाः प्रभावः स्पष्टः। प्रारम्भिकवाचकानां कृते आदर्शानि पुस्तकानि।
4) संस्कृतस्य नूतनः आविष्कारः इति वक्तुं शक्यते। एतैः निमित्तेन न केवलं भारतीयप्रादेशिकसाहित्यं संस्कृते उपलब्धं किन्तु विश्वप्रसिद्धसाहित्यम् अपि इदानीं संस्कृते अनूदितम्। साहित्यप्रकाराणाम् वैविध्यं दृश्यते। उपन्यासः नाम संस्कृते गद्यकाव्यम्। किन्तु आधुनिक उपन्यासस्य संकल्पना किञ्चित् भिन्ना। अनुदिताः एते सर्वे उपन्यासाः अर्वाचीनाः। एतानि वैशिष्ट्यानि अधिकृत्य इदानीं संस्कृते अपि उपन्यासानां रचनाः जाताः। बृहत्-लघु- उपन्यासाः, मराठीलघुकथा, युरोपियनशॉर्टस्टोरीज, वैचारिकलेखसंग्रहः, लघुनाटकानि एते सर्वे नूतनसाहित्यप्रकाराः अनूदिताः।
5) एते ग्रन्थाः न केवलं बालानां सुखबोधाय अपि तु प्रगल्भरसिकानां रञ्जनाय वर्तन्ते।

**उपसंहारः**

संस्कृतभारतीद्वारा एतदेव कार्यं संस्कृतस्य प्रसाराय प्रचाराय च क्रियते। एतेन कार्येण न केवलं संस्कृतसाहित्यस्य विकासः सर्वार्थेन अभवत् । एकः नूतनमार्गः नवोदितलेखकानां कृते उपस्थितम्। अतः एतेषु प्रत्येकस्य प्रकारः भिन्नः, भाषा भिन्ना, विषयः भिन्नः, विषयाः भिन्नाः, तथापि संस्कृतसूत्रे ग्रथितानां तेषां पठनं निश्चयेन न केवलम् संस्कृतस्य लाभाय आनन्ददायिनं च भविष्यति इति निश्चितम्।

**संदर्भाः**


1. संस्कृतललितसाहित्याचे अनुवादशास्त्र, डॉ. नलिनी चाफेकर, 2008 पृष्ठ नं 14 पूर्वकथन
2. ययाति,
3. धर्मश्री, डॉ एस् एल् भैरप्पः, जनार्दनहेगडे, संस्कृतभारती, देहली, 2000
4. सार्थः, डॉ एस् एल् भैरप्पः, एच् व्हि नागराजराव, संस्कृतभारती, देहली, 2000
5. अगस्त्यम्, के एस् नारायणाचार्यः, शान्तला, संस्कृतभारती, नवदेहली, 2011
1. अभिशप्तं पुष्पं, डॉ कृष्णा श्रीवास्तव, डॉ मञ्जुषाचन्द्रेठमदेव, संस्कृतभारती, नवदेहली, 2011
2. मधुराः कथाः श्री सानेगुरुजी, डॉ. माधवी जोशी, संस्कृतभारती, नवदेहली, 2011

3. रसरङ्गः,डॉ लिनारस्तोगी संस्कृतभारती, नवदेहली, 2011
4. पलायितः चणकः, कृष्णा श्रीवास्तव, संस्कृतभारती, नवदेहली, 2011
5. कवीन्द्रकथाकल्लोलिनी, संस्कृतभारती, नवदेहली, 2011
6. विश्ववारा, सं. राधावल्लभत्रिपाठी, संस्कृतभारती, नवदेहली, 2011

**संदर्भग्रन्थाः**

1. अर्वाचीन संस्कृत साहित्याचा इतिहास, डॉ. श्री. भा. वर्णेकर, प्रकाशक रतनलाल आग्रवाल, मॉहर्न बुक स्टोअर्स, अकोला व नागपुर, फेब्रुवारी 1963.
2. कथामुक्तावलिः, पं. क्षमादेवी राव, सं. डॉनन्दापुरी, चारुल पब्लिकेशन, नागपुर
3. संस्कृतभारत्या अन्तर्जाले व्हसाईट
4. वसुदेवः नरेन्द्रकोहली डॉ सरिताशास्त्री, 2011
5. जीवनमूल्यानि , श्रीप्रगसहस्त्रबुद्धे, डॉ मङ्गलामिरासदार, 2011
6. प्रबुद्धात्मा, 2011
7. श्यामस्य माता, श्री सानेगुरुजी , डॉ मञ्जुषा कुळकर्णी, संस्कृतभारती, नवदेहली, 2011

# पण्डितब्रह्मदत्तजिज्ञासुकृताष्टाध्यायीभाष्यप्रथमावृत्तेर्वैशिष्ट्यम्

**लेखरामः दन्नाना**

संस्कृतविभागः, साहित्यविद्यापीठम् महात्मा-गांधी-अन्तरराष्ट्रीय-विश्वविद्यालयः, वर्धा

lekhramdannana@gmail.com

## संक्षिप्तिका

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम् । व्याकरणं विना शब्दानां प्रतिपत्तिः न भवति। अत एव साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः इति भर्तृहरिणा प्रोक्तम् । किञ्च महाभाष्ये अपि उच्यते षड्सु अङ्गेषु प्रधानं व्याकरणम्। प्रधाने कृते यत्नः फलवान् भवति इति। यद्यपि सन्ति व्याकरणानि बहूनि तथापि तेषु पाणिनीयम् अतिशेते । पाणिनीयव्याकरणमधिकृत्यैव वार्तिकानि विलिखितानि । किञ्च एतदाधारीकृत्यैव महाभाष्यञ्च रचितं वर्तते। पाणिनीयव्याकरणं पठितुं सम्प्रति परम्पराद्वयं विद्यते। एका परम्परा सिद्धान्तकौमुदीग्रन्थमाधृत्य प्रवर्तते। अपरा परम्परा अष्टाध्यायीक्रमरीत्या च उपलभ्यते। अष्टाध्यायीपरम्परां इमां महाभाष्यकाराः काशिकाकाराः शब्दकौस्तुभकाराः अनुसृत्य च स्वग्रन्थान् विरचयाञ्चक्रुः । सम्प्रति इयम् अष्टाध्यायीपरम्परा प्रायशः लुप्यमाना वर्तते। अस्याः परम्परायाः वैशिष्ट्यं ज्ञात्वा पण्डितब्रह्मदत्तजिज्ञासुना अष्टाध्यायीभाष्यप्रथमावृत्तेः प्रणयनं कृतम् । अस्यां कृतौ जिज्ञासुवर्येण अष्टाध्यायीपरम्परावैशिष्ट्यपुरस्सरं सूत्राणां सरलतया सुगमतया च व्याख्यानं कृतं वर्तते। अयं ग्रन्थः वैयाकरणानां कृते महदुपकारकः वर्तते। प्रस्तुतशोधपत्रेऽस्मिन्"पण्डितब्रह्मदत्तजिज्ञासुकृताष्टाध्यायीभाष्यप्रथमावृत्तेर्वैशिष्ट्यम्" इति विषयः संक्षिप्तरूपेण प्रतिपादितः।

------

**शब्द विशेषा** -पण्डितब्रह्मदत्तजिज्ञासो परिचय : , अष्टाध्यायी परम्परा-अष्टाध्यायी वर्णनम् , प्रथमावृत्तेः भाष्यम् , अष्टाध्यायीभाष्यप्रथमावृत्तेः वैशिष्ट्यम् ।

**प्रस्तावना : -**

**भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती** इत्याभणकरीत्या संस्कृतभाषेयं भाषासु प्रधानं स्थानमलङ्कुरुते। भाषायामस्यां विद्यन्ते नानाशास्त्ररत्नानि वेदसाहित्यालङ्कार-व्याकरणदर्शनादीनि । एतैः शास्त्ररत्नैरेवेयं भाषा सम्पूर्णतामेति। विद्यमानेषु एतेषु शास्त्ररत्नेषु विशिष्टं मुखरूपं च वर्तते व्याकरणशास्त्रम्। अनेन व्याकरणेन संस्कृतभाषायाः वैज्ञानिकता, सौष्ठवम् अर्थगाम्भीर्यञ्च प्रस्फुट्यते। किञ्च अस्याः मूलम् आधारश्चेदं व्याकरणमेव। अतः व्याकरणमवश्यमध्येतव्यम्। तदुच्यते –

**यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम्।**

**स्वजनः श्वजनो माऽभूत् सकलं शकलं सकृच्छकृदिति[1] ॥**

एतस्मिन् संस्कृतव्याकरणशास्त्रजगति यद्यपि सन्ति नानाविधव्याकरणानि। यथा–

**ऐन्द्रं चन्द्रं काशकृत्स्नं कौमारं शाकटायनम्।**

**सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्[2] ॥**

विद्यमानेषु एतेषु नानाविधेषु व्याकरणेषु राराजते पाणिनीयव्याकरणम्। विना पाणिनिव्याकरणं संस्कृतभाषाध्ययनस्य कल्पनामपि न कर्तुं शक्नुमः। अन्यानि व्याकरणानि यत् किञ्चित् फलसाधकानि अर्थात् केवलानि

[1] . प्रबन्धरत्नाकरः, पृष्ठ सं. २१३

[2] . संस्कृत व्याकरण शास्त्र का इतिहास, पृष्ठ सं.७५

लौकिशब्दसाधकानि अथवा वैदिकशब्दसाधकानि। परन्तु इदं पाणिनीयं तु उभयशब्दसाधकम् अर्थात् वैदिकलौकिकशब्दसाधकं वर्तते। किञ्च एतदेव तादृशं व्याकरणं यद् आधारीकृत्य वार्तिकभाष्यग्रन्थानां प्रणयनं सञ्जातम्। अतः एतस्य व्याकरणस्य आजगति अद्यावधि महती प्रसिद्धिः वर्तते। अतः पाणिनीव्याकरणम् अद्यत्वे सर्वैः सम्यक् अधीयते।

पाणिनीयं पठितुं प्रचलति परम्पराद्वयम्। प्राचीनपरम्परा नव्यपरम्परा च। प्राचीनपरम्परा अष्टाध्यायीक्रमानुसारिणी वर्तते। नव्यपरम्परा तावत् भट्टोजिदीक्षितकृत-सिद्धान्तकौमुद्यानुसारिणी व्युत्क्रमप्रयोगानुगामिनी विद्यते। प्राचीनपरम्परेयं सरला सुगमा सुबोधा च। अत एव भाष्यकाराः काशिकाकाराश्च इमां एव परम्परामनुसृत्य स्वभाष्यवृत्तिग्रन्थान् च लिलिखुः। अस्यां परम्परायामेव एकं विशिष्टं स्थानमलङ्करुते एकोनविंशतिशताब्द्यां विरचिता पण्डितब्रह्मदत्तजिज्ञासुकृताष्टाध्यायीभाष्यप्रथमावृत्तिः। जिज्ञासुवर्यः ग्रन्थस्यास्य लेखनारम्भं १९६० ई० वर्षे अकरोत्। ते १९६३ वर्षे यावत् पाण्डुलिपिरूपेण अध्यायपञ्चकम् अलिखन् । १९६४ वर्षे दिसम्बरमासे अस्य प्रथमावृत्तिग्रन्थस्य मुद्रणमभवत्[3] ।

**पण्डितब्रह्मदत्तजिज्ञासुः –**

पण्डितब्रह्मदत्तजिज्ञासोः जन्म १४ अक्टूबरमासे १८९२ई०वर्षे मल्लूपोताग्रामे जालन्धरमण्डले पंजाबप्रान्तेऽभवत्। एतस्य पितुः नाम रामदासः, मातुः नाम परमेश्वरी।एतस्य प्रचलितं नाम लब्भुरामः, पित्रा प्रेम्णा दत्तमभिधानं मौजगोविन्दः, गुरुणा प्रदत्तं नाम तावत् ब्रह्मदत्तः जिज्ञासुरिति। बाल्यकालात् एव एत अध्ययने प्रखराः बुद्धिमन्तश्च। अध्ययनकाले बहुषु विषयेषु एते प्रथमं स्थानमाप्नुवन्। हिन्दीभाषायाः ज्ञानं स्वभगिन्याः निकटात् सम्प्राप्तम्। एतेषां गृहस्य पृष्ठभागे “मस्जिद”(MOSQUE) आसीत्, ततः ते यवनप्रार्थनां श्रुत्वा तां अस्मरन्। ततः आर्यसमाजान्तर्गतभजनानां परिचयः अभवत्। किञ्च आर्यविद्यालये पठनान्तरं ते संस्काराः इतोऽपि दृढीजाताः। तत्पश्चात् स्वामिदयानन्दविरचितसत्यार्थप्रकाशस्य पठनेन सम्पूर्णं जीवनं परिवर्तितम्। एतस्मात् ग्रन्थात् अत्यन्तं प्रभाविताः सञ्जाताः। तत्प्रभावकारणात् ते (५ जूनमासे १९९२ ई०वर्षे) गृहत्यागमपि अकुर्वन्। गृहत्यागात् परं स्वामिसम्पूर्णानन्दसरस्वतीनां सान्निध्ये संस्कृतभाषां, व्याकरणं, वेदादिशास्त्राणाञ्च षड्वर्षाणि यावत् अध्ययनं चक्रुः। ततः परं वीतरागस्वामिसर्वदानन्दानां सानिध्ये उपनिषदाध्ययनं कृतम्। बहुषु स्थलेषु विरजानन्दाश्रमादिषु अध्यापनकार्यमपि अकरोत्। काश्यामपि १९२६ ई. तः १९२८ ई. पर्यन्तमध्यापनं कृतमासीत्।तत्र काश्यां पण्डितदेवनारायणतिवारिमहोदयानां सान्निध्ये व्याकरणमहाभाष्यमधीतम्।पण्डितढुण्ढिराजशास्त्रिभ्यः,पण्डितगिरीशशुक्लेभ्यः,गोस्वामि-दामोदर-लालवर्येभ्यश्च प्राचीनदर्शनानाम् अध्ययनं कृतम्। मीमांसादर्शनस्यापि अध्ययनं भवता श्रीचिन्नस्वामिनः पण्डितपट्टाभिरामशास्त्रिणश्च सन्निकटे अकारि। अनुसन्धानविषयस्य ज्ञानं पण्डितभगवदत्तवर्येभ्यः सम्प्राप्तम्। बहुषु स्थलेषु शास्त्रार्थसभामपि अलञ्चक्रुः। शास्त्रार्थसभासु भवतामुत्तरं समाधानं वा बहु वैज्ञानिकं तीक्ष्णं च भवति स्म।

बहुषु विश्वविद्यालयेषु व्याकरणवेदादिपरीक्षासु परीक्षकरूपेणापि कार्यमकुर्वन्। वाराणसेयसंस्कृतविश्वविद्यालयस्य विद्वत्परिषदः,

3 . संस्कृत व्याकरण शास्त्र का इतिहास, पृष्ठ सं.५७९

कार्यपरिषदश्च सदस्याः आसन्। वेदवाणी इति मासिकपत्रिकायाः सम्पादकत्वेन कार्यं कृतवन्तः। काशीविद्वन्मण्डलस्य सदस्याः अपि आसन्। बहुषु वैदिकसम्मेलनेषु विद्वत्सम्मेलनेषु च अध्यक्षतामपि कृतवन्तः। काश्यां भवता पाणिनीयमहाविद्यालयस्य स्थापना कृता। संस्कृतपण्डितरूपेण भारतस्य राष्ट्रपतिना भवतां सम्माननं कृतम्। एवमेव बहुषु शास्त्राध्ययनाध्यापनादिषु कृत्येषु संलग्नाः सन्तः अकस्मात् हृदयगत्यवरोधेन १९६२ ई०वर्षे शब्दब्रह्मस्थानमवाप[4] ।

जिज्ञासुवर्याणां लेखनकार्यम् अत्यन्तं गभीरं वर्तते। ते बहून् निबन्धान् लेखान् ग्रन्थान् च लिलिखुः। तेषां वैदिकसाहित्यं व्याकरणशास्त्रञ्चाधारीकृत्य सृजनात्मकं लेखनसाहित्यं विद्यते। किञ्च यद्यपि संस्कृतस्य महान्तः उद्भटाः विद्वांसः तथापि जनसौविध्याय छात्रसौविध्याय च ते बहून् ग्रन्थान् लेखान् निबन्धान् च आर्यभाषायां लिलिखुः। स्वामिदयानन्दविरचितयजुर्वेदभाष्यमधिकृत्य जिज्ञासुवर्येण यजुर्वेदभाष्यविवरणम् इति ग्रन्थः लिखितः। ग्रन्थेऽस्मिन् विवरणकाराः श्रीमद्दयानन्दभाष्ये विस्तृताः टिप्पणीः अलिखन्। किञ्च ग्रन्थेऽस्मिन् वेदज्ञानस्वरूपम्, वैदिकशाखाः, देवतावादः, छन्दोमीमांसा धातूनामनेकार्थत्वम्, यौगिकवादः, वेदार्थविविधप्रक्रियाः इत्यादयः वैदिकविषयाः बहवः विवेचिताः । अयं ग्रन्थः रामलालकपूरट्रस्टद्वारा प्रकाशितः। "वेद और निरुक्त" एवं "निरुक्तकार और वेद में इतिहास" इत्यादयः बहवः वैदिकनिबन्धाः अपि प्रसिद्धाः सन्ति। “देवापि और शन्तनु के वैदिक आख्यान का वास्तविक स्वरूप” इति वैदिकाख्यानविषयकनिबन्धोऽपि अत्यन्तं सूक्ष्मरूपेण गभीरतया विलिखितः। पण्डितवर्यैः प्रायशः ८ उत १० ग्रन्थाः लिखिताः[5]। यथा-

१.भारत के समस्त रोगों की अचूक औषधि - ऋषि प्रणाली

२.यजुर्वेदभाष्यविवरण (भागद्वयम्)

३.वेद और निरुक्त

४.देवापि और शन्तनु के वैदिक आख्यान का वास्तविक स्वरूप

५.सन्ध्योपासना

६.संस्कृत पठन–पाठन की अनूभूत सरलतम विधि (भागद्वयम्)

७.अष्टाध्यायी–भाष्य–प्रथमावृत्ति (भागत्रयम्)

अन्ये च बहवः शोधलेखाः, निबन्धाः, ग्रन्थानां उपोद्घाताः भूमिकाश्च सूक्ष्मतया गभीरतया च विलिखिताः।

उपर्युक्तेषु व्याकरणसम्बद्धः ग्रन्थः सुप्रसिद्धः अत्यन्तं छात्रोपकारकः वर्तते अष्टाध्यायी- भाष्यप्रथमावृत्तिरिति। अष्टाध्यायी-प्रणाली-पुरस्सरं यः पाठनविधिः अस्ति तत्रायं ग्रन्थः महत्वपूर्णस्थानं वरीवर्ति।

**अष्टाध्यायी-भाष्य-प्रथमावृत्तिः–**

अष्टध्यायी व्याकरणस्य मूलभूतः आधारभूतश्च ग्रन्थः। अमुं ग्रन्थमुररीकृत्य बहवः व्याख्यानग्रन्थाः व्याकरणसम्बद्धाः ग्रन्थाश्च विद्वद्भिः प्रणीताः। अत एव अद्यत्वे तु एवमवलोक्यते यत् व्याकरणम् इत्युक्ते

[4] . जिज्ञासु-रचना-मञ्जरी , प्रथम भाग, पृष्ठ सं. १-९

[5] . जिज्ञासु-रचना-मञ्जरी , प्रथम भाग, पृष्ठ सं. १-९, एवं संस्कृत व्याकरण शास्त्र का इतिहास, पृष्ठ सं.५७९

पाणिनीयव्याकरणमेव। सम्प्रति अस्य व्याकरणस्य अध्ययनाध्यापनं सर्वत्र दरीदृश्यते। अस्मिन् अध्ययन–अध्यापनक्रमे सर्वत्र कौमुदीग्रन्थानां समुपयोगः वर्तते। प्रायशः सर्वेषु शिक्षणसंस्थानेषु, महाविद्यालयेषु, विश्वविद्यालयेषु च कौमुदीग्रन्थानां पाठ एव प्रचलति। परन्तु एवंविधपाठस्वीकारेण यः सरलः विधिः अपरः आसीत् अष्टाध्यायी-क्रमविधिः सः प्रायशः लुप्तः जातः। अष्टाध्यायीमनुसृत्य न कोऽपि अद्यत्वे पठनं-पाठनं करोति। तादृशः अध्येतारः सन्ति चेदपि अत्यन्तं न्यूनाः उत अङ्गुलिगण्याः एव। कौमुद्याः प्राक् इयम् अष्टाध्यायी-परम्परा महती सूक्ष्मा प्रसिद्धा च आसीत्। इमां पद्धतिम् उत परम्परामाधारीकृत्य पण्डितब्रह्मदत्तजिज्ञासुवर्यैः अयं ग्रन्थः प्रणीतः अष्टाध्यायीभाष्यप्रथमावृत्तिरिति। एतत्ग्रन्थप्रणयने तेषां सूक्ष्मचिन्तनमसीत्। तेषां मन्तव्यं वर्तते यत् व्याकरणं साधनं न तु साध्यम्। अस्माकं मुख्यं तावत् वेदः वर्तते। तस्य अध्ययनार्थं व्याकरणम् एकमङ्गभूतं वर्तते। प्रारम्भिकछात्राणामुत पाठकानां कृते व्याकरणं पठितुं यद्यपि सन्ति बहवः प्रक्रियासाधकग्रन्थाः रूपावतारः, प्रक्रियाकौमुदी, सिद्धान्तकौमुदी, मध्यकौमुदी, लघुसिद्धान्तकौमुदी इत्यादयः, तथापि एते सर्वेऽपि व्युत्क्रमप्रयोगानुसारिणः ग्रन्थाः। अष्टाध्यायीक्रमरीत्या तु पठनार्थं वर्तते एक एव प्रक्रियापरकग्रन्थः सः अष्टाध्यायीभाष्यप्रथमावृत्तिः।

**अष्टाध्यायीभाष्यप्रथमावृत्तेः वैशिष्ट्यम्–**

अष्टाध्यायीभाष्यप्रथमावृत्तेः लक्ष्यं तावत् सरलतया सूत्राणां ज्ञानं भवेदिति। किञ्च अष्टाध्यायीक्रमस्य परिपालनेन छात्राः सरलतया स्वयमेव अर्थं कर्तुं प्रभवन्ति इति। एवमपि वक्तुं शक्नुमः यत् अष्टाध्यायीक्रमस्य यद् वैशिष्ट्यं तदेव वैशिष्ट्यम् अस्य प्रथमावृत्तेः ग्रन्थस्यापि परिलक्ष्यते। पण्डितब्रह्मदत्तजिज्ञासुवर्याः अष्टाध्यायीक्रमस्य वैशिष्ट्यं ग्रन्थस्यास्य भूमिकायां लिखन्ति यत्[6]–

किमत्र रहस्यमित्यकाङ्क्षायामुच्यते– मूलाष्टाध्यायीग्रन्थाभ्यास एवात्र रहस्यं नान्यत् किञ्चिदपि। आद्गुणः (अ. ६।१।८४) इति सूत्रमस्माभिरित्थं पाठ्यते– आत् ५।१ (पञ्चम्येकवचनान्तम्)। गुणः १।१ (प्रथमैकवचनान्तम्) पदम्। उपरिष्टात् एकः पूर्वपरयोः (अ. ६।१।८१) इको यणचि (अ. ६।१।७४) संहितायाम् (अ. ६।१।७०) इति सूत्रेभ्यः एकः पूर्वपरयोः, अचि, संहितायाम् इति पदानामनुवृत्तिरपकृष्यते, अनुवर्तन्त इमानि पदानि इत्यर्थः। तदानीं बाह्यशब्दस्याध्याहारेण विनापि सूत्रस्यार्थ इत्थं सम्पद्यते– आत्–अचि–संहितायाम् पूर्वपरयोः गुणः एकः। अग्रे स्यात्, भूयात्, भविष्यति, भवति, वर्तते, सम्पद्यते, जायते एषु कतमदपि पदमध्याहर्तुं शक्यते, नात्र विवादोऽस्ति। सूत्र एव सूत्रस्यार्थः इति रहस्यम्। स चार्थः छात्रेभ्यः सूत्रत एव बोधनीयो भवति। मूलाष्टाध्यायीपुस्तक एव छात्राय सर्वमेतत् प्रदर्श्यतेऽवबोध्यते च..इति। उपर्युक्तं अष्टाध्यायीक्रमवैशिष्ट्यमधिकृत्य बहवाः विशेषाः जिज्ञासुवर्येण स्वप्रथमावृत्तिभूमिकायां प्रदर्शिताः।

जिज्ञासुवर्येण पठनपाठनक्रमानुसारेण व्याकरणस्य त्रयः भागाः कृताः। प्रथमः भागः– मूलाष्टाध्याय्याः कण्ठस्थीकरणम्। द्वितीयः भागः– प्रथमावृत्तेः पठनम्। तृतीयः भागः– काशिकावृत्तेः महाभाष्यस्य चाध्ययनम्। एतेषु द्वितीयः यः भागः प्रथमावृत्तिः वर्तते सः अत्यन्तं प्रमुखः भागः। जिज्ञासुवर्याणामुक्तरीत्या तु एतदेव मुख्यं

6 . अष्टाध्यायी-भाष्य-प्रथमावृत्ति, भूमिका पृष्ठ सं. २८-२९

व्याकरणमिति[7]। सर्वैरपि प्रथमावृत्तिं यावत् अध्ययनं कर्तव्यमेव। तस्मात् संस्कृतभाषायाः सम्यक् प्रचारः प्रसारश्च जायते। प्रथमावृत्तौ पदच्छेदः, विभक्तिः, समासः, अनुवृत्तिः, अर्थः, उदाहरणम्, भाषार्थः इत्येते अंशाः विशिष्टरूपेण प्रतिपादिताः।

भाष्यग्रन्थे सूत्रस्य व्याख्यानं यथोक्तं वर्तते तथैव अत्र प्रथमावृत्तिग्रन्थे व्याख्यातमस्ति। प्रथमावृत्तौ सूत्राणाम् उदाहरणानि प्रदश्र्य तेषामर्थाः अपि स्पष्टरूपेण प्रतिपादिताः वर्तन्ते। किञ्चेतस्मिन् ग्रन्थे रूपसिद्धिरपि सुस्पष्टरूपेण प्रदत्ता वर्तते। एतस्य ग्रन्थस्य अपरमेकं वैशिष्ट्यं यत् भाषार्थः हिन्दीभाषायां प्रदत्तः वर्तते। किञ्च ग्रन्थेऽस्मिन् प्रत्येकं सूत्रं कीदृशम् अर्थात् तत् संज्ञासूत्रम् उत परिभाषासूत्रम् अथवा अन्यद् विधिसूत्रम् इति स्पष्टरूपेण निर्दिष्टमस्ति। तथा च यद् सूत्रं यावत् पर्यन्तम् अनुवृत्तिरूपेण गच्छति तदपि सम्यक् रूपेण प्रदर्शितं वर्तते। प्रथमावृत्तौ उपर्युक्तरूपेण सूत्रं व्याख्यातं वर्तते। तद्यथा–

**न धातुलोप आर्धधातुके॥१।१।४॥**

**पद०वि०–** न अव्ययपदम्॥ धातुलोपे ६।१॥ आर्धधातुके ६।१॥

**समासः–** धात्वयवो धातुः, धातुलोपो यस्मिन् तदिदं धातुलोपम्, तस्मिन् धातुलोपे, बहुव्रीहिसमासः॥

**अनुवृत्तिः–** इको गुणवृद्धी॥

**अर्थः–** यस्मिन्नार्धधातुके धातोरवयवस्य लोपो भवति, तस्मिन्नेवार्धधातुके इकः स्थाने ये गुणवृद्धी प्राप्नुतस्ते न भवतः॥

**उदा०–** लोलुवः, पोपुवः. मरीमृजः, सरीसृपः।

**भाषार्थः–** यह निषेध सूत्र है। (आर्धधातुके) जिस आर्धधातुक को निमित्त मानकर (धातुलोपे) धातु के अवयव का लोप हुआ हो, उसी आर्धधातुक को निमित्त मानकर इक् के स्थान पर जो गुण वृद्धि प्राप्त होते हैं, वे (न) नहीं होते॥

यहां से "न" इस पद की अनुवृत्ति १।१।६ तक जाती है[8]।

एवंरूपेण प्रत्येकस्मिन् सूत्रे व्याख्यानं बहु स्पष्टरूपेण वर्तते। एतादृशं सुस्पष्टं व्याख्यानं प्रत्येकं पाठकाय, छात्राय, अध्यापकाय च महदुपयोगकारकं भवत्येव। प्रथमावृत्तिग्रन्थस्य त्रयः भागाः विद्यन्ते। प्रथमे भागे अष्टाध्याय्याः प्रथम–द्वितीय–तृतीयाध्यायाः वर्णिताः। द्वितीये भागे अष्टाध्याय्याः चतुर्थपञ्चमाध्यायौ वर्णितौ। अन्तिमे तृतीये भागे षष्ठ–सप्तम–अष्टमाध्यायाः सम्यक् व्याख्याताः। एतेषु प्रथमः भागः पण्डितब्रह्मदत्तजिज्ञासुवर्यैः लिखितः। तेषाम् अकस्मात् मृत्युः जातः इति हेतोः अन्यस्य भागद्वयस्य कार्यं पण्डितयुधिष्ठिरमीमांसकेन, आचार्यप्रज्ञामहोदयया च कृतम्, परं तस्य आधारस्तु जिज्ञासुवर्याः एव[9]।

त्रिषु भागेषु अन्ते परिशिष्टभागः वर्तते। तत्र परिशिष्टभागे प्रत्येकस्मिन् अध्याये सूत्राणां उदाहरणत्वेन ये शब्दाः दत्ताः तेषां सूत्रप्रयोजनपुरस्सरं रूपसिद्धिः कृता वर्तते। एतद् अत्यन्तं वैशिष्ट्यं वर्तते एतस्य ग्रन्थस्य । अयं च भागः

7 . अष्टाध्यायी-भाष्य-प्रथमावृत्ति, भूमिका पृष्ठ सं. ०४

8 . अष्टाध्यायी-भाष्य-प्रथमावृत्ति, पृष्ठ सं. ८

9 . संस्कृत व्याकरण शास्त्र का इतिहास, पृष्ठ सं.५७९

पाठकानाम् अध्यापकानां छात्राणां च कृते अत्यन्तं सौविध्याय वर्तते।

**उपसंहारः–**

अष्टाध्यायी-क्रमरीत्या व्याकरणस्य सरलतया अध्ययनं कर्तुं प्रथमावृत्तिग्रन्थोऽयं महदुपयुक्तं वर्तते। किञ्चायं ग्रन्थः सर्वविधपाठकानां कृते सौविध्यकारकः भवति। वस्तुतः प्रक्रिया ग्रन्थेषु एतस्य स्थानं विशिष्टं वर्तते इति वक्तुं शक्नुमः।

अन्यप्रक्रियाग्रन्थेषु व्याख्यानं तावत् स्पष्टं नास्ति यावत् स्पष्टं व्याख्यानं ग्रन्थेऽस्मिन् परिलक्ष्यते। एतदपि यदि चिन्तयामश्चेत् यत् व्याकरणाध्ययनपरम्पराद्वये प्राचीनपरम्परायां ग्रन्थोऽयं विद्यते। किञ्च सा परम्परापि उत्कृष्टा। तां च उत्कृष्टां परम्पराम् अयं ग्रन्थः परिपोषयति। व्याकरणाध्ययनस्य अतीव सरलोपायः ग्रन्थेऽस्मिन् प्रदर्शितः। अष्टाध्यायीक्रमेण अध्ययनस्य पुनरुद्धारः अनेन ग्रन्थेन स्पष्टरूपेण भवितुमर्हति। किञ्च ग्रन्थममुमाधारीकृत्य ये पाठकाः छात्राः वा व्याकरणस्य अध्ययनं कुर्वन्ति, तेषां दीर्घकालं यावत् व्याकरणं स्मृतौ तिष्ठति। यतो हि एतस्याः अष्टाध्यायीक्रमपरम्परायाः तदाधारीकृत्य कृतस्य अस्य प्रथमावृत्तिग्रन्थस्य च इदं प्रमुखं वैशिष्ट्यं विद्यते ।

**संदर्भग्रन्थाः**


मीमांसकः युधिष्ठिरः(प्रथम भाग) मञ्जरी–रचना–जिज्ञासु , लघुग्रन्थसंग्रहः१९९३ –बहालगढम् ,रामलालकपूरट्रस्ट ,

1. मीमांसक युधिष्ठिरः, जिज्ञासु–रचना–मञ्जरी (द्वितीय भाग) लघुग्रन्थसंग्रहः, रामलालकपूरट्रस्ट, बहालगढम्–१९९३
2. जिज्ञासु, ब्रह्मदत्तः अष्टाध्यायी–भाष्य–प्रथमावृत्तिः,रामलालकपूरट्रस्ट, बहालगढम्, २०००
3. मीमांसकः युधिष्ठिरः, संस्कृत व्याकरण शास्त्र का इतिहास, प्रथमः भागः, रामलालकपूरट्रस्ट, बहालगढम्
4. शुक्लः, रमेशचन्द्रः, प्रबन्धरत्नाकरः, चौखम्बा-विद्याभवनम् , वाराणसी, २०००
5. महर्षिःपाणिनिः,अष्टाध्यायी,श्रीशान्तिस्वरूपकपूरः,श्रीरामलालकपूरट्रस्टः,बहलगढम्,सोनीपतः,(हरियाणा) १९८५

# २०-२१ शतकवत्सरेषु शिशुभ्यः संस्कृतवाङ्मये योगदानम्

यो। षण्मुखप्रियदर्शिनी

मद्रपुरीसंस्कृतमहाविद्यालयः

**सारांशः**

*२०-२१शतकसत्वरेषु बालाकानां संस्कृतज्ञानाभिवर्धनाय बहवः कवयः संस्थानानि च योगदानं कुर्वन्तः सन्ति। पुराणकाले पञ्चत्रम् हितोपदेशः इति ग्रन्थान् त्यक्त्वा स्पष्टतया शिशूनां कृते इति भिन्नः नास्ति इत्यपि आधुनिककाले एतत्विषये बहूनां चिन्तनम् अस्ति इति कारणात् कथाः श्लोकाः गीतानि नाटकानि इति बहुधा प्राप्यन्ते। एतत् पत्रे अस्मिन् विषये दर्शनं क्रियते। कानिचन उदाहरणानि अपि दृश्यन्ते। भारतीयानाम् योगदानम् एव इति न परंतु केषाञ्चित् विदेशकर्तृणामपि योगदानं दत्तम्। एतेषां साहाय्येन शिशूनां संस्कृतं संस्कृतिं देशभक्तिं सुशीलतां सामान्यज्ञानं कल्पनाशक्तिं ईश्वरभक्तिं च वर्धयितुम् अवकाशः भवति।*

**उपोद्घातः**

संस्कृत वाङ्मये कथाः, श्लोकाः, गीतं, सूक्तं, सुभाषितम् इति कवीनां योगदानं विस्तृतम्अस्ति। शिशूनां कृते अधिकानि न लिखितानि इत्यपि कानिचन पुस्तकानि सन्त्येव। अपितु आधुनिककालेगतशतवर्षेभ्यः बहवः कर्तारः बहूनि सङ्घटनानि अपि शिशूनां कृते कथाः वा गीतानि वा दातुम् उद्युक्ताः दृश्यन्ते। कानिचन सामूहिक विषये कानिचन-इतिहास-पुराण-विषये कानिचन उत्साहार्थम् कानिचन नूतन-चिन्तन-विषये कानिचन देशस्य नेतृन् विषये योगदानम् कुर्वन्ति।

**कथाः**

राम-किशोर-मिश्र-महोदयः स्वस्य 'किशोर-कथावल्याम्' जेम्स् वाल्ट् महोदयस्य ऊष्म-यन्त्र-योगदानं प्रति लिखितवान्। भारतदेशविधाता इति संग्रहम्१८ देशनेतृन् विषये दशरथमहोदयेन, सुरेशचन्द्रमहोदयेन अपि च घनश्यामत्रिवेदीमहोदयेन लिखितम्। बालकानाम् देशनेतृन् परिचयार्थम् लिखितम् एतस्मिन् सङ्ग्रहे नारदः, बुद्धः,वाल्मीकिः, शङ्कराचार्यः, स्वामी दयानन्दः, ईश्वरचन्द्रविद्यासागरः, गान्धिः, सुभाषचन्द्रबोसः, भामती, जवहर्लाल् नेहु, द्रौपदी, गुरु नानक्, मीरा, बालगङ्गाधरतिलकः, बाबासाहेब- अम्बेत्करः, सुरदासः, सर्वपल्ली राधाकृष्णः इत्यादि- महात्मनाम् विषये वर्णनानि दत्तानि।

दशरथमहोदयेन लिखिता 'कथातरङ्गिनी'। तस्यां १७ कथाः दृश्यन्ते। इतिहासविषये अपि च अरुणि, बुद्धः, दुष्यन्त-शकुन्तला प्रभृतीनाम् कथाः दीयन्ते। दीर्घाङ्काःअपि द्वि-त्रि-पृष्ठेष्वेव सरल-भाषया युक्त-चित्रैः सह वर्णिताः।

प्रमिलापरेखमहोदयया लिखिता 'बालसाहित्यसरिति' १७ लघ्व्यः कथाः चित्रसहितं प्रदत्ताः। वैद्य-रामस्वरूप-महोदयेन चित्रितायां 'बाल-नीति-कथायाम्' अष्ट भागाः दत्ताः, अन्ते सुभाषितम् अपि दृष्टम्।

'महान्', 'एकदा' च कथे केशवचन्द्रदासेन लिखिते एवं लोक-भाषा-प्रचार-समिति-द्वारा मुद्रितेस्तः। अमुना महोदयेन 'पताकः' इति एकादीघा कथा अपि दत्ता।

कमला-अभ्यङ्कर-महोदयया दत्तायाम् 'रञ्जन-कथा-मालायाम्' ग्रामीय सम्बद्धाः ३० कथाः दृष्टाः। कविना संस्कृतभाषायाःप्रचारम् लक्षितम्।

वेङ्कटराम-शास्त्री-महोदयेन प्रदत्ता कथा 'कुसुम-मञ्जरी'। तस्याम् २ भागाः अपि च बालकानां कृते ८० लघ्व्यः कथाः विद्यन्ते।

**नाटकम्-**

राजेन्द्र-मिश्रः, हरिनारायण-दीक्षित्, जनार्दन-हेगडे, हरिदास-सिद्धान्त-वागीशः, मथुराप्रसाद-दीक्षित्, विष्णुपाद-भट्टाचार्यः, विश्वेश्वर-विद्याभूषणः, श्रीराम-कलिपादः, रबीन्द्र-कुमारः इत्यादयः बहवः कर्तारः संस्कृतनाटकानां योगदानम् दत्तवन्तः।

पूजालाल् महोदयेन दत्तानि 'बालनाटकानि' । तेषु २३ लघूनि नाटकानि सन्ति। ये बालकाः महर्षिं द्रष्टुं पाण्डिचेर्याः आश्रम् आगतवन्तः तेषां संस्कृतपाठनार्थम् सः लिखितवान्। सः आधुनिकशैलीम् अनुसृत्य अङ्काः इति विभजनं कृतवान्। बालकानाम् उपदेशार्थं केचन श्लोकान् अपि उल्लिखितवान्। रामचन्द्रमहोदयेन दत्ता 'बालनाट्यावली', राजेन्द्रमिश्रेण दत्तम् 'नाट्यनवग्रहम्' ।तस्मिन् ९-एकाङ्कनाटकानि सन्ति। तेषां नामानि 'ईश्वरान्वेषणम्','गुरुदक्षिणा', 'दास्यमुक्तिः', 'श्वेतोद्धारः', 'सत्यकामजाबालः', 'रत्नप्रत्यभिज्ञा', 'नामकरणम्', 'सिंहजम्बुकीयम्', 'गुणाः पूजास्थानम्' इत्यादीनि।

**पद्यम्-**

ओरीस्सायाः पण्डितः दिगम्बरः महापत्रः 'रङ्गरुचिरम्','ललितलवङ्गम्' इति पद्यद्वयम् विशिष्य बालकेभ्यः कृतवान्। तेषाम् उपदेशम्, विनोदम्, भक्तिमयम्, देशभक्तिपूर्वकम्, प्रकृतिविषयम्इति बहवः विषयाः उल्लिखिताः।

हरिदत्तशर्मणा 'बालगीताली' इति नाम्ना त्रिंशत् गीतानि दत्तानि।बालकानां भावम् अनुसृत्य सरलशैल्याम् एव लिखितवान्। 'सुन्दरगुडिका' इति पद्यात् एकम् उदाहरणम् -

अहो प्रिया मे सुन्दरगुडिका
मनोमोहिका सुन्दरगुडिका
इयं स्वपिति हि ममैव समीपे
वसति सदैव ममैव समीपे
सख्यो मे त्वायान्ति यान्ति च
चिरसहचरी मदीया गुडिका
रमतेऽनया मदीयं हृदयम्
रक्षामीमां पिटके सदयम् तया विना नो मनोरञ्जनं
मनोविनोदकरी मे गुडिका

हरिदत्तशर्मणः बालगीताली, सुन्दरगुडिका पृ.३,

**शिशुगीतानि-**

शयनगीतानि इति बालकान् स्वापनार्थम् कानिचन सन्ति। केचन कवयः एतानि अपि संस्कृते लेखितुं प्रयत्नं कृतवन्तः। 'शिशुलीलालाघवम्' इति खण्डकाव्यम् गणेशगङ्गाराममहोदयेन १४० पद्येषु लिखितम् ।

एकम् उदाहरणम्-

भज भज निद्रां निद्रां भज हे बाला।
कुर्वे तव दोलांदोलाम्
त्वां मन्येऽहं विधिना न्यस्तमपूर्वम्।
कोषं मयि कमपि महार्हम्॥
त्वत्प्रीतिवशात् त्वष्टाऽन्विष्टः श्रेष्ठः।
दोला निर्माणगरिष्ठः॥
निर्मिता विशाला दोला।
दृढरज्वा लीलाऽऽलोला।
शय्याऽप्यस्यामतिमृदुला।

गणेशगङ्गारामस्य शिशुलीलालाघवम्पृ.११

मनोरमा महोदयया तस्याम् 'संस्कृतगीतमालिका' इति ग्रन्थे गीतम् लिखितम्।

'बालवाटिका' इति पद्यग्रन्थे बनमालि बिस्वल् महोदयेन ४ लघु पद्यानि नाम्नि प्रदृश्यन्ते। 'हसति मम जन्म भूमिः', 'शयनगीतिका' इति उदाहरणानि।'शिशुयुवदुर्दैवविलसितम्' इति श्लोकरूपपद्यम् सीतानाथ-आचार्येण बालकानां समूहे स्थितम् कष्टम् प्रदर्शितुं लिखितम्। अस्मिन् कविः बालकानां दुर्मरणम्. अस्वास्थ्यम्, केचन बालकानाम् दारिद्रियावस्था, बाल्यकाले एव कार्यश्रम, धनसम्पन्नकुटुम्बानाम् बालाकानां श्रमः इति विषयान् विवरीकृतवान्।

सुभाषवेदालङ्करस्य 'शिशुगीतानि' प्रसिद्धानि। बालाकानाम् देशभक्तिः, भारतीयसंस्कृतिः, नीतिबोधकम् इत्यादीनि तेन स्वस्य ग्रन्थे लक्षितानि। संस्कृतप्रचारार्थमपि सः उद्युक्तः आसन्। 'संस्कृतदेशभक्तिगीता' इति अपरः ग्रन्थः तेन लिखितः। तस्मिन् अपि बालकानाम् युवकानाम् च राष्ट्रभक्तिवर्धनम् एव तस्य लक्षितम् आसीत्।जि. के. ब्रह्मा महोदयेन १९ श्लोकैः लिखिता 'शिशुगीतिका' । एकैकम् वाक्ये १६ मात्राः सन्ति ये करताडनसहितम् वक्तुं मोदितुम् अपि अर्हन्ति। पक्षीणां मृगानाम् च शब्दम् तस्याम् उल्लिखितम् भवन्ति।

छागी रोदिति मेँ मेँ मेँब भेरी जनयति शब्दं भेँ भेँ।
शिशुमार्जारः कुरुते म्यार् उ।वीणा जनयति नादं क्या ऊँ॥
जि. के. ब्रह्मा महोदयस्यशिशुगीतिकापृ.३

केचन श्लोकेषु कविः बालकान् सुशीलम् भवितुम् वदति। केचन श्लोकेषु पितृन् प्रति आदरणम् कर्तव्यम् इति बोधयति।ओ प्रकाशतकुरमहोदयेन 'इन्द्रधनुः' इति नाम्नि ७५ पद्यानाम् सङ्ग्रहणम् अस्ति। वेदालङ्करमहोदयेन 'बालगीतम्', 'बालशारदा' च नाम्नोः गीतं पद्यं च लिखितम्।

'बालगीतम् अङ्कगीतम्' इति कृष्णलाल् महोदयेन बालकेभ्यः २० पद्यानि लिखितानि। संस्कृतभाषायाः रोचनवर्धनाय एतानि लिखितानि इति उपोद्घाते कविना स्पष्टम् दत्तम्। तत् साहाय्यार्थं सः कविः सन्धिम् न्यूनीकृत्वा चित्रसहितम् सरलज्ञापनार्थं प्रयुक्तवान्। तस्मात् एकम् राष्ट्रभक्तिगीतम्-

राष्ट्रवीर हे सुधीर
चल रे चल चल सुपुत्र
तव मानसे निश्चयः
भवतु न वीर संशयः॥

कृष्णलाल् महोदयस्यबालगीतम् अङ्कगीतम्, पृ.२०

राजेन्द्रपाण्ड्येन लिखितानि सचित्र-'संस्कृतबालगीतानि', बालगीतानाम् एकं सङ्ग्रहणम्। एकम् गीतम् उदाहरणार्थम्-

चर्मपृच्छिका रे चर्मपृच्छिका
सुंदरतराचर्मपृच्छिका
सन्दरं कमनीयं तव शरीरम्।
तव शरीरे रामेण पट्टीका रचिता
त्वया सेतुबंधनिर्माणे साहाय्यं कारितम्॥

राजेन्द्रपाण्ड्यस्य संस्कृतबालगीतानि, पृ.२

मृगानाम् ऋतूनाम् च विषये अपि च क्रीडनविषये सः लिखितवान्। सरलभाषा, उचितचित्रोल्लेखनं तस्य महत्वम् अस्ति।

'देवशिशुः' इति शीर्षके प्रमोदकुमारनायकः एकं पद्यं दत्तवान्। तस्मिन् बालकानां कार्यश्रमं प्रति सः दर्शितवान्। बलवीरदत्तशास्त्रीणा लिखितम् बालशिक्षायाम् ३७ पद्यानि नीतिविधोकरूपाणि सन्ति।

'विनोदकाव्यत्रयी' नाम्नि रुद्रदेवी त्रिपाठ्या 'विनोदिनी', 'डिण्डिमः','हाहाहूहू' इति पद्यत्रयम् दत्तम्।

**अनूक्ताः ग्रन्थाः-**

'सुबोधकथा सङ्ग्रहः' इति पुस्तके हितोपदेशस्य २० कथाः संस्कृते अनूक्ताः। वीणा महोदया बाल कथा माला इति एकं पुस्तकं लिखितम्।

ओडिया-भाषातः 'धर्मपादः' इति प्रसिद्धा कथा संस्कृत-भाषायाम् अनूक्ता। अस्मिन् एकः बालकः स्वबान्धव-निर्मातृणां रक्षणार्थं स्वप्राणान् त्यक्तवान् इति कथा प्रस्तुता।

नागराज-महोदयेन कानिचन गीतानि संस्कृते अनूक्तानि। तानि 'सम्विद्' इति पत्रिकायां मुद्रितानि। नारायण-बालकृष्ण-महोदयः 'एसप्' कथाः मराठी-भाषातः संस्कृते अनूक्तवान्। अ.एन्.भट्ट-महोदयेन लिखितं 'नीतिकथाभाण्डार' इति पुस्तकम् संस्कृते राजनाथ-द्विवेदी-महोदयेन'नीतिकथाभाण्डारम्' इति दत्तम्। 'सुधर्मायां' तस्मात् १०० कथाः प्रथिताः।

**प्रहेलिका,सूक्तिः, इत्यादयः-**

संस्कृते प्रहेलिका, सूक्तयः इत्यादयः बालकेभ्यः दृष्टाः। आधुनिक-लेखकानाम् नूतन-चिन्तनम्प्रदर्शयितुं बहवः पन्थाः दृष्यन्ते।

**पत्रिका-**

'बालवाटिका' इति नाम्नि बहुभिः कविभिः लिखितं २६ हास्यपूर्वपद्यानि सन्ति। तानि सर्वाणि सम्भाषणसन्देशे प्रस्थितानि। तेषाम् 'लज्जावति अयि लज्जावति' इति पद्यम् प्रसिद्धम्।

पाण्डीचेरितः सम्पदानन्दमिश्रमहोदयः कानिचन संस्कृतपद्यानि लिखितवान्। तेषां कानिचन सम्भाषणसन्देशे प्रस्थितानि।

घड घड घड घड गर्जति मेघः।
टरर टरर टरर टरर रोदिति भेकः॥
टनन टनन टन नदति घण्टिका।
भण भण भण भणति मक्षिका॥
सम्भाषणसन्देशः (Oct. 2003, p.23)

'संस्कृतमञ्जरी' द्वारा मुद्रितं 'लघुनाटकम्' बालकेभ्यः नाटकानि दीयते। 'दुष्कर्मणां दोषीकः','परिश्रमेण एव सिद्ध्यन्ति कार्याणि' इत्यादीनि लघूनि सरलाणी अपि सन्ति।

'दुर्वा' पत्रिकायां प्रेमनारायणद्विवेदीना लिखितः'देशभक्तिः', अपि च अद्यचरण-झा-महोदयेन लिखितः 'बालकाः राष्ट्रनिर्मातारः', बनमालि बिस्वल् महोदयेन लिखितम् 'जगन्नाथचरितम्' इत्यानि लेखानाम् उदाहरणम्।तस्यां पत्रिकायाम्एव 'शिशूनां वाङ्मयम्' इति विशेष्य सन्दर्भे ६ लघ्व्यः कथाः स्थिताः।

'सुधर्मा' इति पत्रिकायाम् 'चतुरः बालकः', 'नरसिंहः' इति केचन लेखाः प्रस्थिताः।

'चन्दामामा' नूतन काल आवश्यकताम् अनुसृत्य बालकेभ्यः बहुरोचनशैल्याम् बहवः अंशान् ददाति। तेषु केचन क्रीडनम्, विज्ञानम्-आदि-विषयान् प्रति योगदानम् कृतवन्तः सन्ति। तेषु गीतानि, भारतचरितम्, ग्रामियविषयम्, इतिहासम्, संस्कृतिः इत्यादिविषये दत्तानि।

अपि च अनेकसंस्थानानि संघटनानि च बालकेभ्यः रोचनपूर्वकं ग्रन्थं प्रस्तावनार्थम् उद्युक्तानि।

**उपसंहारः**

एवं आधुनिककाले अपि बहवः ग्रन्थाः बालकानां संस्कृतज्ञानार्थं अस्माकं कर्तृभिः संस्थानैः मुद्रितानि सन्ति। तेषां साहाय्येन बालकाः संस्कृतं पठेयुः संस्कृतेः पालनं कुर्युः।

**Bibilgraphy:**


1. A Marigold of Modern Sanskrit Literature, Sweta Prajapati, New Bhartiya Book Corporation, Dehi.
2. Research in Children's Literature, Sweta Prajapati, New Bhartiya Book Corporation, Dehi.
3. Sanskrit as A Tool to New Pedagogy in Modern India, Urmi S.Shah.
4. https://www.chinmayapublications.com/childrens-books
5. https://safic.in/sanskrit-literature-for-children/
6. https://safic.in/sanskrit-literature-for-children/

# विवेकानन्दविजयनाटके जीवनविद्या

**विभा क्षीरसागर**

vibhakshirsagar@rediffmail.com

## शोधसारांश:

*संस्कृतसाहित्यं जीवनमूल्याधिष्ठितम्। संस्कृतकवयः संस्कृत्युद्गातारः। महाकविः डॉ. श्री. भा. वर्णेकरमहोदयः तेष्वेक। तत्रापि कविरेषः त्रिसंयोगी। अस्याशयोऽस्ति संस्कृतं, सङ्गीतं, राष्ट्रियस्वयंसेवकसङ्घः, भारतीययोगश्च एतेषामनुयायी आसीदेषः महाकविः। महाकविनानेन विरचिताः सर्वरचनाः प्रज्ञाभारतीयम् इति विशाले ग्रन्थे सङ्कलिताः। विवेकानन्दविजयम् इति तस्य अतीव लोकप्रियनाटकम् अस्मिन् नाटके जीवनोन्नयायावश्यक-जीवनमूल्यदर्शनं भवति*

*पृथिव्यां त्रीणि रत्नानि जलमन्नसुभाषितम् ।*

*सुविचारैः एव सुजीवनम्]*

*मानवजीवने सुविचाराणां महत्त्वमधिकम्*

*निबन्धेऽस्मिन् तादृशानां जीवनमूल्याना प्रकाशनम्।*

---

प्रज्ञाभारती डॉ. श्री. भा. वर्णेकरमहोदयविरचित विभिन्नरचना: सनातनभारतीयविचारप्रदर्शिका: सन्ति। महाकाव्यखण्डकाव्यगीतिकाव्यकथा-लेखादिषु साहित्यविधासु महाकवे: जीवदृष्टिदर्शनं भवति। एष: महाकवि: त्रिसंयोगी आसीत्। अस्याशयोऽस्ति भारतस्य अमूल्यनिधि: संस्कृतं, भारतीयशास्त्रीयसङ्गीतं, राष्ट्रियस्वयंसेवकसङ्घ: तथैव च पातञ्जलयोग: इत्येषामनुयायी आसीदेष: महाभाग:। अत: 'त्रिसंयोगी' इति उच्यते। संस्कृतसङ्गीतसङ्घयोगश्च एते चत्वार: भारतीयत्ववाहका: एव। एतै: एव महाकवे: व्यक्तिमत्त्वनिर्माणम्। तस्य रचनासु तस्य विचारा: प्रतिबिम्बिता: तस्य प्रत्येकं रचना भारतीयविचारवाहिका एव। महाकवे: रचनावैपुल्यम् अवगम्य शोधनिबन्धेऽस्मिन् तद्विरचित 'विवेकानन्दविजयम्' इति महानाटकस्य विचार: क्रियते। नाटकेऽस्मिन् मनुष्यजीवनोन्नयाय उदात्तविचारा: प्रकटिता:।

**आहारनिद्राभयमैथुनञ्च सामान्यमेतत्पशुभिर्नराणाम्**

भर्तृहरे: वचनमिदं मानवजीवनस्य भिन्नत्वमथवा विशेषतां प्रकटयति। मनुष्ये मनुष्यत्वम् उत्तमविचारै: एव शक्यम्। महाकवि: वर्णेकरमहोदय-विरचितं विवेकानन्दविजयम् इति नाटकं सद्विचाराणां खनि: एव।

### नान्दी

'समाप्तिकामो मङ्गलमाचरेत्' इति शिष्टसम्प्रदायमनुसरति महाकविरेष:।

**जय जय शङ्कर। जय गङ्गाधर।**

**जय योगीश्वर। हे ज्योतिर्लिङ्गसुगोचर ...**

इति नान्दीगानेन नाटकस्यारम्भ:। ईश्वरार्पणधिया कृतं कर्म कर्तृभाव-विनाशकम्। अहं कर्ता इत्येष: अहङ्कार: घातक : एव।

'यद्यत्कर्म करोमि तद्खिलं शम्भो तवाराधनम् इत्येषा समर्पणभावना कार्यकरणे महत्त्वभूता इत्येवास्ति

सनातनविचारः।

**यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्**

**यत्तपस्यासि कौन्तेय तत्कुरुष्व मदर्पणम्॥**[१]

इति तु भगवदुपदेशः एव । महाकविः वर्णेकरः भगवद्भक्तः एव। इत्यतः स्वकृतिं सः समर्पयति देवाय।

**गुरुनिष्ठा**

मुण्डकोपनिषदि

**यं यं लोकं मनसा संविभाति**

**विशुद्धसत्त्वः कामयते यांश्च कामान्।**

**तं तं लोकं जायते तांश्च कामा-**

**स्तस्मादात्मज्ञं ह्यर्चयेत् भूतिकामः॥**[२]

इति सद्गुरुमाहात्म्यवर्णनमस्ति। आत्मवेत्ता यत्किमपि कामयते तत्सर्वं प्राप्नोति। अत : भूतिमिच्छता आत्मज्ञ : पूजनीयः। पातञ्जलयोगदर्शने आत्मज्ञस्य अथवा विशुद्धसत्त्वस्य लक्षणमुक्तमस्ति।

**अविद्यास्मितारागद्वेषाभिनिवेषाः पञ्चक्लेशाः।**[३]

एते पञ्चक्लेशाः यस्य क्षीणाः सोऽस्ति आत्मविद्। सः सद्गुरु अस्ति। सन्तश्रेष्ठश्रीज्ञानदेवविरचितश्रीज्ञानेश्वरी सद्गुरुभक्तिगङ्गा एव।

**मज हृदयी सद्गुरु। जेणे तारिलो हा समुद्रपूरु।**

**म्हणऊनि विशेषे अत्यादरु। विवेकावरी।**[४]

महाकविः डॉ. श्री. भा. वर्णेकरः आसीद्भक्तः सन्तवरज्ञानदेवस्य। महाकविरेषः प्राचीनभारतीय-साहित्यतत्त्वज्ञानशास्त्राणामध्येता आसीत्। इत्यतः तस्य कृतिषु भारतीयविचाराः प्रतिबिम्बिताः।

**नास्ति खलु गुरुकृपासदृशं किमपि रसायनम्।**[५]

महाकवेः वचनेऽस्मिन् तस्य गुरुनिष्ठा अभिव्यक्ता । स्पर्शमात्रेणैव लोहं सुवर्णं यः परिवर्तते सः सद्गुरु एव।

**अयं स्पर्शलग्नं सपदि लभते हेमपदवीम्।**[६]

एवं प्रकारेण सद्गुरुमहिमां वर्णयित्वा

**न सत्पुरुषा सहसा गर्हणीयाः।**[७] इति कथने सत्पुरुषविषयकः आदरः प्रकटितः।

**विनीतवेषेण प्रवेश्यं पुण्याश्रमपदम्।**[८] इति वचनम् अनुकरोति कालिदासम्।

**विनीतवेषेण प्रवेष्टव्यानि तपोवनानि।**[९]

अथवा

**न केनाचिदाश्रमाभ्यर्णभूमय आक्रमितव्या इति।**[१०]

अथवा

**न परुषमाश्रमवासिषु प्रयोज्यम्।**[११]

एतासु पङ्क्तिषु एषः एव आदरभावः अभिव्यक्तः। अस्याशयोऽस्ति महाकविः प्राचीनसंस्कृतसाहित्यज्ञः अस्ति तथैव च सनातनभारतीयविचारे तस्य श्रद्धा अस्ति। परन्तु एषः महाकवि अन्धश्रद्धाविरोधी अस्ति इत्यपि सत्यम्।

**यावच्छक्यं परिहर्तव्यः सम्पर्कः साधुब्रुवाणाम्।**[१२]

एषा तस्य सूचना सावधानीकरोति अस्मान्।

**स्त्रीविचारः**

नाटकेऽस्मिन् शेफालिका अस्ति बालविधवा। बाल्ये एव तस्या: मातृपितृछत्रं नष्टम्। धनलुब्धेन तस्या: मातुलेन सप्ततिवर्षीयवृद्धेन सह तस्या: मातुलेन सप्ततिवर्षीयवृद्धेन सह तस्ायाः विवाहः कारित:। तस्य वृद्धस्य शेफालिका सप्तमपत्नी अस्ति। विवाहादनन्तरं षष्ठे मासे एव दिवङ्गच्छति पतिः तस्या:। वैधव्यवज्राघातितायां बहिष्कृतायां च तस्यां कामान्धवृकाणां कुदृष्टि:। तादृशे एव प्रसङ्गे नरेन्द्र : तां रक्षति।

**'मातृतुल्या पराङ्गना।'**[१३]

इति भारतीयम् आदर्शं प्रकाशयति नरेन्द्र:।

**सीतायन्तां महिला:।**[१४]

इति अस्ति महाकवे: अपेक्षा। अस्मिन् भारतवर्षे यद् यद्विशुद्धं, पवित्रं, शुचितमं तत्सर्वमपि 'सीता' इति शब्देन निर्देष्टुं शक्यते इति सीताशब्दस्याशयमुक्त्वा महिलाविषयकविचार: प्रकटित: महाकविना। नारीणां पावित्र्यं यथापेक्षितं महाकविना तथैव तस्यां शौर्यं, धैर्यं इत्यादय: गुणा: अपि सन्तु इत्यस्ति कालसापेक्षविचार: महाकवे:।

**नारीकुलयशोमूर्तिं स्वातन्त्र्यरणरागिणीम्।**

**उग्रतेजस्विनीं लक्ष्मीं वन्दे विक्रमशालिनीम्॥**[१५]

एतादृशी महिला वन्दनीया इत्यस्ति मतं महाकवे:। भारतीयमहिलानां महनीयपरम्परायां पुण्यदेवता सावित्री, पुण्यकीर्तितारामती, मङ्गलशीला अरुन्धती, भक्तिरसार्द्रमीरा, न्यायान्यायविवेकिनी देवी अहिल्या एता : महिला: वन्द्यन्ते महाकविना।[१६]

**दानप्रकार:**

पञ्चमे अङ्के स्वामिविवेकानन्दस्य कुराणपाण्डित्यं ज्ञात्वा मौलवीमध्ये काऽपि श्रद्धा सञ्जनिता। श्रद्धया एव तेन मौलविना भोजनार्थं निमन्त्रिते विवेकानन्दे झटिति एव तन्निमन्त्रणं स्वीकृत्य सात्त्विकदानप्रकार: सूचित:।

**सद्भावेन प्रदत्तं चेद् विषमप्यमृतायते।**

**विषायतेऽमृतं चापि दुष्टभावेन सर्वथा॥**[१७]

महाकवेः दानवर्णनमेतदनुसरति गीताम्। गीतानुसारं

**'भावसंशुद्धि: अस्ति तप:।'**[१८]

अनेन तप:पूतेन मनसा कृतं दानं सात्त्विकम्।

**दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।**

**देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्॥**[१९]

श्लोकेऽस्मिन् सात्त्विकदानप्रकार: कथित:। विवेकानन्दविजये मौलवीकृतं दानमपि सात्त्विकमेव। यत : सत्पात्रे, सुकाले, सुस्थले च तस्य अन्नदानम्। दाने तस्य विशुद्धभाव:।

**देशभक्ति:**

नाटकेऽस्मिन् पञ्चमे अङ्के सचिन्तं विवेकानन्दं वीक्ष्य एकः तरुण: तं चिन्ताकारणं पृच्छति तदा विवेकानन्द: स्वदेशभक्तिं प्रकटयति। **"अध्यात्मनिष्ठायाः पुनरुज्जीवनं, दरिद्रतायाश्च निर्मूलनं कृत्वा, नवं भारतं निर्मातव्यम् इति मे कार्यभार:"**[२०] इति वदति विवेकानन्द:। नाटकस्य नायकमुखात् महाकवेः देशभक्तिः एव प्रकटिता।

**जातिभेदविरोध:**

द्वितीये अङ्के नरेन्द्रान्धयो: संवाद: जातिभेदविषये

महाकवे: मतं प्रकटयति। शम्भुनाथप्रताडितम् रुधिरक्लिन्नम् अन्धं विवेकानन्द: स्ववस्त्रम् आच्छिद्य प्रणपट्टिकां तन्मस्तके बध्नाति। तदा स: अन्ध: कस्त्वमकारणबन्धु: मम अस्पृशस्येति पृच्छति। कोऽपि प्रतिस्पन्द: नास्तीति ज्ञात्वा मत्सदृश: पङ्गु: स्यादिति मन्यते। परन्तु नरेन्द्र स्वं परिचाययति। तदा अन्ध: हतभागस्य मम स्पर्शेण दूषित: भवान् इत्युक्त्वा अपसरति तस्मात्। "दु:खार्तस्य भातृभूतस्य तव स्पर्शेण कथं दूषितो भवेयमहम्" इति नरेन्द्रोद्गारा: महाकवे: जातिभेदविरोधं प्रकटयति। 'दु:खार्ता: भ्रातर: सर्वे' इति नरेन्द्रवचनं महाकवे: मानवतां द्योतयति। सुखदु:खभावना यथा मयि तथेतरेष्वपि इति ज्ञात्वा वर्तितव्यं मनुष्येण इत्यस्ति विचार: वर्णेकरमहोदयानाम्।

**'आत्मवत् सर्वभूतेषु'**

इति अथवा

**आत्मौपम्येन सर्वत्र समं पश्यति।**[२१]

इति सनातनभारतीयविचार-दर्शनमस्मिन् प्रसङ्गे।

**बलोपासना**

**'बलहीनो हि सज्जनोऽपि न मां तोषयति' एष: उद्गार: बलमहत्त्वं बोधयति।**[२२] '

देवो दुर्बलघातक:' इति ज्ञात्वा बलमुपासनीयम्।

**नायमात्मा बलहीनेन लभ्य:।**[२३]

इति उपनिषद्वचनमपि बलमाहात्म्यं बोधयति।

'विवेकानन्दविजयम्' इति नाटकं महाकवि डॉ. श्री. भा. वर्णेकर-महोदयानाम् अमूल्यरचना।

**न मन्येऽन्यत् सेव्यं त्वदितरदये दैवतमिह**

**न जान्येऽन्यत् तत्त्वं त्वदितरदुदारं परतरम्।**

**न कुर्वेऽन्यत् कर्म त्वदुचित-सपर्या-विरहितं**

**न लोके न श्रुण्वे न च किमपि भाषे त्वदपरम्॥**[२४]

शङ्कराचार्यरचनानुकारी एषः श्लोकः राष्ट्रभावनां प्रकटयति। एतादृशै: नैकेः पद्यैः अथवा विभिन्नरचनाभिः वर्णेकरमहोदय : राष्ट्रविचारान् व्यक्तीकरोति।

नानाधर्मनिगूढतत्त्वनिचितेयं भारतभू:

**'अखण्डब्रह्माण्डे विहरतु सुकीर्तिस्तव मुदा'**[२५]

इतीच्छति महाकवि:। तथैव च

**'दरिद्रनारायणस्य पीडितनारायणस्य सेवायाम् एव एष काय: पततु'**[२६]

इत्यस्ति मनीषा महाकवे:।

मनुष्यजन्मसाफल्याय मार्गदर्शकतत्त्वं ज्ञापयन्नेतन्नाटकं प्रसङ्ग-वैविध्यं, परिणामकारकसंवाद:, उचितशब्दयोजना, सालङ्कृतपद्यरचना, सुयोग्यभूमिकायोजना, संस्कृतनाट्यशास्त्रानुसारी नाट्यरचना इत्यादिभि: विशेषताभि: भिन्नवयस्कानां भिन्नरुचीनां च जनानां मनांसि युगपदेव समाकर्षति इत्यत्र न शङ्कालेश:। किं बहुना नाटकस्यास्य सहृदयहृदयाह्लादकत्वं निर्विवादमेव। नाटकेऽस्मिन् अभिव्यक्तानां विचाराणाम् अवलम्बनं जीवनसाफल्याय। विवेकानन्दविजये जीवनविद्या एव मुक्तये इत्येषा नातिशयोक्ति: इति मन्ये।

**सन्दर्भसूचि:**

१. गीता ९.२७

२. मुण्डकोपनिषद् ३.१.१०

३. पातञ्जलयोगदर्शनम् २.३

४. ज्ञानेश्वरी १.२२

५. विवेकानन्दविजयम् अङ्क ५

६. विवेकानन्दविजयम् अङ्क ६

७. विवेकानन्दविजयम् अङ्क १

८. विवेकानन्दविजयम् अङ्क २

९. अभिज्ञानशाकुन्तलम् अङ्क १

१०. उत्तररामचरितम् अङ्क ५

११. स्वप्नवासवदत्तम् १.५

१२. विवेकानन्दविजयम् अङ्क १

१३. विवेकानन्दविजयम् अङ्क ६

१४. विवेकानन्दविजयम् अङ्क ६

१५. विवेकानन्दविजयम् अङ्क ६.२

१६. विवेकानन्दविजयम् अङ्क ६.४,५

१७. विवेकानन्दविजयम् अङ्क ५.११

१८. गीता १७.१६

१९. गीता १७.२०

२०. विवेकानन्दविजयम् अङ्क ५

२१. गीता ६.३२

२२. विवेकानन्दविजयम्

२३. मुण्डकोपनिषद् ३.२.४

२४. विवेकानन्दविजयम् ७.७३

२५. विवेकानन्दविजयम् ७.८५

२६. विवेकानन्दविजयम् अङ्क १०

# नायिकाप्रधानासंस्कृत-एकाङ्किका "ललनाख्यानम्"

**मृदुला अतुल: तापस:**

कविकुलगुरु-कलिदास-संस्कृत-विश्वविद्यालय:,रामटेकम्

कविता होले

कविकुलगुरु-कलिदास-संस्कृत-विश्वविद्यालय:,रामटेकम्

## सारांशः

*नायिकाप्रधानासंस्कृतएकाङ्किका 'ललनाख्यानम्' इत्यस्मिन्शोधनिबन्धे श्री. प्रभाकर-महादेव-भातखण्डेवर्येण लिखिताया: एकाङ्किकाया: समिक्षणंमयाकृतम्। भतखण्डेमहोदय: संस्कृतपण्डित: अस्ति। महोदयेन लिखितानां विंशत्याधिकानां एकाङ्किकानां प्रस्तुति: राज्यनत्यस्पर्धायां अभवत्तासुप्रायश: सर्वा: केनापि परितोषिकेण सम्मानिता:।महोदयेन संस्कृतभाषायां विपुलं लेखनं कृत:।महोदय: महाराष्ट्र-राज्य-महाकवि-कालिदास-संस्कृत-साधना-पुरस्कारेण सम्मानित:। 'ललनाख्यानम्' इत्यस्या: एकाङ्किकाया: नायिका वासन्ती वीरसैनिकस्य विजयसिंहस्य गतधवा अस्ति। यमुनाविजयसिंहस्य सापत्नमाता मोहिनी उदयसिंहयो: जन्मदात्री चास्ति। विजयसिंहस्य मृत्यो: पश्चादपि वासन्ती सौभाग्यालङ्कारान्धारयति। तस्य शौर्यार्थं सर्वकारेण दत्ताधनराशीम् उपयुज्य सा स्मारकं निर्मातुमिच्छति। यमुनामोहिन्यो: मनसि धनलोभ: अस्ति तस्मात्ते वासन्त्या: विवाह: उदयसिंहेन सह कृत्वा धनराशिमप्तुमैच्छताम्। वासन्ती एतदर्थं नानुमन्यते तदा ते तां दुषयत:। तस्मात्सा गृहं धनं च ताभ्याम्दत्वा गृहत्यागार्थं सिद्धा भवति। तदा एव सेनामुख्यालयादागता तेजस्विनी विजयसिंह: जीवित: अस्ति इति व◌ार्ता कथयति।तेन सर्वा: प्रमुदिता:।यमुनामोहिन्यौतयो: दुर्वर्तनार्थं क्षमां याचत:।एकाङ्किकाया: सुखान्त: दर्शित:। एकाङ्किकाया: कालावधि: एकदिवसमित: स्थानञ्च विजयसिंहस्य पैतृकसदनमस्ति।एकाङ्किकाया: विषय: पारम्पारिक: पात्राणां चित्रणं वास्तविकं च अस्ति किन्तु अत्र 'त एव पदविन्यासास्ता एवार्थ-विभूतय:। तथापि नव्यं भवति काव्यं ग्रथनकौशलात्' इत्यस्य वचनस्य प्रत्ययं प्राप्तम्। एकाङ्किका पुरुषपात्रविरहिता नायिकाप्रधाना अस्ति।नायिका धैर्यशालिनी आत्मनिर्भरा स्वतन्त्रा च अस्ति ।अत्र वीररस: प्रामुख्येन दृश्यते।एकाङ्किकायां परिवर्तनबिन्दु: आसीत् तेजस्विन्या: प्रवेश:। यत: तदनन्तरमेव यमुनामोहिन्यो: विचारपरिवर्तनं भवति। विजयसिंह: जीवति इत्यनया वार्तया एकाङ्किकाया:सुखान्त: भवति।एकाङ्किकाया: कृते नान्दी: भरतवाक्यस्य च नियम: यद्यपि नस्ति तथापि भातखण्डेवर्याणां एकाङ्किकायामस्याम् एकाङ्किकाया: विषयमाधृत्य नान्दि: भरतवाक्यञ्च लिखिते।एकाङ्किकाया: भाषा सरला सुबोधा च अस्ति। एकाङ्किकायामस्यां स्त्रीविषयकानां बहुनां प्रश्नानां समावेश: भातखण्डेमहोदयेन कृत:। यथा- प्रेमविवाह:, पुनर्विवाह:,आन्तरजातीय विवाह: गृहकलह: चेति।एषा एकाङ्किकास्त्रीसामर्थ्यम् उद्घोषयति गौरवयति च। आधुनिकानां संस्कृत-एकाङ्किकानां कथानकस्य स्वरूपं कालानुरूपं परिवर्तितम्।आधुनिकायां एकाङ्किकायां नायिकानां अन्य पात्राणां च स्वरूपमपि परिवर्तितम्। नायिकाया: विचारा: स्वतन्त्रा: एकाङ्किकायां सा प्रमुखपात्ररूपेण चित्रिता । कथानकस्य विषया: वास्तविकायां घटनायां आधारिता:।मनोरंजनेन सह समाजोद्बोधनस्य कार्यं एतादृशा: एकाङ्किका: कुर्वन्ति।अस्यामेकाङ्किकायां कौटुम्बिकस्य मूल्यस्य महती लेखकवर्येण वर्णितास्ति।*

## प्रस्तावना-

नाट्यशास्त्रे दशरूपके साहित्यदर्पणे च रूपकप्रकाराणां वर्गीकरणं क्रियते।वर्गीकरणस्य आधार: नेता-कथावस्तुरसश्च सन्ति। रूपके नायक: प्रमुखपात्र: अस्ति।नायिकानायकानुरूपं भवति। नायिकाप्रधानानां विषयमाधृत्यानामेकाङ्किकानां रचनाविषये नियमानां लेखनं न अभवत्।कालौघे समाजे सर्वत्र परिवर्तनं दृश्यते। परिवर्तनं प्राकृतिकनियम:।जीवने सर्वस्मिन्क्षेत्रे परिवर्तनं दृश्यते। संस्कृतसाहित्येऽपि परिवर्तनं दरीदृश्यते। प्रदीर्घानां संस्कृतरूपकप्रकाराणां प्रस्तुतीकरणमिदानीं न दृश्यते। आधुनिकानां संस्कृत-एकाङ्किकानां लेखनं प्रस्तुतिश्च अधुनाकालानुरूपं वर्तते। अस्माकं जीवनशैल्यां परिवर्तनं

भवति तस्य प्रतिबिम्बं रूपकेषु दृश्यते। अधुना सर्वेषु क्षेत्रेषु स्त्रिय: अग्रेसरन्ति।कार्यकुशलता समर्पणं धैर्यं च एतै: गुणै: ता: आत्मन: स्वतंत्रस्थानं प्राप्नुवन्ति। इदानीं या: नायिकाप्रधाना: एकाङ्किका: लिखिता: तासु"ललनाख्यानम्" इति एकाङ्किकां स्वीकृत्य तस्या: समीक्षणम् अस्मिन्शोधनिबन्धे मया क्रियते।

**उद्दिष्टम्-**

आधुनिक-संस्कृत-एकाङ्किकाया: परिवर्तितस्य स्वरूपस्य वैशिष्ट्यानां च समीक्षणम् इत्यस्य शोधनिबन्धस्य उद्दिष्टमस्ति।

**संशोधनपद्धति:-**

"ललनाख्यानम्" इत्यस्या: एकाङ्किकाया: अध्ययनस्य कृते समीक्षणात्मिकाया: पद्धत्या: अवलम्बनमत्रक्रियते।

**परिकल्पना-**

नायिकाप्रधानानां पुरुषपात्रविरहितानां एकाङ्किकानां समाजोद्बोधने महत्वपूर्णा भूमिका वर्तते।

**महत्वपूर्ण: बिन्दव:** (keywords)–

आधुनिक-संस्कृत-एकाङ्किका, गतधवानां स्थिति:, स्वतंत्रानारी।

"ललनाख्यानम्" इत्यस्याम् एकाङ्किकायां प्रभाकर-भातखण्डेवर्येण कृतं नायिकाया: अन्यस्त्रिपात्राणाञ्चयथार्थं चित्रणं कथानकसहाय्येन संक्षेपेन दृश्यते।

**कथानकम्-**

कथानकेऽस्मिन् माता यमुना पुत्री मोहिनी चान्यवसताम्। वासन्ती यमुनाया: सापत्नवीरपुत्रस्य विजयसिंहस्य गतधवा। विजयसिंहस्यमृत्यो: पश्चादपि सा सौभाग्यालंकारान्धारयति स्म। मोहिनीयमुनाभ्यामेतद्वरोचते स्म।ते चिन्तयत: यत्तस्या मनसि विजयसिंहस्य परमसख्यु: राघवस्य कृते आकर्षणमस्ति किन्तु वासन्ती तं बन्धुवत्स्निह्यति स्म।विजयसिंहस्य शौर्यस्य गौरवार्थं सर्वकारेण गौरवचिह्नं धनराशिश्च अदियताम्।यमुनामोहिन्यो: मनसि प्राप्तधनराशे: पञ्चलक्षरूप्यकाणां विषये लालसा उत्पन्ना किन्तु वासन्ती स्पष्टीकरोति यत् 'धनेन एतेन ममपत्यु: स्मारकमन्दिरं रचयिष्यामि।[1] विजयसिंहस्य भगिनी मोहिनी विवाहादनन्तरम् आत्मन: पतिगृहं त्यक्त्वा मातु: गृहे एव वसति स्म।सा मातरमवदत्- 'यथा स: तथा अहमपि ते आत्मीया एव पुत्री। सुशिक्षिता। स्वयंसिद्धा। अत: अस्य विभवस्य कार्यभारं मयि स्थापयितुम् अर्हसि।[2] एते न तस्या: धनलोलुपता दृश्यते।यद्यपि तौ सुशिक्षितौ तथा पितयो: विचारा: कुटिला: सन्ति।तौ वारंवारं वासन्तीं दूषयत: यत्सा इदानीं विजयसिंहस्य गतधवा तस्या: वर्तनमुचितं नास्ति।उभयो: मनसि एका योजना आसीत्यद्वासन्त्या: विवाह: यदि उदयसिंहेन सह भवेत् तर्हि धनस्य विभाजनं न भवेत्। किन्तु वासन्ती तदर्थं नानुमन्यते। अनन्तरं यमुनामोहिन्यो: धनलोभं दृष्ट्वा वासन्ती ताभ्यां सर्वधनम् अलङ्काराञ्च दत्वा गृहत्यागं कर्तुं सिद्धा अभवत्।तदा एव तेजस्विनी सेनामुख्यालयादागच्छत्। तया सह भाषमाणा वासन्ती मूर्च्छिता। तस्यामूर्च्छाया: कारणं सा कथयति- 'सगर्भा अहम्।ममपत्यु: गर्भं धारयामि।'[3] तज्ज्ञात्वा सा यमुनामोहिन्यौ तयो: दुर्वर्तनार्थं भर्त्सयति स्म। तदा तेजस्विनी शुभवार्तां कथयति यत्विजयसिंह: जीवित: अस्ति।तेन मातापुत्र्यो: मतपरिवर्तनं भवति।एकाङ्किकाया: अन्ते यमुना आत्मन: अपराधस्य कृते क्षमां अयाचत्।मोहिनी अपि भर्त्रा सह प्रेमपूर्वकं निवसितुं पतिगृहंगन्तुमुत्सुका भवति। सर्वा:

1ललनाख्यानम्पृ.९

2तत्रैवपृ.४

3तत्रैवपृ.१४

यद्यद्वाञ्छन्ति तद्तद् प्राप्नुवन्ति।।कथानकस्य फलागम: शुभकामना च अधोलिखितेषु शब्देषु अभिव्यक्ता:

'आत्मनिर्भराभवन्तुललना।लब्धकीर्तय: सन्तुसमर्था।'[4]

वासन्ती, यमुना,मोहिनी, तेजस्विनी च एत्येता: चतस्र: स्त्र्िय: एकाङ्किकायामस्मिन्विद्यन्ते। तासां गुणवैशिष्ट्यानि निम्नलिखितानि सन्ति-

**वासन्ती-**

वासन्ती स्वतन्त्रै: विचारै: युक्ता आधुनिकयुगस्य नारी आसीत्।सा एकाङ्किकाया: नायिका आसीत्।अन्ते विजयसिंह: जिवित: अस्ति इति वार्तया तस्यै फलप्राप्ति: अभवत्।यदा सा विजयसिंहस्य शौर्यपदकं प्रमाणपत्रं च तस्य छायाचित्रस्य पुरत: स्थापयति तदा तस्या: श्वश्रू यमुना तां देवीं जगदम्बां नमस्कुरु इति आदिशति। वासन्ती वदति-'न प्रणमामि। मम पति: एव मे देव: देवीदेवता त्राता रक्षिता च।तेन विना न कमपि अन्यं देवं भजामि।[5] एतेन ज्ञायते तस्या: पतिविषयकी प्रीति: निष्ठाच।

विजयसिंहस्य गौरवार्थं सर्वकारेण यदा धनराशि: प्रदत्ता: तदा यमुनामोहिन्यो: मनसि धनलोभ: उत्पन्न:। किन्तु वासन्ती स्पष्टीकरोति यद् 'धनेन एतेन मम पत्यु: स्मारकमन्दिरं रचयिष्यामि।'[6] एतेन तस्या: निस्पृहता ज्ञायते।

यमुनामोहिन्यौ वासन्तीं वारंवारं उदयसिंहेन सह विवाहार्थं अवदताम्येन सर्वं वैभवं अविभक्तं स्थास्येदित्यत:।तदा सा मनस्विनी स्पष्टतया वदति-'सर्वंगृह्णातु। नाहं कपर्दिकामपि वाञ्छामि। विद्याविभूषिता अहम्। यत्र तत्र चरित्वा सेवाकार्यं कृत्वा आत्मानं परिपालयितुं समर्था।इत: प्रस्थितास्मि।[7] एतेन तस्या: आत्मविश्वास: दृश्यते।

वासन्ती स्वभावेन वत्सला।एकाङ्किकाया: अन्ते यमुनामोहिन्यो: मतपरिवर्तनं दृष्ट्वा वासन्ती ते क्षमापयति वदति च 'प्रीति: करुणा दया क्षमा वात्सल्यं आर्जवं इत्यादिनि स्त्रीणामेव विविधानि नामानि।[8]

नायिकानां विविधा: प्रकारा: नाट्यशास्त्रीयेषु ग्रन्थेषु वर्णिता:।यथा-

अथनायिकात्रिभेदास्वान्यासाधारणास्त्रीति।

नायकसामान्यगुणैर्भवतियथासम्भवैर्युक्ता॥[9]

अत्र एतदपि कथितमस्ति यत्नायक: इव नायिकाऽपि त्यागादिभि: सामान्यगुणै: युक्ता अस्ति।पुनश्चतस्या: प्रकारा: कथिता:।तासु स्वियानायिकाया: निम्नलिखितं लक्षणमस्ति –

विनयार्जवादियुक्तागृहकर्मपरापतिव्रता स्वीया।[10]

नायिकाया: एतस्य लक्षणानुसारं वासन्ती स्वियानायिका अस्ति इति दृश्यते। यत: सा स्वतन्त्राविनम्रावात्सल्ययुक्ता च अस्ति।एकाङ्किकायाम् अन्यस्त्रीपात्राणां वैशिष्ट्यानि अधोदत्तानि सन्ति-

**यमुना-**

यमुना विजयसिंहस्य सापत्नमाता मोहिनी उदयसिंहस्य च जन्मदात्री आसीत्।धनलोभेन अपत्यमोहेन च सा वासन्त्या: पुनर्विवाहम् उदयसिंहेन सह कर्तुमैच्छत्।परं तस्या: मनसि वासन्तीं प्रति काऽपि प्रेमभावना नासीत्।वासन्त्या: नकारेण क्रुद्धा सा वदति -'यदि त्वमेतं पुनर्विवाहं न अनुमन्यसे तर्हि

---

4तत्रैवपृ.१९

5तत्रैवपृ.५

6ललनाख्यानम्पृ.९

[7]तत्रैवपृ. १२

[8]तत्रैवपृ.१९

[9]सा.द. परि.३श्लो.५६

[10]तत्रैवश्लो.५७

नात्र त्वया स्थातव्यम्। समाप्तस्ते अधिकार: अस्मिन्गृहे।,[11] मोहिन्या: प्रभावात्सा स्नुषायै गतधवा, दुर्भाग्यलक्षणा, स्वैराचारिणि एतादृशानि दूषणानि ददाति।परं मनसा सा ऋजु।विजयसिंह: जीवित: इति श्रुत्वा तस्या: मतपरिवर्तनं भवति।सा वासन्तीं वदति -'त्वया अद्य प्रजावति अहम्।अनया कलहप्रियया डाकिन्या कृतात्दुष्टोपदेशादेव त्वया सह अन्याय्यम् आचरितम्।[12] एतै: दृश्यते यत्यथापारम्पारिकाणां स्त्रीणां वर्तनं विचाराश्चतथैव यमुनाया: आसन्।

**मोहिनी-**

मोहिनी वासन्त्या: ननान्दा आसीत्।वासन्तीं प्रति तस्या: व्यवहार: अनुचित:।पतिं दरिद्रं मत्वा परित्यज्य सा पितृगृहे न्यवसत्।पैतृकसम्पत्ते: सर्वाधिकारान्प्राप्तुमिच्छन्ती सा वासन्तीं गृहान्निष्कासयितुं मातरं प्रेरयति।परम्परया ननान्दु: वर्तनं यथा अस्ति तथैव सर्वदा तस्या: व्यवहारमासीत्। कुटिलमति: सा सदैव वासन्त्या: विषये असत्यं प्रालपत्।यदा वासन्ती तां पतिगेहं गन्तुं सूचयति स्म तदा सा वदति स्म- 'नाहं त्वत्त: किमपि अध्येतुमिच्छामि। एतन्ममपितृगृहम्।अत्रास्ति मे अधिकार:।[13] यदा तेजस्विनी आगत्य विजयसिंह: जीवित: अस्तीति कथयति तदा मोहिनी वदति -'मम बन्धौ जीवति सति सर्वकारेण प्रदत्तं तत्पञ्चलक्षमितं धनं......किं.....प्रतिदातव्यं भवेत्।[14]एतेन वाक्येन पश्चात्तापदग्धा सा वदति -'ज्ञातं प्रेम्ण: सामर्थ्यं दृष्टं च।इत: परं भर्त्रा सह धनस्य कारणात्कलहं न करिष्यामि।[15]

**तेजस्विनी-**

तेजस्विनी सेनामुख्यालयात्सेनाधिकारिण: सन्देशं दातुमागच्छति। यमुनामोहिन्यो: वासन्त्या सह वर्तनं दृष्ट्वा सा कठोरशब्दै: तयो: भर्त्सनां कृत्वा वदति -'एष भवत्यो: स्नुषया सह इदृश: व्यवहार:।लज्जास्पदमेतत्।अम्ब सपत्नीपुत्र: अपि भवत्या:।तस्य भार्या च स्नुषा एव भवति।कन्यावत्तया सह आचरितव्यम्।[16] एतेन तस्या: यथार्थवादित्वं ज्ञायते।

**एकाङ्किकाया: वैशिष्ट्यानि-**

- एकाङ्किकाया: कालावधि: एकदिवसमित: स्थानञ्च विजयसिंहस्य पैतृकसदनमस्ति।
- एकाङ्किकाया: विषय: पारम्पारिक: पात्राणां चित्रणं वास्तविकं च अस्ति किन्तु अत्र 'त एव पदविन्यासास्ता एवार्थ-विभूतय:।तथापि नव्यं भवति काव्यंग्रथ न कौशलात्' इत्यस्यवचनस्य प्रत्ययं प्राप्तम्।
- एकाङ्किका पुरुषपात्रविरहिता नायिकाप्रधानाअस्ति।
- नायिका धैर्यशालिनी आत्मनिर्भरा स्वतन्त्रा च अस्ति।अत्र वीररस: प्रामुख्येन दृश्यते।
- एकाङ्किकायां परिवर्तनबिन्दु: आसीत्तेजस्विन्या: प्रवेश:। यत: तदनन्तरमेव यमुनामोहिन्यो: विचारपरिवर्तनं भवति।विजयसिंह: जीवति इत्यनया वार्तया एकाङ्किकाया: सुखान्त: भवति।
- एकाङ्किकाया: कृते नान्दी: भरतवाक्यस्य च नियम: यद्यपि नास्ति तथापि भातखण्डेवर्याणां एकाङ्किकायामस्याम् एकाङ्किकाया: विषयमाधृत्य नान्दि: भरतवाक्यञ्च लिखिते ।

---

11ललनाख्यानम्पृ. १२

12तत्रैवपृ. १८

13तत्रैवपृ. ११

14तत्रैवपृ. १६

15तत्रैव पृ. १८

16तत्रैवपृ. १७

- एकाङ्किकाया: भाषा सरला सुबोधा च अस्ति। कुत्रचित् अलङ्काराणां प्रयोग: क्रियते।यथा- निराश्रया निर्विण्णा निराधारास्मि संवृत्ता।[17]- अनुप्रास
  पतिरूपं सकलसमुद्रसारभूतं रत्नं मया पुन: प्राप्तम्।[18]- रूपक
  वीराग्रणी: विजय: त्वादृशं च स्त्रीरत्नम् अवमानितम्।[19]- उपमा
- सुभाषितसदृशानां वाक्यानां प्रयोग: एकाङ्किकाया: सौन्दर्यं वर्धयति। यथा-
  धनानि तु भवन्ति यान्ति वा।परं प्रीतिस्तु नितरां सुदृढा तिष्ठति।[20]
  प्रेम नाम सहजीवनं सहानुभूति: सहविचारा: सुखदु:खानां सममेव अनुभव:।[21]
- एकाङ्किकायां केषाञ्च अन्यग्रन्थानांलेखकानां च प्रभाव: अपि दृश्यते।यथा- पुरुषा: स्त्रीणां स्वातन्त्र्यं न वाञ्छति इति उच्यते।[22] अत्र मनुस्मृते: 'न भजेत्स्त्रीस्वतन्त्रताम्।[23] इत्यस्य प्रभाव: दृश्यते। वासन्ती विजयसिंहस्य अनुजेन सह विवाहस्य विचारमपि न सहते।सा अवदत्-' क्स पुरुषसिंह: क्व च एष: ग्रामसिंह: देवर:।[24]अत्र रघुवंशस्य 'क्व सूर्यप्रभवो वंश: क्व चाल्पविषयामति:।[25] इत्युक्ते: स्मरणं भवति।तथैव 'कुठे इंद्राचा ऐरावत कुठे श्यामभटाची तट्टाणी' इति उक्ते: स्मरणमपि भवति।
- एकाङ्किकायामस्यां स्त्रीविष्यकानां बहुनां प्रश्नानां समावेश: भातखण्डेमहोदयेन कृत:।यथा- प्रेमविवाह:, पुनर्विवाह:,आन्तरजातीयविवाह: गृहकलह: चेति।
- एषा एकाङ्किका स्त्रीसामर्थ्यस्यउ द्घोषयति गौरवयति च।

## उपसंहार:-

'ललनाख्यानम्' इत्यस्या: एकाङ्किकाया: समीक्षणात्मकस्य अध्ययनस्य निष्कर्षा: निम्नलिखिता: सन्ति-

- आधुनिकानां संस्कृत-एकाङ्किकानां कथानकस्य स्वरूपं कालानुरूपं परिवर्तितम्।
- नायिकाप्रधानानां पुरुषपात्रविरहितानामेकाङ्किकानां लेखनं प्रस्तुतीकरणमपि इदानीं आरब्धम्।
- आधुनिकायां एकाङ्किकायां नायिकानां अन्यपात्राणां च स्वरूपमपि परिवर्तितम्।नायिकाया: विचारा: स्वतन्त्रा: एकाङ्किकायां सा प्रमुखपात्ररूपेण चित्रिता।
- अधुनानार्य: आत्मनिर्भरा: भवन्ति।पतिं विनाऽपिता: अपत्यपालनं कर्तुं समर्था:।तस्य प्रतिबिम्बम् एकाङ्किकायां दृश्यते।
- कथानकस्य विषया: वास्तविकायां घटनायां आधारिता:।
- मनोरंजनेन सह समाजोद्बोधनस्य कार्यं एतादृशा: एकाङ्किका: कुर्वन्ति।
- अस्याामेकाङ्किकायां कौटुम्बिकस्य मूल्यस्य महती लेखकवर्येण वर्णितास्ति।

17ललनाख्यानम्पृ.७

18तत्रैवपृ.१६

19तत्रैवपृ.१८

20तत्रैवपृ.१८

21तत्रैवपृ.११

22तत्रैवपृ.१४

23मनु. अ. ५श्लो. १४८

24ललनाख्यानम्पृ.११

25रघु.सर्ग१श्लो. २

'ललनाख्यानम्' इत्यस्याः एकाङ्किकायाः विषयः यद्यपि पारम्पारिकः तथापि आधुनिकेऽपि समाजे इदानीं भृशं परिवर्तनं नाभवत्। एतादृशीनाम् एकाङ्किकानां प्रस्तुतिः समाजजागरणम्साधयति।

**संक्षेपसूचिः-**

.

ना.शा. - नाट्यशास्त्र

मनु. - मनुस्मृतिः

रघु. - रघुवंशम्

सा.द. - साहित्यदर्पणः

**सन्दर्भग्रन्थसूचिः-**


1. दशरूपकम्, लोकमणिदाहालः, चौखम्बाअमरभारतीप्रकाशन, प्रथमसंस्करणम्, १९८७
2. नाट्यशास्त्र, बाबूलालशुक्लशास्त्री, चौखम्बासंस्कृतसंस्थान, वाराणसी, पुनर्मुद्रणम्, वि. सं.२०७५
3. मनुस्मृतिः, पण्डितरामेश्वरः भट्टः, चौखम्बासंस्कृतप्रतिष्ठान, वाराणसी, २०११
4. रघुवंशम्, आचार्यश्रीनिवासवरखेडी, प्रकाशकः- कविकुलगुरु-कलिदास-संस्कृत-विश्वविद्यालयः, रामटेकम्, २०१९
5. ललनाख्यानम्, श्री. प्रभाकरमहादेवभातखण्डे, प्रकाशकः- महाराष्ट्रसेवासंघ, मुम्बई, प्रथमावृत्तिः, जुलै२०००
6. साहित्यदर्पणः, डॉ. सत्यव्रतसिंह, चौखम्बाविद्याभवन, वाराणसी, २०१३
7. संस्कृतमेंएकाङ्किरूपक, डॉ. वीरबालाशर्मा, मध्यप्रदेशहिन्दीग्रन्थअकादमी, भोपाल प्रथमसंस्करणम्, १९७२
8. संस्कृतसाहित्य, बीसवींशताब्दी, राधावल्लभः त्रिपाठी, राष्ट्रिय-संस्कृत-संस्थान,नईदिल्ली, प्रथमसंस्करणम्,१९९९

# आङ्गलसाम्राज्यं सौन्दर्यशास्त्रपरं किमपि अनुशीलनम् ।

**मुरलीकृष्णः ई.**

संस्कृतसाहित्यविभागः श्रीशङ्कराचार्य विश्वविद्यालयः कालटि

sanskrutamurali@gmail.com

**सारांशः**

*केरलीयसंस्कृतमहाकाव्येषु तथा इतिहासमहाकाव्येषु अन्यतमं भवति आङ्गलसाम्राज्यम्। महाकाव्यस्यास्य लेखकः ए आर् राजराजवर्मा अस्ति। १९०१ तमे वर्षे काव्यस्य प्रकाशनं जातम्। महाकाव्यस्य लेखनकर्त्ता कालिदासात् प्राप्तप्रेरणया तत्समानशैल्या च काव्यमिदं रचितमिति विदुषां मतं वर्त्तते। अस्मिन् लेखने राजराजवर्ममहोदयस्य स्वीये आङ्गलसाम्राज्यमहाकाव्ये सौन्दर्यशास्त्रपरकं वर्णनं कीदृशं वर्त्तते इति प्रदर्शयितुं प्रयासः कृतः। रसः, वृत्तं, रीतिः, अलङ्काराणि च राजराजवर्ममहोदयस्य वर्णने कालिदाससदृशम् उत, न इति परिशील्यते। पुनःश्च काव्यमिदं महाकाव्यलक्षणोपेतम् उत, न इत्यपि परिशील्यते। केरलेषु प्रसिद्धम् आद्याक्षरप्रासम् अन्त्याक्षरप्रासयुक्तश्लोकानां प्राचुर्यम् इत्यादि काव्यस्यास्य वैशिष्ट्यं वर्त्तते। काव्यस्य प्रभवकारणं, काव्यकर्तुः स्थितिकालः काव्ये वर्णितरसालङ्कार- रीतिवृत्तानां वर्णनम् उपसंहारः च इति क्रमेण एव अस्य प्रबन्धस्य रचना कृता। सहायकग्रन्थानां सूचिः अन्ते प्रदत्तमस्ति। तत्पूर्वं टिप्पणीः प्रदत्ता।*

---

**उपोद्घातः**

संस्कृतकाव्यजगदि ए. आर्. राजराजवर्मणः आङ्गलसाम्राज्यं प्रमुखं भवति। भारते आङ्गलेयानां परमाधिकारशासनमेव अस्य काव्यस्य इतिवृत्तं भवति। पुनश्चेदं इतिहास (Historical) काव्यश्रेण्याम् अन्तर्भवति। षोडशशततके राज्ञ्याः एलिसबत्त्वर्यायाः अनुज्ञया आङ्ग्लेयाः भारतं प्राविशुः। ततः नवदशशतकस्य उत्तरार्धे परमाधिकारः विक्टोरियाराज्ञ्याः हस्तगतम् आसीत्। सामान्यतः भारते उपत्रिशतवर्षान् यावत् आङ्गलेयानां शासनकालः आसीत्। महाकवेः दण्डिनः काव्यादर्शग्रन्थे वर्णितस्य महाकाव्यलक्षणयुक्तं रचितं महाकाव्यम् एव आङ्गलसाम्राज्यम्। महाकविना दण्डिना महाकाव्यलक्षणं तत्र इत्थम् उक्तम्-

"सर्गबन्धो महाकाव्यं उच्यते तस्य लक्षणं..."[1]

त्रयोविंशति सर्गात्मके अस्मिन् काव्ये अत्यन्तसरलशैल्या सुचारुतया रसगुणालङ्कारादीनां चित्रणं कृतं वर्त्तते। कालिदासशैलीम् अनुकरोति इति अस्य वैशिष्ट्यं वर्त्तते।

**आङ्गलसाम्राज्यम्**

ए.आर. राजराजवर्मणः आङ्ग्लसाम्राज्यं केरलीयसंस्कृतसाहित्यमण्डले प्रसिद्धं वर्त्तते। अस्मिन् महाकाव्ये त्रयोविंशतिसर्गेषु दशोत्तरनवशताधिकैकसहस्र (१९१०) श्लोकाः सन्ति। काव्यमिदं भारते आङ्गलसाम्राज्यस्य[2] आविर्भावं तथा वर्धनमधिकृत्य लिखितं वर्त्तते। विक्टोरियाराज्ञ्याः वज्रजूबिली आघोषसन्दर्भमुपलक्षीकृत्य सप्तनवत्युत्तरअष्टशताधिकैकसहस्र (१८९७) तमे वर्षे

---

[1]काव्यादर्शः 1.12.

[2] Published with short notes by T. Ganapati Sasthri, Trivandrum, 1901; KSL V pp.59-61; CKSL, p.957, KSLB-p.154, KSSCVp.416; VI pp.44-59; HCSL,pp.258 & 274.

Also see Poovattoor Ramakrishna Pillai, Bharathee Bhavan.ed.

S.Bhaskaran Nair, Panjab University Indological series-26, Hosairpur, 1980,p.204.

काव्यस्यास्य यद्यपि कृता तथापि अस्य महाकाव्यस्य प्रकाशनं तु एकोत्तरनवशतैकसहस्रतमेवर्षे एव जातम्।

केरलपाणिनि[3] इत्यपरनाम्ना प्रसिद्धः ए. आर. राजराजवर्मा चतुषष्ठ्युत्तरऽष्टशतैकसहस्रतमेवर्षे १८६४'कण्णनाइशेरि' मध्ये विद्यमाने लक्ष्मीपुरराजभवने स्वजन्मनाऽलञ्चकार। अस्य माता भरणि- तिरुनाल् तम्पुराट्टि, पिता वासुदेवन् नम्पूतिरिः च आसीत्। अयं 'केरलवर्म वलिय कोयित्तम्पुरान्' महोदयस्य सहोदरपुत्रः आसीत्। कुन्नक्कर रामवारियर् तथा केरलवर्मा च अस्य गुरुभूतौ स्तः। भग्नविलापम् इति काव्यम् मद्रास् विश्वविद्यालये स्नातक परीक्षानुत्तीर्णतासन्दर्भे अयम् अलिखत्। पश्चात् स्नातकपरीक्षाम् उत्तीर्णो जातः। ततः अस्य विवाहः मावेलिक्करा राजवंशीयया स्वातितिरुनाल् महाप्रभा इत्याख्यया राजपुत्र्या सह जातः। महाशयोऽयम् विद्यालयानां निरीक्षकरूपेण नवत्युत्तरऽष्टशताधिकसहस्रतमेवर्षे १८९० नियुक्तो जातः। पश्चान्नवनवत्युत्तरऽष्टशताधिकसहस्रतमेवर्षे १८९९ संस्कृताध्ययनविभागस्य पर्यवेक्षकरूपेण नियुक्तः अभवत्। अनेन न केवलम् आङ्ग्लसाम्राज्यं लिखितम् अपितु अन्यानि लेखनानि, काव्यानि, पुस्तकानि च लिखितानि यथा मलयालभाषायां केरलपाणिनीयम्, लघुपाणिनीयम्, मेघदूतम् (परिभाषा), मत्तविलासम्, कुमारसम्भवम्, मयूरसन्देशव्याख्यानम्, भाषाभूषणम्, शब्दशोधिनी, नलचरितव्याख्यानम्, वृत्तमञ्जरी, प्रथमव्याकरणम्, मध्यमव्याकरणम्, साहित्यसाह्यम्, मलयालशाकुन्तलम्, चारुदत्तन्, स्वप्नवासवदत्तम् च आसन्। संस्कृते तु तुलाभारप्रबन्धः, देवीदण्डकम्, भग्नविलापः, पितृविलापः, मातृवचनम्, राधामाधवम्, आङ्ग्लसाम्राज्यम्, मणिदीपिका, पद्मनाभपञ्चकम्, राजमुद्ासप्तकम् इत्यादि कृतयः आसन्। मलयालभाषायाम् केरलपाणिनीयम् इति ग्रन्थस्य लेखनेन एव एतस्मै केरलपाणिनी इति नाम केरलीयसहृदयैः प्रदत्तं वर्त्तते। अस्य मरणं अष्टादशोत्तरनवशतैकसहस्रतमेवर्षे 1918 जातम्।

**महाकाव्यस्य प्रभवहेतुः**

आङ्ग्लसाम्राज्यस्य लेखनकार्यं राजराजवर्मवर्येण रघुवंशकाव्यसदृशमेव कृतं वर्त्तते। कालिदासः तस्य कृतिः च अस्य कृते प्रेरकौ स्तः। सूर्यवंशराज्ञां वीरकथानां वर्णनसदृशम् आङ्गलसाम्राज्य-काव्ये आङ्गलेयानाम् (अधिकारिणां) भरणनिपुणानाम् उत्तमवीरसाहसिककथानां वर्णनं कृतं वर्त्तते। रघुवंशे रघोः वर्णनं मनोः दिलीपस्य च वर्णनात् परम् एव कृतम्। तथा आङ्गलसाम्राज्ये अपि ब्रिट्टन्- देशस्य गौरवगाथा तथा वैशिष्ट्यकथनानन्तरम् एव आङ्गलयशासकानां वर्णनं विधीयते।

उदा-

**चिरश्रुतां भारतखण्डलक्ष्मीम् अनन्यसामान्यमहानुभावाम्।**
**विलोहितुं ते कुतुकोत्तरङ्गा मार्गश्रमं नैव मनागजानन्।।**[4]

समानरीत्या रघुवंशे एकादशे अध्याये रामस्य पूर्वजानां संस्मरणम् अत्र कालिदासेन क्रियते।

**पूर्ववृत्तकथितैः पुराविदः सानुजः पितृसखस्य राघवः।**
**उह्यमान इव वाहनोचितः पादचारमपि न व्यभावयत्।।**[5]

अपरत्र आङ्गलसाम्राज्ये-

**क्व भारती भुर मुगलेन्द्रभुक्ताः**
**क्वचाङ्गलद्वीपवणिक्समूहः।**
**अहो महारम्भकृतोद्यमानां महाशयानां किमिवानवाप्यम्।।**[6]

[3] Bhalakrishna Varrier.M.R.,'Keralapanini' Sahityaranjini-Trivandrum,1946.
[4]आङ्गलसाम्राज्यम्,1.35.
[5]रघुवंशम्,11.10.
[6]आङ्गलसाम्राज्यम्,1.26.

अयं श्लोकः रघुवंशस्य द्वितीय श्लोकमवलम्ब्य एव लिखितं वर्त्तते। यथा रघुवंशे-

**क्व सूर्यप्रभवो वंशाः क्वचाल्पविषयामतिः।**
**तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।**[7]

**रसः** -

अस्मिन् महाकाव्ये अङ्गीरस वीरः एव। साहित्यदर्पणे विश्वनाथकविराजेन रसानां नर्णनसन्दर्भे इत्थं उक्तं-

**उत्तमप्रकृतिर्वीर उत्साहस्थायीभावकः ।**
**महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः ।।**[8]

यतः अत्र आङ्गलशासकानां वीरगाथाः तथा तेषां विविध युद्धवर्णनं च तत्र तत्र दृश्यते। यद्यपि अङ्गीरसः वीरः , करुण, बीभत्स रसाः तत्र तत्र युद्धादि वर्णनसन्दर्भे वर्णितं दृश्यते। यथा-

**उद्भ्रान्तपौरं परिदेवनोत्क नारीजनं प्राणनिराशनाथम्।**
**विरोधिरुद्धं नगरं बभार श्रीरङ्गतां केवल एव नाम्नि।।**[9]

**वृत्तम्** -

यद्यपि ए. आर. राजराजवर्मवर्यस्य सर्ववृत्तेषु श्लोकरचनापाटवं वर्त्तते तथापि अनुष्टुप् मध्ये अस्य प्रावीण्यम् अतिविशिष्टं दृश्यते।

**स शुक्लश्यामलां क्लैवः सेनामेनां नयन् वभ।**
**कलिन्दकन्यासंभिन्नां गंगामिव भगीरथः।।**[10]

अत्र क्लैव् लैयिड् तस्य सेनां कथं नीतवान् इति वर्णयति। अस्मिन् श्लोके अनुष्टुप् छन्दः एव।

**रीतिः** -

रीयते गम्यते अनेन इति रीतिः। 'विशिष्टापदरचना रीतिः'[11] इति वामनेनोक्तं रीतिलक्षणं काव्यालङ्कारसूत्रवृत्तिनामके ग्रन्थे।पूर्वमेवोक्तं यत् ए. आर्. राजराजवर्मणः महाकाव्यं कालिदासस्य रघुवंशप्रेरणया एव कृतम्। अतः वामनोक्तं वैदर्भीरीतेः लक्षणं इत्थं वर्त्तते- 'समग्रगुणोभेदा वैदर्भी'[12]। कालिदासस्य वैदर्भीरीतिम् आश्रित्य एव अनेन महाकाव्यस्य अस्य रचना साधिता वर्त्तते। उदाहरणरीत्या यथा-

**यः पद्मकासार इवान्तरे मरोः शकोटकोडाविव केर एककः।**
**केतुत्कराकीर्ण इवाम्बरे शशि रराजतौलुष्क**
**नृपालमण्डले।।**[13]

अपरत्र अपि अक्बरविषये वर्णना वर्त्तते।

**कुमारभावेपि गुणानुरागिणी नरेन्द्रलक्ष्मीरवृणीत यं स्वयम्।**
**बहूंश्च तां लालयति स्म वत्सरान् य उत्सुकां वत्सल**
**उत्सवैर्नवैः।।**[14]

**अलङ्कारः**

राजराजवर्मा महोदयः विविधान् अलङ्कारान् यथायोग्यं महाकाव्ये संयोजितवान्। उपमा, उत्प्रेक्षा, अर्थान्तरन्यासः इत्यादि कालिदासस्य सह-दयह-दयरञ्जनोपकरणादिरूपेण प्रसिद्धाः ये अर्थालङ्काराः ते सर्वे अपि अत्रापि द्रष्टुं शक्यते।

**वसोकसारेव विसृत्वराणां नानावसूनां निलयायमाना।**
**जागर्त्ति यत्राङ्गलभूमिपानां बर्किंगामाख्यां**
**कुलराजधानीम्।।**[15]

महमूद् गस्नी बहुवारं भारतस्य उपरि आक्रमणं कृतवान्। तद्विषये यथा-

**स्थितां स्थितीं दुश्चरितैरुदच्छिनत् स्थिरस्तु संरक्ष्य न जातु**
**भुक्तवान्।**
**धूरत्तः कुमारीमिव यौतकेच्छया सद्यः फलायैव स**
**भूमिमग्रहीत्।।**[16]

[7]रघुवंशम्,1.2.
[8]साहित्यदर्पणः,3.पु.सं232.
[9]आङ्गलसाम्राज्यम्, 3.45.
[10]आङ्गलसाम्राज्यम्,3.65.
[11]काव्यालङ्कारसूत्रवृत्तिः,1.1.
[12]काव्यालङ्कारसूत्रवृत्तिः,1.2.11.
[13]आङ्गलसाम्राज्यं,2.62.
[14]आङ्गलसाम्राज्यम्,2.65.
[15]आङ्गलसाम्राज्यम्, 1.3.
[16]आङ्गलसाम्राज्यम्,2.39.

अस्मिन् श्लोके उपमालङ्कारः दृश्यते।

**समीक्ष्यकारीष्विह पूर्वगत्या अप्याङ्गलास्तत्र नवेभिषङ्के।**

**स्फुटं व्यतीयुः किल नीतिमार्गाद् गच्छन् स्खलत्येव**

**महागजोऽपि।।**[17]

एतस्मिन् श्लोके मलयाल चाटूक्त्याः (घ्र) संस्कृतीकरणं दृश्यते।

शब्दालङ्कारेषु अनुप्रासः यमकम् इत्यादीन् बहुत्र प्रयुङ्क्वान् राजराजवर्मा महोदयः

उदाः -

**क्वचिन्निलीनैः पुलिनैर्दुरापान् क्वचिद्गभीरोदरमेदुरापान्।**

**क्वचिद् कुहेलीकृतकायमानान् क्वचित्**

**प्रचण्डातपपीयमानान्।।**[18]

अत्र श्लोके प्रतिपादम् अन्त्याक्षरप्रासम्, आद्याक्षरप्रासं च द्रष्टुं शक्यते। अतः अत्र अनुप्रासम् नाम शब्दालङ्कारम्। अपरत्रापि यथा-

**मुदारमन्ती निजराजलक्ष्म्या तुदारवंशोत्तममुक्तिका या।**

**उदारभावा स्पृहयां बभूव न दारतां कस्य चनापि राज्ञः।।**[19]

**उपसंहारः**

महाकाव्यमिदं प्रारम्भे आङ्गलेयकम्पनिशासकस्य वर्णनं कृतम्। पश्चात् ब्रिट्टन् देशस्य समग्रशासनरूपेण कथं परिवृत्तम् इति अत्यन्तं सुचारुतया वर्णयति कविः। किन्तु दं काव्यं वैदेहिकादिपत्यस्य साधुताम् अङ्गीकरोति इति विमर्शकानां मतम् अपि वर्त्तते। आङ्ग्लसाम्राज्यं नाम महाकाव्यं राजराजवर्मणा ललितोचितसन्निवेशचारुणा साहित्यसौन्दर्यशास्त्रसम्प्रदायानुगुणं वर्णितं दृश्यते। इदं महाकाव्यं महाकाव्यलक्षनानुगुणं रचितम् इति विद्वत् - वरेण्यानाम् अभिप्रायः वर्त्तते। तथापि अपरे काव्यस्यास्य रचना तल्लक्षणानुगुणं न कृतमिति दोषमारोपयन्ति। वस्तुतस्तु काव्यस्य लेखने अथवा रचनायां अन्तिमवाक् तत्कर्त्तुः कवेः एव। उक्तं च ध्वन्यालोके-

**अपारे काव्यसंसारे कविरेव प्रजापतिः।**

**यथास्मै रोचते विश्वम् तथेदं परिवर्त्तते।।**[20]

अत्र ध्वनिकारेण आनन्द्वर्धनेन अपि कवेः परमाधिकारस्य कृते अथवा स्वतन्त्रतायै अधिकारः प्रदत्तः दृश्यते इति कारणात् दोषारोपणं निरर्थकमेव। अतः उत्तममहाकाव्येषु अस्यापि गणना युक्ता।

**ग्रन्थसूचिः**


1. K. H. Subrahmanian , Keralapanini and Sanskrit works, New Bharatheeya book Corporation , Delhi, -2008.
2. Devi Sulochana – Historical Survey of Sanskrit Mahakavyas, Kanishka Publishing House, Delhi.
3. R. Rajaraja Varma – Angalasamrajya, Translated by Eswaran Nampoothiri, Department of Cultural Publications, Govt. Of Kerala - 1997
4. आनन्दवर्धनः, ध्वन्यालोकम्, टिप्पणि - जगन्नाथ पाठक्, चौखम्बा विद्याभवन्, वाराणसि - पुनरमुद्रणम् 2003
5. कालिदासः, रघुवंशम् चौखम्बा कृष्णदास् अक्कादमि, वाराणसि - 2012.
6. साहित्यदर्पणम्- व्याख्यानम् , आचार्य शेषराजशर्मा, चौखम्भा कृष्णदास् अक्कादमी वाराणसी, संस्करणम् 15, 2013.
7. संस्कृतसाहित्येतिहासः, आचार्य लोकमणि दोहालः, चौखम्भा कृष्णदास् अक्कादमी वाराणसी, संस्करणम् 3, 2005.


[17]आङ्गलसाम्राज्यम्, 1.61.

[18]आङ्गलसाम्राज्यम्, 1.32.

[19]आङ्गलसाम्राज्यम्.

[20]ध्वन्यालोकः,पु.सं.530.

# अर्वाचीनसंस्कृतसाहित्ये क्षमाराव्-महोदयायाः अवदानम्

**Naba Kumar Roy**
Raiganj, Uttar Dinajpur, West Bengal, India
nabakumarroy.nkr@gmail.com


## शोधसारः

*अतिविशाले संस्कृतसाहित्ये विंशतिशतकस्य प्रमुखा कवयित्री क्षमाराव्-महोदया इत्यत्र न कोऽपि संशयः । क्षमाराव्-महोदया यद्यपि **'पण्डिता'**इत्युपाधिः एततकुटुम्वेन परम्परया प्राप्तः तथापि अन्वर्थश्च आसीत् । प्रतिभासम्पन्ना क्षमा विद्याभ्यासे अपि च भाषाभ्यासे सर्वप्रथमा आसीत् । सर्वदा विद्यार्जने दत्तादरा एषा मेट्रिकपरीक्षायां संस्कृत-आङ्ग्लभाषयोः सर्वप्राथम्यं प्राप्तवती । तदनन्तरं विल्सन्-महाविद्यालयं प्रविष्टायाः क्षमायाः गुरुः महामोहपाध्यायः भारतरत्नमिति उपाधिभूषितः पि.भि.काणेमहाभागः आसीत् । डा. राघवेन्द्रराव् इति सुप्रसिद्धेन वैद्येन सह क्षमायाः विवाहः सम्पन्नः । तदारभ्य क्षमा **'क्षमाराव्'**इति प्रसिद्धिं प्राप । भर्त्रा सह देशविदेशेषु अत्यन्त्याः क्षमायाः ज्ञानं विस्तृतं सञ्जातम् । विदेशसम्पर्केण इटालियान्-फ्रेञ्च् भाषयोः अपि नैपुण्यं प्राप्तवती क्षमा । पूर्वमेव तस्याः मराठी-गुजराती-संस्कृत-आङ्गलभाषासु नैपुण्यम् आसीत् । इत्थं सा क्षमा वहुभाषाभिज्ञा अभवत् । यदा सा स्वविद्याभ्यासं समापयामास तदा भारते स्वातन्त्र्यसङ्ग्रामः पराकाष्ठातां गतः आसीत् । गान्धीमहात्मा स्वातन्त्र्यसङ्ग्रामसेनानी भूत्वा अखिलं देशं पारतन्त्र्यात् विमोचयितुं सर्वान् प्रचोदयति स्म । प्रायशः तत्काले महात्मनः गान्धीमहोदयस्य प्रभावलये अन्तर्गतः कोऽपि भारतीयः नासीत् । क्षमापि गान्धीविचारैः तीव्रतया आकृष्टा आसीत् । तस्याः कृतिषु गान्धीजीवनं तद्विचाराश्च प्रमुखतया वर्णिताः । सत्कार्यैः समययापनं क्षमायाः स्वभावलक्षणम् आसीत् । तदा पिता उद्योगनिमित्तं प्रवासनिरतः भवति स्म तदा क्षमा काव्यरचनाध्ययनादिषु श्लाघ्यकार्येषु कालं नयन्ती आसीत् । क्षमामहाभागा जीवनान्तं यावत् काव्यस्य निर्माणे मग्ना आसीत् । सा देहत्यागात् केवलं सप्ताहात् पूर्वमेव **'ज्ञानेश्वरचरितम्'**इति महाकाव्यं समापयत । एतस्याः १२ कृतयः मुद्रिताः सन्ति । तासु **'शङ्करजीवनाख्यानम्'**, **'तुकारामचरितम्'**, **'रामदासचरितम्'**, **'स्वराज्यविजयः'**इत्यादीनि महाकाव्यानि । **'मीरालहरी'**तया विरचितं खण्डकाव्यम् ।एवं सततसंस्कृताध्यायनशीला क्षमा अस्माभिः आदरणीया अनुकरणीया च भवति ।*


दर्शनशास्त्रं यदा मनुष्याणां मानसिकः भक्तिना जातमस्ति तथैव काव्यसाहित्यं नराणां दैनन्दिनजीवनस्य सुखं दुःखं च प्रेम-प्रीतिश्च आदरमनादरं जीवनस्य सरसः नीरसश्च भावं प्रभृतेभ्यः विषयेभ्यः निर्माणं भवति । यद्यपि प्राचीना भाषा संस्कृतम् , तथापि सर्वासां भारतीयभाषाणां कृते संस्कृतभाषा जननीति । त्रिवेणीसङ्गमे सरस्वती नदी यथा अन्तर्लीना अस्ति तथैव संस्कृतभाषा सर्वासु भारतीयभाषासु अन्तर्लीना इति सर्वे स्वीकुर्वन्ति । भाषायां यथा आवेगः संवेगः संवेदना भावनायाः अभिव्यक्तिः युक्तमस्ति तथैव भाषायाः वाङ्मयरूपमपि तद्वत् समृद्धमस्ति । संस्कृतकाव्यसाहित्यं वहु कवि-महाकविना भाण्डारीकृतम् अभवत् । इत्थं काव्यसाहित्यम् आधुनिककालेऽपि वहवः कवीनां प्रभावेन सुप्रसिद्धाः सन्ति ।

संस्कृतसाहित्यसेवारतासु प्राचीनमहिलासु काश्चन एव प्रसिद्धाः भवन्ति । प्राचीनशास्त्रेषु अनेकासां कवयित्रीणां नामानि श्रूयन्ते । आधुनिकसंस्कृतसाहित्ये अपि वहवः कवयः प्रसिद्धाः सन्ति । अतिविशाले संस्कृतसाहित्ये विंशतिशतकस्य प्रमुखा कवयित्री क्षमाराव्-महोदया इत्यत्र न कोऽपि संशयः । संस्कृतगद्यकविरूपे क्षमायाः प्रसिद्धिः आधुनिकसंस्कृते अनवद्यम् । पराधीनतायाः दुःखवह्निना यदा भारतीयानां मनःसु आन्दोलनास्यौघाः प्रवलाः प्रपतितास्तदा क्षमाया हृद्यपि स्वाधीनताप्राप्त्यये वैप्लविकी प्रचेष्टा अजायत् । क्षमारावमहोदया महाराष्ट्रप्रदेशे कस्मिंश्चन विद्वत्कुटुम्वे नवत्युत्तर-अष्टादशशततमे वर्षे सप्तमे मासे चतुर्थे दिनाङ्के (४-७-१८९०) अजायत् । अस्याः पिता पण्डितः शङ्करपाण्डुरङ्गः माता च उषादेवी । क्षमाराव्-महोदया यद्यपि **'पण्डिता'**

(१९३८)इत्युपाधिः एततकुटुम्वेन परम्परया प्राप्तः तथापि अन्वर्थश्च आसीत् । क्षमायाः तिस्रः भगिन्यः चत्वारः भ्रातरश्च अभवन् । सुसंस्कृतयोः मातापित्रोः सद्गुणाः अनायासेन एव अपत्येषु अपि अनुवृत्ताः अभवन् । शङ्करपाण्डुरङ्गमहोदयस्यसंस्कृतप्रीतिः सहजा आसीत् । सा प्रीतिः तत्कालीनसाहित्ये विराजमानस्य **'आर्.जि. भण्डारकर'**इति ख्यातस्य विदुषः प्रभावेण पल्लविता । पित्रा प्रभावितायां पुत्र्यां क्षमायामपि संस्कृतप्रीतिः परमोज्ज्वला आसीत् इत्यत्र नास्ति संशयः।

प्रतिभासम्पन्ना क्षमा विद्याभ्यासे अपि च भाषाभ्यासे सर्वप्रथमा आसीत् । वाल्ये अनया अधिकः कालः **'राजकोट्'**नगरे यापितः । तस्याः पिता वाल्ये एव दिवङ्गतः । क्षमायाः वाल्यं तु सुखकरं नासीत् । शालाभ्याससमये क्षमायाः आर्थिकस्थितिः उत्तमा नासीत् । अस्याः सकाशे तदा केवलं तिस्रः शाटिकाः एव आसन् । एताभिः एव शाटिकाभिः पुनः पुनः आवृतां क्षमां दृष्ट्वा तस्याः सहाध्यायिन्यः इमां **'दरिद्रा'**इति उपहासन्ति स्म । किन्तु विद्यार्जनासक्तायाः क्षमायाः तासाम् उपहासः अवधारणयोग्यः नासीत् । सर्वदा विद्यार्जने दत्तादरा एषा मेट्रिकपरीक्षायां संस्कृत-आङ्ग्लभाषयोः सर्वप्राथम्यं प्राप्तवती । तदनन्तरं विल्सन्-महाविद्यालयं प्रविष्टायाः क्षमायाः गुरुः महामोहपाध्यायः भारतरत्नमिति उपाधिभूषितः पि.भि.काणेमहाभागः आसीत् । क्षमायाः गुरुषु विद्यालङ्कारः नगप्पशास्त्री प्रमुखः । दुर्दैवात् अस्याः विद्याभ्यासः स्थगितः अभवत् । डा. राघवेन्द्रराव् इति सुप्रसिद्धेन वैद्येन सह क्षमायाः विवाहः सम्पन्नः । तदारभ्य क्षमा **'क्षमाराव्'**इति प्रसिद्धिं प्राप। भर्त्रा सह देशविदेशेषु अत्यन्त्याः क्षमायाः ज्ञानं विस्तृतं सञ्जातम् । विदेशसम्पर्केण इटालियान्-फ्रेञ्च् भाषयोः अपि नैपुण्यं प्राप्तवती क्षमा । पूर्वमेव तस्याः मराठी-गुजराती-संस्कृत-आङ्गलभाषासु नैपुण्यम् आसीत् । इत्थं सा क्षमा वहुभाषाभिज्ञा अभवत् ।

यदा सा स्वविद्याभ्यासं समापयामास तदा भारते स्वातन्त्र्यसङ्ग्रामः पराकाष्ठातां गतः आसीत् । गान्धीमहात्मा स्वातन्त्र्यसङ्ग्रामसेनानी भूत्वा अखिलं देशं पारतन्त्र्यात् विमोचयितुं सर्वान् प्रचोदयति स्म । प्रायशः तत्काले महात्मनः गान्धीमहोदयस्य प्रभावलये अन्तर्गतः कोऽपि भारतीयः नासीत् । सूक्ष्मसंवेदिनां पुरुषाणां स्वातन्त्र्यसङ्ग्रामभूमिप्रवेशः परमश्रेष्ठं कर्तव्यम् एव आसीत् । क्षमापि गान्धीविचारैः तीव्रतया आकृष्टा आसीत् । भारतं पारतन्त्र्यात् विमोचयितुं **'भूमिमवतीर्णः देवः एव गान्धी'**इत्येव क्षमायाः दृढनिश्चयः आसीत् । तस्याः कृतिषु गान्धीजीवनं तद्विचाराश्च प्रमुखतया वर्णिताः । तस्मिन्नेव समये गान्धीमहोदयं सा सावरमती आश्रमे दृष्टवती ।

विश्वसाहित्ये मानवतया मानवानां सेवायां सर्वदा नियुक्तवान् पण्डिता क्षमा । सा आङ्गल-हिन्दी-संस्कृतभाषामाध्यमेन आधुनिकसमाजस्य अशिक्षा , वाल्यविवाहः , सतीप्रथा , धर्मीयानुशासनप्रभृतीनां दूरीकर्तुं चेष्टयति । तस्याः **'कथापञ्चकम्'** **'ग्रामज्योतिः'** च पद्यमयलघुकथासंग्रहे वर्तमानकालस्य विविधदिकं प्रकाशयति । ग्राम्यमनुष्याणां दुर्दशा , विधवानां संकटमयजीवनं प्रकाशयति तस्याः काव्ये । तस्याः भाषा प्रसादमयी , तस्याः रचनायां जात्यापेक्षा मानवानां मनुष्यत्वं अधिकगुरुत्वपुर्ण स्थानमधिकरोति ।

सत्कार्यैः समययापनं क्षमायाः स्वभावलक्षणम् आसीत् । तदा पिता उद्योगनिमित्तं प्रवासनिरतः भवति स्म तदा क्षमा काव्यरचनाध्ययनादिषु श्लाघ्यकार्येषु कालं नयन्ती आसीत् । क्षमामहाभागा जीवनान्तं यावत् काव्यस्य निर्माणे मग्ना आसीत् । सा देहत्यागात् केवलं सप्ताहात् पूर्वमेव **'ज्ञानेश्वरचरितम्'**इति महाकाव्यं समापयत । एतस्याः १२

कृतयः मुद्रिताः सन्ति । तासु **'सत्याग्रहगीता'**, **'शङ्करजीवनाख्यानम्'**, **'तुकारामचरितम्'**, **'रामदासचरितम्'**, **'स्वराज्यविजयः'**इत्यादीनि महाकाव्यानि । **'मीरालहरी'**तया विरचितं खण्डकाव्यम् ।

**रचनावली :**

**काव्यम्** - सत्याग्रहगीता (१९३२), उत्तरसत्याग्रहगीता (१९४४), उत्तरजयसत्याग्रहगीता, स्वराज्यविजयः (१९६२), मीरालहरी (१९४४), शङ्करजीवनाख्यानम् (१९३९), विचित्रपरिषद्यात्रा (१९३९) ।

**महाकाव्यम्** - तुकारामचरितम् (१९५०), श्रीरामदासचरितम् (१९५३), श्रीज्ञानेश्वरचरितम् (१९५४) ।

**लघुकथा** - ग्रामज्योतिः (१९५५), कथापञ्चकम् (१९३४) , कथामुक्तावली (१९५४) ।

पण्डिता क्षमाराव् तस्याः**'कथामुक्तावली'** लघुकथाग्रन्थे आधुनिकगद्यस्य नियमनीतिः दृष्टिपातं करोति, अपि च वर्तमानसमस्याः प्रस्फुटयति । एतद् व्यतिरेकं तस्याः ग्रन्थे सत्यम्, धर्मः, दया, ममता, त्यागादिभावंप्रकाशयति।

**'विचित्रपरिषद्यात्रा'** नामके लघुपुस्तके अन्ते संस्कृतप्रचारविषये तया एवं प्रार्थ्यते –

**"संस्कृताधीतिनः सन्तु सर्वे भारतभूमिजाः ।**
**संस्कृतेनैव कुर्वन्ति व्यवहारं परस्परम् ।।**
**संस्कृतज्ञानमासाद्य संस्कृताचारवृत्तयः ।**
**सर्वतः संस्कृतीभूय सुखिनः सन्तु सर्वतः ।। "** [१]

**'कथामुक्तावली'**ग्रन्थे सर्वेषु चरित्रेषु आधुनिकसमाजस्य प्रतिच्छविः प्रकाशयति । १९५४ तमे वर्षे सा कवयित्री अमृतालोकं गता । तस्याः **'ग्रामज्योतिः'**इति कथाकाव्यं १९५४ तमे वर्षे **'जी. सी. चटर्जी एण्ड कम्पनीतः'**प्रचरद्रूपतां गतम् । क्षमराव्-महोदयायाः उदारानैतिक-विचारशील-युक्तिवादीदृष्टिभङ्गी सर्वेषां समीपे दृष्टिम् आकर्षति । एवं सततसंस्कृताध्यायनशीला क्षमा अस्माभिः आदरणीया अनुकरणीया च भवति । अतः अर्वाचीनसंस्कृतसाहित्ये आधुनिकमहिलाकविरूपे क्षमाराव्-महोदयायाः अवदानम् अतुलनीयम् इति शम् ।

**सुत्रनिर्देशः –**

१. **'विचित्रपरिषद्यात्रा'** नामके लघुपुस्तके अन्ते संस्कृतप्रचारविषयेश्लोकोऽयम् ।

**सन्दर्भग्रन्थपञ्जी -**

१. बैरवा, डा.घनश्याम(२०१९) . आधुनिक संस्कृत साहित्य और संस्कृत पत्रकारिता. भारतीय विद्या प्रकाशन, दिल्ली ।

२. कुमारी, मैत्रेयी (२०१७) . आधुनिक संस्कृत साहित्य .विद्यानिधि-प्रकाशन, दिल्ली

३. घोषालः, वनविहारी (२०१९)अर्वाचीन-संस्कृत-साहित्यस्य-इतिहासः(१८०१-२०१९) पवन-ग्राफिक्स , पाण्डापाडा, जलपाइगुडि - ७३५१०१

४. यादव, डा.राजमङ्गल . (२०१७). आधुनिक संस्कृत साहित्य संग्रह. जे. पि. पावलिकेशन, विजयादा, अन्ध्रप्रदेश

५. भट्टाचार्य्य, पण्डित हेमचन्द्र (१४१८).समग्र व्याकरण कौमुदीचलन्तिका प्रकाशक , कोलकाता ।

६. शास्त्री, चारुदेव (१६६६)व्याकरणचन्द्रोदय . मोतीलाल वनारसी दास , दिल्ली ।

७. पाण्डेय, डॉ.मिथिलेश(२०१९) संस्कृत उपकार प्रकाशन, आगरा-२ ।

# विंशतिशतकीय कैरलीयसंस्कृतमहाकाव्यानां सामान्यस्वभाव:एकम् सामान्यमवलोकनम्

**ओ. एम् गङ्गा**

मद्रपुरि संस्कृतमहाविद्यालय:, मयूरपुरि, चेन्नै

## शोधसारांशः

*विंशतिशतके केरलदेशात् ससमुद्भूतानां केषाञ्चनकाव्यानां सामान्य स्वभावः किमित्यवलोक्यते। ए आर् राजराजवर्मणः आइगलसाम्राज्यम् प्रोफ. बालरामपणिक्कर् महोदयेन प्रणीत: श्रीनारायणविजयः, के एन् एषुतच्छन् महोदयेन प्रणीतं केरलोदयम्, पि सि देवस्य महोदयेन रचितं क्रिस्तुभागवतम् मुतुकुलम् श्रीधरन् महोदयेन प्रणीतं नवभारतम्, सि वि वासुदेवभट्टतिरि महोदयेन प्रणीतः भारतेन्दुः, पि के नारायणपिळ्ळै महोदयेन प्रणीत: विश्वभानुः च अत्र अवलोकनार्थम् स्वीकृतानि विंशतिशतकीयमहाकाव्यानि। केरलदेशे तदानींतनकालस्य देशस्य च स्वभावेन काव्यलेखने नूतनाशयाः समाविष्कर्तुम् प्रयतितवन्त: तत्कालिकमहाकवयः। परम्पराप्रोक्तसर्गबन्धादिलक्षणयुक्तमहाकाव्यानि तथापि ते सर्वे एवं मातृका रूपेण स्वीकृतवान्तः।अत: एव प्रारम्भे हिमालय वर्णना, एवं कुमारसम्भवादि काव्यस्य प्रथमपद्यमिव प्रारम्भश्लोकरचना च तत्र द्रष्टुम् शक्यते। नवीनाशयस्वीकारे दतश्रद्धाः ते काव्यरचनायां पूर्वकालिकमहाकाव्यानां अनुकरणरीत्या एव रचनामकुर्वन् इति अवगम्यते।स्वातन्त्र्यप्राप्तिः प्रादेशिकनेतृणां नेतृपाटवश्च तत्कालिककाव्यानां, विषयत्वेन परिणतः। अत: अस्मिन् काले समुद्भुतानि काव्यानि इतिवृतचयने एव विशेषतां भजन्ते।*

संस्कृतभाषाया: प्रचरणे प्रसारणे च केरलदेशस्य योगदानम् विशिष्टं वर्तते। संस्कृतभाषायाम् आधुनिककाले नूतनकाव्यानाम् आविर्भाव: अस्ति वा इति केचन पृच्छेयु:। तदर्थं उत्तम निदर्शनरूपेण विद्यमानाः केरलदेशात् विंशतिशतके प्रकाशिता: संस्कृतग्रन्था: वर्तन्ते विशिष्य साहित्य ग्रन्था:। तेषु ग्रन्थेषु विषयचयने कालानुसृतम् परिवर्तनम् किमिति सामान्यतया अवलोकयितुमेव पत्रमिदम् लक्षीक्रियते। वस्तुत:, केरलदेशादिति न, भारतस्य विभिन्नदेशादपि आधुनिककालेपि काव्यानां उत्पत्तिः सम्प्रचलति इत्यवगन्तुं शक्यते। तथापि अत्र विषयविस्तरात् केरलदेशे तत्काले समुद्भूतानां महाकाव्यानां सामान्यस्वभावविचारे प्रवेष्टुमीहे।

महाकाव्यानां सामान्यस्वभाव: समानमेव भवति, किन्तु अत्र क: विशेष: इति चेत् विंशतिशतकीयमहाकाव्यानां तत्पूर्वकालिकमहाकाव्यानां च मध्ये केचन भिन्नस्वभावा: सन्ति ।भिन्नस्वभाव: नाम स्वरूपे विषयस्वीकरणे च तच्च तत्कालिक सामाजिक राष्ट्रनैतिकविचाराणां च प्रभावेनेति काव्यविषयावलोकनेन अवगन्तुमर्हति।एवं च "सर्गबन्धादि" लक्षणसमन्वितापेक्षया विषयगौरवात् स्वरूपऔन्नत्यात् च महाकाव्यतां प्राप्तानि एव अनेकानि काव्यानि। अत: अत्र पत्रे प्रस्तूयमानानाम् समेषामपि काव्यानाम् महाकाव्यलक्षणसमन्वयत्वम् कर्तुम् न शक्यते चेदपि तेषां महाकाव्यत्वप्रसिद्धिरस्ति पण्डितानां मध्ये एवं सामाजस्य कालानुसृतं परिवर्तनं दृश्यते इत्यत: संस्कृतभाषायामपि अस्माकं सामाजिकराष्ट्रीयप्रतिफलनम् भाषाया: प्रासङ्गिकताम् बोधयति।

सामान्यतया महाकाव्येषु इतिहासकथोत्भूतं इतिवृत्तं स्वीक्रियते। महाकाव्यलक्षणनिरूपणावसरे- "इतिहासकथोत्भूतं इतरद्वा सदाश्रयं..."[1] इत्युच्यते चेदपि सदाश्रयानि काव्यानि स्वतन्त्र्य पूर्वभारते विरलानि भवन्ति। बुद्धचरितम्, सौन्दरनन्दम् च अस्मिन्नेव

सदाश्रयेतिवृत्तस्वीकृते काव्ये चेदपि तस्मिन् गणे समुद्भूतानि महाकाव्यानि तस्मिन् काले अल्पसंख्यकान्येव। तथापि २० शतकीय केरलदेशात् समुद्भूतानि संस्कृतकाव्यानि प्रायः सदाश्रयानि इति वक्तुम् शक्यते। एवं च महाकाव्यलक्षणसमन्वयापेक्षया आधुनिकविषयसमावेशः अपि तत्कालिक संस्कृतमहाकाव्येषु अवलोकयितुम् शक्यते।

## आङ्गलसाम्राज्यम्

ए आर् राजराजवर्मणः आङ्गलसाम्राज्यम् नामक महाकाव्यम् इतिवृत्तवशात् नूतनम् विषयं प्रतिपादयति। आङ्गलदेशिकैः प्रशासितस्य भारतदेशस्य चरितमेव अस्मिन् प्रतिपाद्यविषयः।

काव्यस्य रचनापद्धतिः संस्कृतमहाकाव्यानां पारम्पर्यपद्धतिम् आश्रित्यैव कृतम् वर्तते। काव्यारम्भे लण्ड्न् नगरवर्णनया आरभ्यते इत्यतः नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः इत्यादि वाक्येन सूचित नगरवर्णना एवं वस्तु निर्देशः एव अस्य मुखम्।

कुमारसम्भव श्रीकृष्णाविलासादि काव्यं स्मारयति अस्य प्रथमश्लोकः-

अस्ति प्रशस्तेष्वतलान्तिकाब्धि क्षिप्तेषु विष्वक् पुरमाङ्गलेषु।

तिंसानदीतीरवतंसभूतं भूमण्डनं लण्डननामधेयम् ।।[2]

अत्र विषयस्वभावतः आङ्गलपदानां अनुवादकरणं कवेः कर्तव्यमासीत्। एवं तत् तत् पदस्य तत्समाङ्गलपदस्य निर्देशः अपि काव्ये दत्तमस्ति। अतः आधुनिककाव्यरचनायां नूतनसङ्केतस्य प्रयोगसमये संस्कृतानुवादः श्रमकरः एव।एवं च आङ्गलसाम्राज्यम् नूतनविषयप्रतिपादकं चेदपि कालिदासादिकवीनां परम्परामनुसृत्य निर्मितमेवेति न संशयः।

## श्रीनारायणविजयः

देशे प्रसिद्धस्य सामाजिकपरिष्कर्तुः एवं अद्वयवादिनः श्रीनारायणगुरोः चरितमेव काव्येस्मिन् प्रतिपादयति। प्रोफ. बालरामपणिक्कर् महोदयेन काव्यमिदम् आरचितम्। एकविंशतिसर्गात्मके काव्ये अस्मिन् केरलस्य तत्कालिकसामाजिकजीवनम् 1551 श्लोकेषु वर्णितमस्ति।। संस्कृतसाहित्य ग्रन्थेषु सामान्यया दृश्यमान राजादिकथनात् अन्य देशवासिनां जीवनम् अस्मिन् द्रष्टुम् शक्यते इत्येव अत्र वैशिष्ट्यम्। तिरुवनन्तपुरीदेशस्य वर्णनया काव्यरचना आरभ्यते इत्यतः काव्यरचनायां स्वीक्रियमाणपरम्परा रातिः न अत्यजत् कविः इत्यनुमातुम् शक्यते। ततः तत्र समीपस्थस्य चेम्बषन्तीदेशस्य वर्णनया तत्र वासं कुरवतोः नारायणगुरोः मातापित्रोः वर्णनया काव्यं अग्रे सरति। काव्यनायकस्य अध्ययनादि विषयमारभ्य स्वगृहपरित्यागादि विषयः बुद्धचरितम् स्मारयति। ततः तेषां सुब्रह्मण्यभक्तिः एवं वर्णधर्मनिरासादयः अरुविप्पुरं देशे दर्पणप्रतिष्ठादयः काव्ये वर्णितानि सन्ति।

## केरलोदयम्

परशुरामकृतकेरलोत्पत्तितः आधुनिक केरलदेशस्य अर्थात् प्रादेशिकदेशराज्यरूपेणविभक्तस्य कोच्चि, तिरुवितांकूर्, मलबार् इत्येतेषां समाहारेण एकराज्यरूपेण केरलस्य अधुनातनरूपेण परिवर्तनपर्यन्तं कथा एव अस्य काव्यस्य प्रतिपाद्यविषयः। एकविंशति सर्गाः पञ्च मञ्जरीषु विभक्ताः। अत्रापि काव्यरचनायां स्वीकृतेतिवृत्तं तावत् देशचरितम् एव प्रादेशिकजनानां च जीवनमेवेति इतिहासकथातः भिन्नमेव एवं केवलसज्जनचरितं च न इत्यत्र

वैभिन्यम्। किन्तु परम्पराप्रोक्तमार्गात् भिन्नं मार्गं पूर्णतया स्वीकर्तुं कवे: श्रम: न पूर्ण: यत: परशुरामस्य ऐतिह्यम् त्यक्त्वा काव्यम् कर्तुम् न प्रवर्तितवानयं कवि:। तथापि देशस्य राष्ट्रिय सामाजिक जीवनस्य प्रतिफलनम् स्वकाव्यदर्पणे दर्शयितुम् कवे: यत्न: श्लाघनीय: एव।

**क्रिस्तुभागवतम्**

पि सि देवस्य महोदयेन रचितं क्रिस्तुभागवतमपि विंशति शतके केरलदेशे संभूतमहाकाव्येषु प्रसिद्धमेव। क्रिस्तु धर्मस्य प्रतिपादनम् भागवतरचनारीत्या, कथाकथनरीत्या सम्पादितम् इत्येव अत्र वैशिष्ट्यम् वर्तते। अत्रापि एकैकसङ्गस्य तत् समपदस्वीकरणं कवे: कृते दुष्ल्करम् एव। तथापि सुकरम् साधितं च। एतादृशविषयस्वीकार: संस्कृतभाषाया: सार्वत्रिक- स्वीकार: केरलदेशे तदानीं अस्ति इत्यपि बोधयति। एवं काव्यस्य नूतापन्था: अन्विषन्ति कवय: इत्यपि एतत् बोधयति।

" जगत्पतिं गोकुलमर्चितुं
विपश्चित: संचरतो निनाय या।
पुनश्च काव्याध्वनि मे विराचतां
समुज्ज्वला सैव शुभाय तारका॥ " [3]

इत्यारब्धम् काव्यमिदम् आरम्भे शिशुपालवधकाव्यस्य रीतिमेव स्वीचकार इत्यत्र न संशय:

**नवभारतम्**

अष्टादशसर्गात्मकम् काव्यमिदं स्वतन्त्रभारतस्य अर्थात् नवभारतस्य चरितम् प्रतिपादयति। अत्र देशस्य सामाजिकं आर्थिकं राजनैतिकं कार्यम् प्रतिपादितमस्ति। विषिष्य प्रथमप्रधानमन्त्रिण: जवहर्लाल् नेह्रु महाभागस्य नेतृपाटवं अस्मिन् वर्णितमस्ति। काव्यस्य रचनापद्धति: महाकाव्यस्य चेदपि काव्यस्य इतिवृत्तम् नवभारतनिर्मिति: इत्यत्र: पूर्वकालिककाव्यात् वैभिन्यं प्रकटयति।तथापि हिमालयवर्णानया एव काव्यस्य आरम्भ: इत्यत: काव्यलेखने परम्परा प्रोक्तमार्गमेव कवि: अनुसरति। तस्मात् बहिरागन्तुं नप्रयतते इत्यवगच्छति। यथा- अस्ति श्रीमान् गिरिश्रेष्ठ: पावनात्मा हिमालय:। मध्यस्थो भूतधारिण्या: स्वर्गसन्देशवाहक:॥

**विश्वभानु:**

पुत्तलत्तु कृष्णनारायणपिल्ला महोदयेन एकविंशतिसर्गात्मके अस्मिन् काव्ये स्वामि विवेकानन्दस्य चरितम् वर्णयति। नरेन्द्रस्य बाल्यकथात: अस्य आजीवनकथापर्यन्तं वर्णितं काव्यमिदम् तेषां जीवनचरैतमिव भवति। बुद्धचरितस्य कथा इव अत्रापि काव्यनायकस्य विवेकानन्दस्य जन्मत: समाधिपर्यन्तं कथा एव अत्र प्रतिपाद्य विषय:।

**भारतेन्दु:**

सि वि वासुदेवभट्टतिरि महोदयेन प्रणीतं काव्यमिदं द्वादशसर्गात्मकं भवति। अत्रापि काव्ये सच्चरितमेव प्रतिपाद्यम् भवति। अत्र काव्यनायक: अस्माकं राष्ट्रपिता एव।

इष्टदेवतानमस्कारेण एव काव्यारम्भ:। सामान्यतया इतरसं स्कृतमहाकाव्यत: वैभिन्यं अस्मिन् दृष्टुम् न शक्यते।

**उपसंहार:**

विंशतिशतके केरलदेशे तदानींतनकालस्य देशस्य च स्वभावेन काव्यलेखने नूतनाशया: समाविष्कर्तुम् प्रयतितवन्त: तत्कालिकमहाकवय:। तथापि ते सर्वे परम्पराप्रोक्तसर्गबन्धादिलक्षणयुक्तमहाकाव्यानि एव मातृका रूपेण स्वीकृतवान्त:।अत: एव प्रारम्भे हिमालय वर्णना, एवं कुमारसम्भवादि काव्यस्य प्रथमपद्यमिव प्रारम्भश्लोकरचना च तत्र द्रष्टुम् शक्यते। नवीनाशयस्वीकारे दत्तश्रद्धा: ते काव्यरचनायां पूर्वकालिकमहाकाव्यानां अनुल्करणरीत्या एव रचनामकुर्वन् इत्येवावगम्यते अवलोकनेन।

---

1. काव्यादर्श:, दण्डी, चौखम्बा विद्याभवनम्, वारणासि,1991 p.no: 17
2. आङ्गलसाम्राज्यम्- प्रथम सर्ग:, प्रथमश्लोक:
3. क्रिस्तुभागवतम्, प्रोफ. पि सि देवस्य,जयभारतम्, तिरुवनन्तपुरम्, , 1977, P.no1

## Reference


1. *आङ्गलसाम्राज्यम्*, ए आर् राजराजवर्मा, डिपार्ट्टेन्ट् ओफ् कल्चरल् पब्लिक्केषन्स्, केरलसर्वकार:, तिरुवनन्तपुरम्,1997
2. *काव्यादर्श:*, दण्डी, चौखम्बा विद्याभवनम्, वारणासि,1991
3. *क्रिस्तुभागवतम्*, प्रोफ. पि सि देवस्य,जयभारतम्, तिरुवनन्तपुरम्, , 1977
4. केरलोदयम्, के एन् एषुत्तच्छन्,पब्लइक्केषन् डिप्पार्ट्टेन्ट्, केरलसर्वकार:, तिरुवनन्तपुरम्,1972
5. *नवभारतम्*, मुतुकुलम् श्रीधरन्, ग्रन्थकारेण प्रसिद्धीकृतम्,चेन्नित्तला,1978
6. भारतेन्दु:, सि वि वासुदेवभट्टतिरि:, श्री बुक्स् , कोच्चि,1991
7. *विश्वभानु*, नारायणपिळ्ळै पि के, कोलेज् बुक्क् हौस्, तिरुवनन्तपुरम्,1980
8. *श्रीनारायणविजयम्*, प्रोफ. बालरामपणिक्कर्,ग्रन्थकारेण प्रसिद्धीकृतम्,तिरुवनन्तपुरम्, 1971

# विंशति-एकविंशति-शताब्धीय-कर्णाटकसङ्गीते संस्कृतसाहित्यम्

**R. Rajalakshmi**

The Madras Sanskrit College, Chennai

**शोधसारांशः**

***साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविशानविहीनः*** इति महताम् उक्त्यनुसारेण, साहित्यं सङ्गीतज्ञानं च अत्यावश्यकं भवति । वेदकालादेव सहित्यसङ्गीतसंयोगः भवति एव । यथा - वेदानां उदात्त-अनुदात्त-स्वरित-स्वराणि वर्तन्ते इत्ययं प्रमाणः । अपि च, लौकिके, साहित्यं विना, सङ्गीतस्य पूर्णानुभूतिः न शक्यते । सङ्गीतस्य मुख्यलक्ष्यं, नादोपासनया मोक्षसाधनम् । सकलजनैः केवलम्, रागगानेनैव एतत् न साध्यम् । साहित्येन एव नादोपासनायाः रुचिः अभिवर्धते । महनीयाः सङ्गीतत्रिमूर्तयः अपि, स्वस्य श्रेष्ठसाहित्यैः सहितेन नादोपासनया, मोक्षं प्राप्ताः इति सत्यवृत्तान्तानि सन्ति । एवं, विंशति - एकविंशति-शताब्धे, अनेकाः विद्वज्जनाः स्वस्य उत्तमसाहित्यैः जनान् आकर्षयन्ति । सर्वेषां मनसि भक्तिं वर्धयन्ति । अर्थात् भगवति चित्तं नयन्ति, सर्वदा परमात्मनि मनः स्थापयितुं सहाय्यं कुर्वन्ति । एतादृशाः वाग्गेयकाराः के? तेषां गीतानां साहित्यवैशिष्ट्यं किम्? इत्यादयः, तेषां कृतीनां उल्लेखनैः सह पर्यालोचनं, विंशति-एकविंशति-शताब्धीय-कर्णाटकसङ्गीते संस्कृतसाहित्यम् इति पत्रेऽस्मिन् दृश्यते ।

संस्कृतसाहित्यस्य सङ्गीतस्य च सम्बन्धः वेदकालादारभ्य अद्यतनकालपर्यन्तं वर्तते । वैदिकसाहित्ये, समवेदस्य सामानि पञ्चस्वरैः उद्गायते । लौकिकसाहित्ये, गीतगोविन्दादीनि अनेकानि काव्यानि रागयुक्तानि एव कृतानि । अद्यतने अपि भागवताः तान् रागान् एव आचरन्ति । ततः सङ्गीतत्रिमूर्तयः श्रीत्यागराजः, श्रीमुत्तुस्वामिदीक्षितः, श्रीश्यामाशास्त्रिः संस्कृतभाशायां स्वकृतीः रचितवन्तः । विशेषतः मुत्तुस्वामिदीक्षितः स्वकृतीः संस्कृतभाशायामेव रचितवान् । ततः परं विंशति - एकविंशतितम शताब्धस्य अनेकाः वाग्गेयकाराः संस्कृतभाशायां विविधगीतानि रचितवन्तः । एतेषां विंशति - एकविंशतितम शताब्धीय - वाग्गेयकारैः कृतेषु सङ्गीतगीतेषु कानिचित् उदाहरणानि उद्धृत्य, कर्णाटकसङ्गीतक्षेत्रे संस्कृतस्य शोभा कथं भवति इति पश्यामः ।

**गू. ना. बलसुब्रह्मण्यन् ( १९१० – १९६५ )**

एषः अतीव विख्यातः गायकः वाग्गेयकारः च । एषः संस्कृत - आन्ध्र - द्रविड - भाषायां गीतानि रचितवान् । अस्य संस्कृतगीतानि विशिष्टानि, प्रासानुप्रास - अन्त्यानुप्रासैः सुन्दरतया सृष्टितानि ।

अनुप्रासः यथा -

***रागम्– काम्भोजी ताळम् – त्रिपुट***

***पल्लवि -: महा त्रिपुरसुन्दरि माम् पाहि महादेव मनोहरि माम् पाहि***

***अनुपल्लवि -: महादिशय सौन्दर्य सेवती महाराज्ञी मा रमण सोदरि***

***चरणम् -: महा मन्त्र यन्त्र तन्त्र रूपिणी महामाया पाश विमोचनि***

***महा साम्राज्य शालिनी मानिनी महा कैलास वासिनि मनोन्मणि*** (1)

अन्त्यप्रासः यथा –

***रागम् – हिन्दोळ ताळम् – रूपक***

***पल्लवि -: सामगान लोले सुललित गुणजाले अम्ब***

***अनुपल्लवि -: सोम बिम्ब वदने निस्-सीम महिम सरणे सामज मृदु गदने काम दान निपुणे***

***चरणम् -: कोमळाङ्ग कामेश्वर वाम भाग सदने नाम भजित साधुजन पाप कूट मदने***

***तामसादि गुण कल्पित तापत्रय शमने तेम दयारस पूरित धाम कमल नयने अम्ब*** (2)

*सुजन मानस हम्सानन्दिनि* (3)इति कृतौ - सुजनानां मानसहंसस्य आनन्दकारिणि इत्येषां पदेषु, *'हंसानन्दि'* इति रागमुद्रामपि सामर्थ्येन अन्तरीकृतवान् । यथा हंसपक्षि जलं क्षीरं च भिन्नं कर्तुं समर्थः, तथैव, सुजनाः सत् असत् इति भेदम् अवगम्य, असद्विषयानि उत्सृज्य, सद्गुणयुक्तः भवन्ति । एतादृशस्य सुगुणयुक्तसुजनस्य मनः स्वकरुणाकृपया आनन्दयति इति एवं विशेषार्थः अवगम्यते ।

**मायूरम् विश्वनाथ शास्त्रिः ( १८९३ – १९५८ )**

एषः संस्कृतपण्डितः वेदाध्यायी च अस्ति । संस्कृतभाषायाम् अनेकानि गीतानि रचितवान् । बालजनानां प्रार्थनानिमित्तं माता, पिता, गुरु, सुर्य, चन्द्रान् अधिकृत्य ***'बालपञ्चरत्नम्'***इति पञ्चकृतयः रचितवान् । एतेषु 'जयति जयति भारतमाता' इति गीतम् अतीव प्रसिद्धम् ।

***रागम् – कमास् ताळम् – रूपकम्***

***पल्लवि -: जयति जयति भारत माता बुध गीता***

***अनुपल्लवि -: निखिलमता वननिरता नतजन सुहिता जयति (जयति)***

***चरणम् १ -: सकल जीव समता साधु साधु विदिता अखिल लोक प्रथिता परमानन्द समुदिता (जयति)***

***चरणम् २ -: अगणित गुण शीला अति दयाल बाला प्रकटित शुभ जाला पतित प्राण लोला (जयति)***

***चरणम् ३ -: पण्डित परि पूजिता पाप सङ्घ विवर्जिता खण्डित खल चेष्टिता अखण्ड देश वेष्टिता (जयति)*** (4)

बालनां युवानाञ्च मध्ये देशभक्तिप्रेरणार्थम् उत्साहनार्थं च १९४७ तमे वर्षे शास्त्रिणः अष्टादश देशभक्तिगितानि सम्मिलित्वा, ***'भारतभजनम्'***इति नाम्नि प्रसारितवान् । अस्य गीतेषु अन्त्यप्रासः अत्यद्भुतः जनरञ्जकः च भवति । अस्य भाषा सरला, सुलभैव अवगन्तुं योग्या च भवति । यथा-

***रागम् – पीलु ताळम् – आदि***

***पल्लवि -: मनुज कुलाभरणम् गान्धी महान्तमिह शरणम् व्रजेऽहम्***

***अनुपल्लवि -: अनुजन सेवित अद्भुत चरणम् आर्तिहरणम् अभय करणम्***

***चरणम् १ -: निरुपम गुण कोशम् निगदित निगम सदुपदेशम् परिहृत परजन बन्धन पाशम् पूरिताशम् परिजनेशम्***

***चरणम् २ -: सत्याग्रहमूलम् सुतराम् शमदम परिपालम् नित्याश्रित हरिनाम निखेलम् निभृतकालम् नियमनीलम्***

***चरणम् ३ -: सुन्दर शुभ हासम् सततम् सुकृत मुख विलासम् नन्दन वाङ्मयम् निर्मल भासम् निज विश्वासम् निखिल दासम्*** (5)

**राजा जयचामराजेन्द्र उडयार् (१९१९ – १९७४)**

एषः मैसूर्राजवंशीयः, सङ्गीतविद्वान्, नूतनराजजनकः, संस्कृतपण्डितः च । सः प्रायेण श्रीमुत्तुस्वामिदीक्षितस्य शैलीम् पालयित्वा, स्वकृतीः रचितवान् । यथा -

***रागम् – भुवनगान्धारि ताळम् – त्रिपुट***

***पल्लवि -: भुवनेश्वरि भुवन मनोहरि भुवनगान्धारि त्रिपुर सुन्दरि***

***अनुपल्लवि -: भूरादि लोक व्यापिनि भुवन मोदिनि विश्व विनोदिनि***

***शिव शक्ति कान्ते शिव काये शिव जाये शिवार्धमूर्ते***

***चरणम् -: महादेवादि सम्सेविते महागणपति गुहेश सहिते***

***अनाहितादि शङ्ग-कमलान्त स्थिते अखण्डैक दशवाद भरिते***

***अकचटतपायसादि वर्णैकरि प्रकाशिनि शिवे श्री बाले***

*अणिमादि अधृष्ट सिद्धि शक्त्यात्मक नवावर्णे श्रीमदादि विद्यो मक ध्वम्सक मुरहरे मनोरञ्जके ललिताम्बिके* (6)

अतः एतस्य कृतयः अपि श्रीमुत्तुस्वामिदीक्षितवत् नारिकेलपाकसमाः भवन्ति । अस्य भषा निपुणा गभीरा च । यथा -

*रागम् – नादनामक्रिया ताळम् - मिश्र झम्प*

*पल्लवि -: शिव शिव शिव भो महादेव शम्भो शिवा रमण ममापराधम् क्षमस्व (शिव)*

*अनुपल्लवि -: सर्व सर्वानन्दकर अखिलाण्ड प्रभो – भव सागर तारक अक्षयलिङ्ग विभो (शिव)*

*चरणम् -: नमस्ते स्थाणो प्रळय काल जगद्रक्षक मामक चमक प्रकटित रुद्र सूक्त तोशक*

*कामारे त्रिपुरारे कुम्भोद्भव नुतिपात्र कामेश्वरि वल्लभ कुबेर मित्र ( मध्यम कालम् )कपालि कालभैरवी त्रिविख्यात श्री विद्या विनुत नादनामक्रिय तोषित (शिव)* (7)

एषोऽपि स्वरागमुद्राम् अनायासेन अतिसुन्दरतया मेलयति । यथा श्रीजालन्धरम् नाम्नि कृतौ, *"पुरन्दरादि सन्नुत गम्भीरनाट्य प्रदर्शक नागलिङ्गम्* " (8) - अत्र 'गम्भीरनाट' रागमुद्रा भवति ।

**कल्यानि वरदराजन् ( १९२३ – २००३ )**

संस्कृतविदुषी सङ्गीतमेधा एषा, प्रायेण स्वकृतीः संस्कृतभाषायाम् एव कृतासीत् । तस्याः पिता संस्कृताध्यापकः, मातासङ्गीतपण्डिता आस्ताम् । अतः साहित्यसङ्गीतस्य अभिरुचिः बाल्यकालादेव सुलभतया एतस्यै आसीत् इति विषये कोऽपि आश्चर्यः नास्ति । अस्याः शैली सरला, अपि च गभीरा नैपुण्या चासीत् । एतस्याः गीतेषु, प्रायेण, अनुपल्लवि भागे मध्यमकालसाहित्यः भवति । यथा -

*रागम् – आभोगि ताळम् – आदि*

*पल्लवि -: चण्डिकेश्वरीम् आश्रयाम्यहम् शार्वरीम् शुभाम् श्रितावनक्रिया विशारदाम्*

*अनुपल्लवि -: चण्ड किरण सम मण्डिताम् श्री चामुण्डेश्वरीम् शङ्कर प्रियकरीम्*

*( मध्यमकाल ) मृगराज वाहनीम् मृडाणीम् मृगाङ्ग शेखरीम् शार्वाणीम्*

*मृगमध्याम् मदरिपु मोहिनीम् सुरनर परिपालिनीम् शुभाङ्गीम्*

*चरणम् -: कनक दुर्गाम् कल्याणी देवीम् घन श्याम गात्रीशम् शाम्भवीम्*

*वनजाप्त कुलाधिप सोदरीम् जनन मरण भय हारिणीम्* (9)

**म. बालमुरलीकृष्णा ( १९३० – २०१६ )**

एषः अतिविख्यातः गायकः. अपि च, वाग्गेयकारः, नूतनरागजनकः, सकलकलाभाषानिपुणः च, प्रायेण आन्ध्रसंस्कृतभाषयोः गीतानि रचितवान् । एषः तृतीय - चतुर्थी विभक्तिकृतीः अपि रचितवान् ।

तृतीया विभक्तिकृतिः यथा –

*रागम् – माररञ्जनि ताळम् – त्रिपुट*

*पल्लवि -: रामापतिना रक्षितोहम् हिमात्मजा-पतिनुतेन श्री*

*अनुपल्लवि -: समीरजादि भक्तनुतेन हिमाम्शु वदनेन*

*चरणम् -: कामकोटि सुन्दरेण कामितार्थ फलदेन नागतल्प शयनेन*

*खगारुढेन नगधरेण मुरळीगान सुधाप्रियेन माररञ्जित मानसेन* (10)

चतुर्थी विभक्तिकृतिः यथा -

*रागम् – नवरोज् ताळम् –आदि*

*पल्लवि -: श्रीनिवासाय वेद विदित विश्व रूपाय श्रित जनानन्द दायकाय मङ्गळम्*

*चरणम् १ -: वेङ्कटेशाय सङ्कटाघ मोचनाय वर शशाङ्क कोटि सुन्दराय सुभ्र मङ्गळम्*

***चरणम् २ -: सर्व गायक प्रियाय सर्वमत मोदकाय सर्व भुवन जनहिताय सर्व मङ्गळम्***

***चरणम् ३ -: मङ्गळम् पल्लिवम्श जात बालमुरळिकृष्ण मधुरगान मोहिताय महित मङ्गळम्*** (11)

***" चिन्तयामि सततम् "*** (12)

इति कृतिः मुत्तुस्वामिदीक्षितम् आश्रित्य रचितः । अस्य कृत्याः नाम 'सुचरित्रः' । दीक्षितस्य सुचरित्रवर्णनमस्ति कृतौ अस्मिन् इत्यस्य सूचनार्थं सुचरित्र रागे एतत् गितं रचितम् । एषः 'सुचरित्रः' रागः अनेन जनितः । कृतौ अस्मिन् - ***निपुणम् - गान निपुणम् - दोशीय गान निपुणम् - मार्ग दोशीय गान निपुणम्*** इत्यत्र श्रोतावह साहित्य यतिः दृश्यते ।

अनेन रागमुद्रा अतीव सामर्थ्येन प्रयुज्यते । ***अम्बिकामुपासेऽहम्***(13) इति गीते - '***नासिकाभूषण - भूषिताम्*** - नासिकाभूषणेन अलङ्कृता इत्यर्थः, " नासिकाभूषण " पदेन रागमुद्रा भवति ।

अस्य गीतेषु पदगाम्भीर्यं पदचातुर्यं च दृश्यते । यथा -

***रागम् -झङ्कारध्वनि ताळम् – झम्प***

***पल्लवि -: जषकेतन पितरम् भजरे जर्जर मानव***

***अनुपल्लवि -: जक्ष भञ्जनमजितम् अव्यक्तम् सततम्***

***चरणम् -: जलजधरम् जनार्धनम् वज्रवर्म धरम्***

***जल्लरि झङ्कार-ध्वनि प्रिय विनुतम् विजृम्भित मुरळीगान रञ्जकम्*** (14)

रागस्य नाम झङ्कारध्वनिः । झङ्काररवस्य उद्दीपनं कर्तुं समर्थाणां शब्दानां उपयोगः अत्र कृतः.।

अस्य संस्कृतगीतानि प्रासानुप्रास - अन्त्यानुप्रासैः सुन्दरतया सृष्टितानि ।

***रागम् -वल्लभी ताळम् – आदि***

***पल्लवि -: जय जय गुरुनाथा जय हे प्रिय गायक नेता हे***

***चरणम् १ -: जय करुणा गुण जय परिपूरण जय जय मृदुतर भाषण***

***चरणम् २ -: जय सललित विलसित स्मित आनन जय मुरळीरव मोहन*** (15)

**मङ्गलम् गणपति ( १९३४ – आधूनिककालीया )**

वर्तमानकालीया वाग्गेयकारिणी एषा, साधारणगृहिणी एवा आसीत् । एकदा, स्वस्याः चतु:षष्टितमे आयुषि, सहसा, दिव्यशक्तिं प्राप्ता । त या दिव्यशक्त्या कृतीः रचयितुम् आरब्धा। संस्कृतं, आन्ध्रं, द्रविडं, केरलम्, हिन्दि इति पञ्चविविधासु भाषासु कृतीः रचितवन्ती अस्ति । अस्याः गीतानां विशेषः अस्ति, चरणभागे आकर्षपूर्णं मध्यमकालसाहित्यं भवति । यथा –

***रागम् - हम्सानन्दि तालम् - आदि***

***पल्लवि -: गम् गणपतिम् भजेऽहम् कारुण्यामृत हृदयेश्वरम्***

***अनुपल्लवि -: शङ्करि शङ्कर प्रिय तनयम् सङ्कट दुःख भयरोग शमन देवम्***

***चरणम् -: पङ्कज दळ नयनम् पावन चरितम् भक्तजन प्रिय वामन रूपम्***

***वक्रतुण्डम् वाञ्चित फलदायकम् वन्दित चरणाम्बुजम् मङ्गळ वर प्रदम्***

***(मध्यमकाल) मोदक हस्तम् मूशिक वाहनम् मेदा विलास वेद नायकम्***

***विद्यादि सर्व कला नायकम् विघ्नेशाङ्कुश रूप मोहनम्*** (16)

अस्याः भाषा सरला मधुरा भक्तिपूर्णा च अस्ति । यथा -

***रागम् – कापि ताळम् – आदि***

***पल्लवि -: भजरे रघुकुल दीपम् रामम् भक्तजनाशय वरदम् नित्यम्***

***अनुपल्लवि -: सुजन परिपालितम् पवित्रम् सुन्दर श्यामळ कोमळ गात्रम्***

***चरणम् -: जानकीरमणम् जगन्मोहनम् ज्वलित वदन शान्त स्वरूपम्***

***सनकादि मुनि नर सेवित शरणयम् सततम् नाम स्मरित आञ्जनेय नाथम्***

***( मध्यमकाल ) वानर श्रेष्ट सुग्रीव बान्धवम् विविध माया लीला विनोदम्***

***दश मुखादि सर्व असुर कुल कालम् दशरथ तनयम् मङ्गळ मानसम्*** (17)

**मदुरापुरि मणिः ( १९३५ – वर्तमानकालः )**

एषः विद्यमानकालीयः महापण्डितः, संस्कृत – द्रविड - आन्ध्र भाषासु त्रिशताधिकानि कीर्तनानि विरचितवान् । आधूनिककालेऽपि विविधे सङ्गीतसदसि सङ्गीतविषयेन सह गीतानाम् साहित्यविषयानां विवरणम् करोति । साहित्यस्य मुख्यत्वम् अत्यावकश्यकत्वं च वर्तमानयुवानां छात्राणां बालानां सङ्गीतोपासकानां मनसि संस्थापयन् अस्ति । अस्य गीतानि द्युतियुक्तानि गम्भीराणि च सन्ति । यथा –

***रागम् – शुद्धधन्यासि ताळम् – आदि***

***पल्लवि -: प्राणपते गुणपते गणपते दीनजनार्थिहर वल्लभ***

***अनुपल्लवि -: जाह्नवि धरसित सुत नवनिते गजसम्मोहन मूर्ते प्रकीर्ते***

***चरणम् -: पावन पङ्कज पुष्पपते जगत्कारण मोक्षपते***

***देवराज पूजित जगत्पते भाव राग लयम् देहि माम्पाहि***

***( मध्यमकाल ) प्रणव रतिपति माया रतिपति भूमि गन्धार मन्त्रपते***

***फणि सन्तुरग कलशाम्बोरुह सुरगण वन्दित मुनिगण सज्जन*** (18)

पदसुशीलता च दृश्यते । यथा –

***रागम् – मिन्मल्हार् ताळम् – चापु***

***पल्लवि -: रामदूतम् नमाम्यहम् रघुराम नाम प्रकार भूषणम्***

***अनुपल्लवि -: कामजित कपीश्वरम् कालकाल नीलकण्टांशम् सततम्***

***चरणम् -: अञ्जना गर्भ सम्भूतम् पञ्चवक्रम् पिङ्गळाक्षम्***

***सञ्जीवि शैलधरम् चिरञ्जीविन असुर भञ्जनम्***

***जानकी शोक निवारणम् ऊर्मिळपरिपाल रक्षकम्***

***दीन मित्रम् सुगात्र सागरम् ज्ञान तत्व प्रदायकाक्षम्***

***( मध्यमकाल ) दशग्रीव कुल सम्हारम् शरजापति दास प्रभावम्***

***धीरार्जुन रथ ध्वजवासम् भीमराज पूजित चेष्टम्*** (19)

**यतीनां रचनाः**

आधूनिककाले, संस्कृतस्य वर्धने शङ्कराचार्यादिमठानि अतिमुख्यस्थानं वहन्ति । पाठशालाः पुनरुद्धरन्ति, बालिकानां कुमारिणां कृते विविधान् समारोहः कुर्वन्ति । गते वर्षेऽपि, काञ्चिमठस्य श्रीकामाक्षी श्रीविद्या समितिः 'सहस्रदलपद्म आराधनम्' इति एकः समारोहः कृतः । तदा, सहस्राधिकाः कन्याकुमारीजनाः एकस्मिन् स्थाने, एककाले, दशानां संस्कृतश्लोकानं गानम् अकुर्वन् । एवंविधैः समारोहैः छात्राजनानां मध्ये धर्मसंस्कारविषये आसक्तिः भवति। एवं, मठानि संस्कृतवर्धनद्वारा भारतीयसंस्कारवर्धनं कुर्वन्ति । अपि च, मठाधिपतयः, सामान्यजनार्थं, सुलभमाध्यमेन भक्तिभावस्य प्रचारणार्थं, लोकक्षेमाय, सरलभाषायां गीतानि रचयन्ति।एतानि गीतानि मुधुराणि श्रेष्ठानि च ।

काञ्ची कामकोटिपीठाधिपतिः जगद्गुरुः पूज्यश्री श्री श्री जयेन्द्रसरस्वति स्वामिः, स्वयं सङ्गीतपण्डितः, संस्कृतपारङ्गतः च । तस्य एकः कृतिः, उदाहरणार्थम् -

***रागम् – पीलु ताळम् – आदि***

***पल्लवि -: भजरे गुरुनाथम् मानस भजरे गुरुनाथम्***

***चरणम् १ -: भस्म रुद्राक्षादि अलङ्कृत शरीरम् बिल्व मालादि अलङ्कृत शिरस्कम्***

***चरणम् २ -: मन्त्र महामणि मन्त्र स्वरूपम् प्रणव पयोधर प्रणव स्वरूपम्***

***चरणम् ३ -: मन्दहासमुखम् मन्दाक्ष वीक्षणम् राजादि राजम् जगद्गुरु रूपम् कामकोटि रूपम्*** (20)

तथैव, श्रृङ्गगिरि शारदापीठाधिपतिः जगद्गुरुः पूज्यश्री श्री श्री भारतीतीर्थ स्वामिः अनेकानि संस्कृत गीतानि रचितवान् । तेषु, एकं गीतं समीपकाले अतीव ख्यातिः प्राप्तम् । तत्,

***रागम् – यमन्कल्याणि ताळम् – आदि***

***गरुडगमन तव चरणकमलमिहमनसि लसतु मम नित्यम्***
***मनसि लसतु मम नित्यम्॥***
***मम तापमपाकुरु देव मम पापमपाकुरु देव ॥***
***जलजनयनविधिनमुचि हरणमुख विबुधविनुत पदपद्ममम***
***तापमपाकुरु देव मम पापमपाकुरु देव***
***भुजगशयन भव मदनजनक मम जननमरण भयहारी मम***
***तापमपाकुरु देव मम पापमपाकुरु देव***
***शङ्खचक्रधर दुष्टदैत्यहर सर्वलोकशरण मम तापमपाकुरु देव***
***मम पापमपाकुरु देव ॥***
***अगणितगुणगण अशरणशरणद विदलित सुररिपुजाल मम***
***तापमपाकुरु देवमम पापमपाकुरु देव ॥***
***भक्तवर्यमिह भूरिकरुणया पाहि भारतीतीर्थम्मम तापमपाकुरु***
***देव मम पापमपाकुरु देव ॥*** (21)

एवम् अस्माकं वाग्गेयकाराः, आधूनिककाले संस्कृतेन एव संस्कृतेः रक्षणं साध्यम् इति संस्कृतभाषायाः आवश्यकत्वं सम्यक् ज्ञातवन्तः सन्ति | स्वसाहित्यैः नवीनयुगेऽस्मिन्, नादोपासनद्वार मोक्षसाधनम् इत्यादीनि सद्विषयानि प्रदर्शयन्ति, उन्नतमर्गे सर्वजनान् नयन्ति | अतः, विंशति, एकविंशतिशताब्धे संस्कृतभाषायाः वर्धनं भवति एव इत्यनेन वयं सर्वे भाग्यवन्तः स्म |

## References


1. Concert - Rare compositions of Sangita Kalanidhi GN Balasubramaniam, Trichur V. Ramchandran, at Music Academy, 2019
2. Album – Kalalanerchina, Track 3, Sudha Raghunathan, 2008
3. Youtube channel, video description – Subramanian Krishnan, Prema Rangarajan, 2017
4. Book - Saptaswara's Classical gems, TH Thiyagarajan, 2005, S.No 10, Pg.No 27
5. Website - karNaTik.com, Mayooram Vishvanatha Shastri Lyrics, Lakshman Ragde
6. Book - महाराजा जयचामरज ओडेयार् विरचित कीर्तनानि, २००९, Dr. PP Narayanaswamy, S.No 63, Pg.No 67
7. Book - महाराजा जयचामरज ओडेयार् विरचित कीर्तनानि, 2009, Dr. PP Narayanaswamy, S.No 18, Pg.No 22
8. Book - महाराजा जयचामरज ओडेयार् विरचित कीर्तनानि, 2009, Dr. PP Narayanaswamy, S.No 20, Pg.No 24
9. Website – shastras.com, PR Ramachander S.No 4
10. Janaka raga kruthi manjari, M. Balamuralikrishna, Murali Ravali publications 1952, S.No 30, Pg No 45
11. Website - karNaTik.com, M. Balamuralikrishna Lyrics, Lakshman Ragde
12. Janaka raga kruthi manjari, M. Balamuralikrishna, Murali Ravali publications 1952, S.No 72, Pg No 117
13. Janaka raga kruthi manjari, M. Balamuralikrishna, Murali Ravali publications 1952, S.No 75, Pg No 121
14. Janaka raga kruthi manjari, M. Balamuralikrishna, Murali Ravali publications 1952, S.No 24, Pg No 35
15. Website - karNaTik.com M. Balamuralikrishna Lyrics, Lakshman Ragde

16. Book - Mangala Geetham, Mangalam Ganapathy music trust, 2005, S.No 1, Pg No. 9
17. Book - Mangala Geetham, Mangalam Ganapathy music trust, 2005, S. No 11, Pg. No. 22
18. Website - karNaTik.com, Madurai G S Mani Lyrics Lakshman Ragde
19. Website - karNaTik.com, Madurai G S Mani Lyrics Lakshman Ragde
20. Book - Compositions of HH Sri Sri Sri Jayendra Saraswathi Swamigal, Kanchi Kamakoti Peetam, 2019 (re-edition) S.No 5, Pg No. 5
21. Website – sanskritdocuments.org, MahaviShnu Stotra, PR Ramachander, 2017

## Bibliography

Books:

1. Smt. Revathy Raman (2016) Mangalam Ganapathiyum Mangala Isaiyum; Sangeethakalaratna
2. Vidwan S.Shankar (2018) Bharatha Bhajanam, Sanskrit Patriotic songs with lyrics
3. V. Nanjundaswamy (2016) Royal Composer Shri Jayachamarajendra Wodeyar;

**Article:**

1. The Hindu (2011) Venkatesan Srikanth, His own tune:
2. Dr. Saroja Raman (2016) Smt. Kalyani Varadarajan – Outstanding Carnatic Music Woman Composer of the Century, The journal of Music academy, Radha Jayalakshmi, GNB The creative genius and his compositions.

# संस्कृतदूतसाहित्ये नूतनं दूतकाव्यम् 'काकदूतम्'

**Renuka Karandikar**
Kavikulaguru Kaalidas Sanskrit University.
karandikarrenuka@gmail.com

**संक्षेप:**

*संस्कृतदूतसाहित्यस्य परम्परायां नूतनं दूतकाव्यमिदं काकदूतमित्याख्यं शतकेऽस्मिन्सुविख्यातम्। काव्यस्यास्य रचयिता महाराष्ट्रगत-नागपुरीयः महाकवि: मधुसूदन:पेन्ना। दूतकाव्येऽस्मिन्पात्रत्रयं भवति धार्मिक: काक: पितरश्चेति तत्र धार्मिक: सन्देशप्रेषयिता, काक: सन्देशवाहक:, पितरश्चसन्देशलक्ष्यम्। दूतकाव्यस्यविषय: समाजोद्बोधनम्। भारतदेशे सनातनधर्मस्य विषयेयाविमुखता दृश्यते पितृकार्येषु यदौदासीन्यं दृश्यते तद् दृष्ट्वा एतद्औदासीन्यं दूरीकर्तुं पितृणाम् आशीर्वचसां महत्त्वं प्रतिपादयितुं समाजं पितृकार्येषु पुनरेकवारं नियोजयितुं समाजे हीयमानां धर्मश्रद्धां वर्धयितुं च प्रयतमानेन कविना काकदूतमितदं दूतकाव्यं रचितम्। काव्येऽस्मिन् आदौ समाजस्य सांप्रतपरिस्थितिमुल्लिख्य पुराभारतदेश: कथमासीत् इत्यस्यवर्णनं कृतं तस्मादनन्तरं धार्मिक-काकसंवाद: दर्शित: । संवादे च पितृरूपाणां देवतानाम् आशीर्वचसां महात्म्यं ऋणत्रयापकरणलाभ: काकस्तुति: संदेशश्चइत्येतोविषया: अन्तर्भवन्ति। संवादादस्मात्कवे: मनसि वर्तमाना धर्मनिष्ठा पितृणां विषये विद्यमानः महान् आदर: समाजोद्बोधनञ्च प्रकटीभवन्ति। ज्ञानोत्तरभक्तिवतां श्रद्धावतां महाकवीनां काव्येऽस्मिन्काक: दूतरूपेण कस्मात्दर्शित: इत्येतत्काव्यविश्लेषणे परिशीलयामः। दूतकाव्ये प्रकारद्वयं दृश्यते आत्मनिष्ठकाव्यं समाजनिष्ठकाव्यं चेति। अनयो: प्रकारयो: काकदूतमितीदं समाजनिष्ठकाव्यप्रकारे अन्तर्भावयितुं शक्यते ।*

## विषयप्रस्ताव: -

दूतकाव्यस्येतिहास: अत्यन्तप्राचीनः अस्ति। महाकविकालिदासस्य 'मेघदूतम्' इत्यनेन गीतकाव्येन आरब्धेऽस्मिन्काव्यप्रकारे नैकै: कविभि: स्वप्रतिभा आविष्कृता। एतेषु दूतकाव्येषु बाहुल्येन मन्दाक्रान्तावृत्तप्रयोगः दूतरूपेण च कस्यापि प्रेषणम् इत्येतत्सर्वेषु समानं दृश्यते। तथापि कानिचनकाव्यानि भिन्नवृत्तेषु सन्ति यथा रूपगोस्वामिन: हंसदूतम्व्रजनाथस्य मनोदूतमपि शिखरिणीवृत्ते अस्ति। हरिहरस्य हृदयदूतं वसंततिलकावृत्ते जम्बो: चंद्रदूतम्मालिनीवृत्ते भोलानाथस्य चपान्यदूतं शार्दूलविक्रीडितवृत्ते अस्ति।[1] एवञ्च अन्यानि दूतकाव्यानि विविधवृत्तेषु सन्ति। एतस्यां परम्परायाम् एकविंशतितमे शतके लिखितस्य नूतन-दूतकाव्यस्य काकदूतस्य विश्लेषणमस्यशो धनिबंधस्य मुख्य: विषय: ।

## संशोधनपद्धति: -

शोधनिबंधेऽस्मिन्विश्लेषणात्मकसंशोधनपद्धति: अवलंब्यते।

## काकदूतस्य विश्लेषणम् –

दूतकाव्ये प्रामुख्येन सन्देशप्रेषयिता सन्देशवाहक: सन्देशलक्ष्यम् इत्येतत त्रयं प्रामुख्यम् आवहति ।अस्मिन्दूतकाव्ये सन्देशप्रेषयिता अस्ति धार्मिक: सन्देशवाहक: अस्ति काक: सन्देशलक्ष्यमस्ति पितृदेवता। धार्मिक: इति नेदं कस्याचित्नाम अपि तु समाजे धर्मनिष्ठ: सर्वोऽपि जन: धार्मिकशब्देन काव्येस्मिन् संबोधितः। धार्मिकस्य माध्यमेन कवेर्मनोभावा: प्रकटीभवन्ति।

## धार्मिकस्य मन:स्थिति –

एकविंशतितमे शतके तांत्रिकीऔद्योगिकी च प्रगति: भूरिशो जाता विश्वं सर्वं निकटमायातं किन्तु तत्फलरूपेण भारतीयजनेषु पूर्वं विद्यमाना धर्मनिष्ठापापभिरुतात्यागवादः संस्कृतेराचरणम् इत्यादिकस्य ह्रासःअभवत्परिणामत: च धर्मश्रद्धारहिता: अत एव च स्वाश्रमोचितकर्तव्यमूढा: जना:

सर्वस्मिन्भारते दृश्यन्ते।एतान्जनान्दृष्ट्वा धार्मिकस्य रूपेण कवेः दुःखम् अत्र दर्शितम् –

"कश्चिल्लोके विविधतनुभिः प्राणिभिर्धर्महीनैः ।
क्लिष्टंकर्मप्रणिहितधियालक्ष्यशून्यैः सदैव।
कामाद्दुष्टैः क्रियत इति तद्वीक्ष्य सोद्विग्नचित्तः
तानुद्धर्तुं नियतकरणोध्यानमग्नोबभूव॥[2]

कविः वदति कालेऽस्मिन्सर्वेजनाः धर्महीनाः दृश्यन्ते।धर्महीनाः इति कथने स्वधर्मोचितकार्येभ्यः विमुखाः इति कवेराशयः स्यादिति मन्ये।पुरा भारतदेशे यादृशाः कर्मपरायणाः पापभीरवः जनाः धर्माचरणे सौख्यं मन्यन्ते स्म न तथा सांप्रत जनानां धर्मपरायणता दृश्यते इति कवेः दुःखमत्र अस्मात्श्लोकात्स्फुटीभवति।

सप्तदशशतकस्य टेंबेस्वामिमहाराजैः अपि तेषां 'शिक्षात्रयी' इत्यस्मिन्ग्रन्थे कुमारशिक्षायां समाजे ईश्वरे अश्रद्धाकर्मकाण्डे निरादरःअवतारविषये कुतर्कश्च इत्यादेः निवारणाय नारायणस्वामिनामकस्य भक्तस्य दृष्टान्तेन ब्राह्मणी-यतिसंवादेन उमाहैमवती कथयाचईश्वरास्तित्त्वं कर्मकाण्डस्य माहात्म्यम् अवतारस्य सत्वं प्रकर्षेण प्रतिपादितम्।[3]

इतिहासं संस्मृत्य पुरा कथमासीत्मम भारतदेशः इति वदति कविः -

"योऽयंदेशोमुनिभिरमलैः शब्दरत्नैः प्रदीप्तो
ज्ञानादित्यप्रचितकिरणोद्ध्वस्तमायाप्रभावः ।
ज्ञानेनन्दन्सततमिनवत्कापशमानोविरेजे
विज्ञानाभा-रतइतिसदाभारताख्यांविधत्ते॥[3]"

देशोऽयंमुनिभिः अमलैः शब्दरत्नैः प्रदीप्तः आसीत्ज्ञानसूर्येण अत्र अज्ञाननाशो भवति स्म ज्ञानमार्गिणः स्वात्मज्ञानेनिमग्नाः भवन्ति स्म।

विज्ञानस्य आभायां-रत इति भारत इत्येतादृशी भारतशब्दस्य व्युत्पत्तिः इति दर्शयित्वा तादृशः मम भारतदेशः अधुना पाश्चात्यानां संस्कृतिं विचारांश्च अग्रे गणयति 'मालां मत्त्वा प्रविततफणंसर्पमालिङ्गतीव' इत्यादृशैः शब्दैः अद्यतनीयायाः परिस्थितेः वर्णनं कविनाधार्मिकमुखेन कृतम्।कवेः अयं विचारः एतत्शल्यमस्यां पङ्क्त्यां स्फुटीभवति –

"कस्माल्लोके भवतिमनुजोधर्मदूरोऽतिदुष्टः
कस्माद्धर्मे पुनरपि मतिस्तस्य निष्ठां व्रजेच्च।
एकान्ते स्वांजनुषममलां कर्तुमीहेतकस्मात्
धर्मोच्छित्तौकमिहशरणं याम धर्मश्चहेतोः॥[4]"

**तेजःपुञ्जप्राकट्यम् –**

धर्मविमुखस्य समाजस्य धर्मपरायणता कथं भवेदित्यस्यां चिन्तायां ध्यानमग्नावस्थायामुपविष्टस्य धार्मिकस्य पुरतः तेजसांपुञ्जः प्रकटीभवति।धार्मिकः पृच्छति–

श्रीमन्कस्त्वंकथमिह मयि प्रीतिमान्निर्गुणेऽपि
प्रज्ञातेजः किरणपटलैर्दीप्यमानोऽसिशुभ्रैः ॥[5]

तदा समधुरवचनेन वदति -

साध्यं सर्वं तपसिमहितेसाधिते पूर्वपुण्यै
स्तस्मात्सर्वे तप इति महच्छस्त्रमाराधयन्तु॥[6]

एवञ्चतस्य उपदेशं श्रुत्वा धार्मिकः तपः आचरति।तेन हृष्टः त्रिभुवनपतिः एकं दूतं धार्मिकस्य पुरः प्रेषयति।

**काकप्रवेशः -**

त्रिभुवनपतिनाप्रेषितः दूतः काकः आसित्।सकाकः

काकाशब्दं श्रवणपरुषं तस्य रूक्षं निशम्य।
ध्याने मग्ने हृदयमथनान्मौनिवर्योऽपितूर्णम्।[7]

काकाशब्दं कृत्वा सः काकः धार्मिकस्य पुरतः उपस्थितोभवति।स्वागमनहेतुम्वदति – तव दुःखहानाय अहमत्र उपस्थितः ।

'नाकं नेतुं मम हि वचनं सक्षमः प्रार्थनाख्यम्।' इति।[8]

दूतकाव्येऽस्मिन्काकस्य दूतरूपेण योजनायाः इदमेवकारणम्।

धार्मिक: काकं नत्वा ऋणत्रयं वर्णयति। ऋणत्रयात् मुक्तो भूत्वा मोक्षार्थं योग्यता संपाद्यते इत्येतद्धार्मिक: काकमुद्दिश्ये समाजम् उपदिशति।

**पितृणां माहात्म्यम् –**

धार्मिक: काकं वदति –

जाने पित्रो: स्मरणमहिमाभूतले वागतीत: ।[9]

पितृणां स्मरणमाहात्म्यम् इहलोके वर्णनातीतमस्ति।

पित्रो: पित्रोस्तदनु पितरावेवमाद्यन्तहीना

नित्यालोके लसति सरणि र्लोकभूतिं दधाना॥'[10]

पितृणाम् आद्यन्तहीनालोकभूतिं दधाना सरणिर्लोके विलसति। मनुजै: पितृन्हृदयकमले धृत्वा तेषां स्मरणं कार्यं यतो हितेभ्य: एव शरीरमिदं वयं प्राप्तवन्त: ।अत: हे काक ! मामकीनं वच: पितृणां साक्षान्नेतुं प्रार्थयेयम्।

तेषामाशी: फलमिव महज्जीवनं प्राप्तमेतत्।

धर्म्यं मत्वा निमवचनेष्वात्तबुद्धि: प्रकामम्॥

अर्थात्पितृदेवतानाम्आशीर्वचसां फलरूपेण एतत्जीवने प्राप्यते जीवनेऽपितेषामेव आशीर्भिः श्रुतिवाक्येषु विश्वास: धर्मानुसारिणी बुद्धिरपिप्राप्यते।

अत: यावन्मम जीवनं भवेत् एतासां पितृदेवतानां स्मरणम्करिष्ये धर्मरूपिण: सूर्यस्य ज्ञानरूपान्प्रखरकिरणान् अहं वहेयम्।

श्राद्धकाले दधति पितरोमानसंतत्स्वधार्थं

वर्षेदत्तंलवमपि महन्मन्यमाना: प्रतृप्ता: ॥

श्राद्धकाले वर्षे एकवारं लवमपि ईषदपिवादत्तं पितर: महत्मन्यन्ते संतृप्ताश्च भवन्ति। अत: श्रद्धया तेषां संस्मरणपूर्वकं श्राद्धस्य अनुष्ठानं करणीयमेव इति धार्मिक: प्रतिपादयति।

**काकस्तुति: -**

धार्मिक: काकात्स्वकार्यं कारयितुम् आदौतं नमस्करोति तञ्च स्तौति – हे काक ! लोकेऽस्मिन्मनुष्या: अश्रद्धयापि यत्किमपि क्षिपन्ति तत्सर्वं त्वं प्राणिनां भोजनार्थं विपिनेक्षिपसि अथवा मलिनमपितत्भक्षयसि एवञ्च-

प्रक्षाल्यैवसकलपृथिवींनिर्मलांत्वंविधत्से।[11]

तव "कृष्णांरूपं परुषवचनं तावकं घोरनेत्रं

दृष्ट्वा श्रुत्वा भवति मनुजो नैव ते प्रेमिकोऽत्र॥"[12]

अर्थात्तवरूपं दृष्ट्वा तव प्रेमिका: न भवन्ति किन्तु मलिनहृदया: मानवा: तेषां श्रेय: भवता कथं कार्यत इति न जानन्ति। भवान्तु पृथिव्यां यद्विविधमलिनं भवति तस्य शुद्धिं कृत्वा पृथिवीं क्षालयसि। अत एव च त्वं धर्मदेवस्य दूत: इव इति मे भाति। यथा नि:श्रेयसे आदौ बुद्धे: शुद्धि: प्रथमसोपानं तादृगेवमनुजजीवने शुद्धिकार्यं त्वङ्करोषि।

"तस्मात्त्वं मे हृदयनिलयोधर्मदूतोऽसिमित्र।"[13]

"त्यक्तं सर्वं वहसि मलिनं खादसि त्वं तथैव।

अश्रान्त: सन्चरसिबहुश: काकदेशे विवक्ते

जीवन्मुक्तेरनुपमदशां दर्शयन्गुप्तरूपम्।"[14]

धार्मिको वदति हे काक! त्वं मे हृदयनिलयोऽसि त्वं सर्वं त्यक्तं वहसि खादसि अश्रान्त: त्वं विवक्ते देशे चरसि अत: त्वं ननु जीवन्मुक्तदशां दर्शयसीव इति मे भाति।

अत्र कविना जीवन्मुक्तदशावर्णिता यथा वेदान्ते।

"सुषुप्तवज्जग्रति यो न पश्यति

द्वयं च पश्यन्नापि चाद्वयत्वत: ।

तथा च कुर्वन्नपि निष्क्रियश्चय:

स आत्मविन्नान्यइतीह निश्चय: ॥"[15]

"बुद्धाद्वैतसतत्तस्ययथेष्टाचरण यदि

शुनां तत्तद्दशाञ्चैवको भेदोऽशुचिभक्षणे "[16]

धार्मिक: काकम् आश्वासयति यद् असमनयनं क्रूरनेत्रं त्वां विलोक्यजना: परिहासं कुर्वन्ति किन्तु सा तु मानवानां मूढता यतोहि शिवोऽपि तादृश: असमनय: किन्तु तमीश्वररूपेण पूजयन्ति। धार्मिक: वदति भवत: काकाशब्द: जनान्किमर्थं पीड्यति इति न जाने यतो हि: श्रुतिरपि का ते भ्रान्तिर्मनुजइत्यादिभि: उक्तिभि: काकाशब्दं करोति।अत: अस्तु तावत् 'त्वं तुममित्रवर्य: असि। अहुत्वां धर्मदूतं संबोधयामि त्वं कृपया मे संदेशं नय इति' अत्यंतआर्ततया धार्मिको काकाय निवेदयति–

"संदेशं में नय करुणया पूर्वजानां पुरस्तात्' ।
कच्चिच्छान्तिर्भवतु हृदये मामकीनेऽपिमित्र॥"[17]

**संदेशवर्णनम् –**

धार्मिक: काकाय संदेशं निवेदयति

"धर्मादित्यप्रखरकिरणान्ज्ञानरूपान् वहेयम्॥"[18]

"नोचेन्मृत्यु: कमिहमनुजं त्यक्तुकामोऽस्तिमित्र।'
क्षीणोत्साहं ग्रसति विद्योमृत्युरत्रैव सर्वम्।"[19]

धर्मरूपिण: सूर्यस्य ज्ञानरूपान् प्रखरकिरणान् अहं वहेयं इति धार्मिक आश्वासयति यतोहि अज्ञानिनं मृत्यु: (यम:) ग्रसति। तत्र कठोपनिषद्यपि निचिकेत: आत्मज्ञानस्य कृते यमधर्मराजं संप्रार्थ्यः वदति––

"नवित्तेनतर्पणीयोमनुष्यो
लप्स्यामहे वित्तमद्राक्ष्मचेत्त्वा।
जीविष्यामोयावदीशिष्यसित्वं
वरस्तुमेवरणीय: सएव॥"[20]

एवञ्च यमराजस्य दृष्टिपातो न भवति तावत्जीवनं जीवने वित्तं सर्वसुखं प्राप्नुम: किन्तु यमराजस्य दृष्टिपाते सर्वं नश्यति। 'पुनरपि जननं पुनरपि मरणं पुनरपि जननी जठरे शयनम्' एव

"मृत्यो: पाशादवितुममलं ज्ञानमेकं हि शास्त्रं
प्राप्तुं तन्मे भवतु सततं श्रद्धया सर्वयत्न:॥" [21]

अर्थात्जीवनमरणचक्रान्मुक्त्यै ज्ञानमेकमेव शास्त्रं मनुजस्य कृते शास्त्रे विहितम् अत: ज्ञानमिच्छामि। ज्ञानप्राप्त्यर्थञ्च श्रद्धा आवश्यकी।

**श्रद्धाया: माहात्म्यं –**

धार्मिक: अत्र श्रद्धाया: माहात्म्यं प्रकटयति

"श्रद्धामूलां वदति निगम: सर्वसम्पात्प्रसूतिं
श्रद्धायोगेऽप्यतुलमहिमा कीर्तिता योगिवर्यै :।
योगे सिद्धिर्भवति सुलभा श्रद्धया सेवितेहि
तस्माच्छ्रद्धां दधतु पितरो मय्यनन्तां सुधामाम्॥"[22]

अर्थात्वेदेषु श्रद्धाया: माहात्म्यं निगदितं यद् श्रद्धया सर्वसम्पत्प्रसूतिर्भवति।श्रद्धावतां योगिनाम् अतुलमहिमा कीर्त्यते।योगमार्गे श्रद्धयैव योगसिद्धि: सुलभा भवति अत: हे काक ! ' मम पितर: मयि अनन्तां सुधाभां श्रद्धां दधतु ' इति तान्याचे।

अत्र श्रद्धा नामका ? इत्युक्ते शंकराचार्याणामनुसारम् 'अस्तिक्यबुद्धि: श्रद्धा'।[23] अत्र धार्मिकः प्रतिपादयति यदि क्षेत्रे शरीरे वा श्रद्धा भवति तर्हि पुनरपि जननं पुनरपि मरणं प्राप्यते यदि क्षेत्रज्ञे जीवे श्रद्धा भवति तर्हि सामानसकल्मषं दूरीकरोति यदि परमपुरुषे श्रद्धा भवति तर्हि मोक्षप्राप्तिर्भवति। इत्येवं श्रद्धायाः विषयानुसारं फलं भवतीति दर्शितम् ।

श्रद्धाया: ईदृशं स्वरूपमुक्त्वा अग्रे कर्मविषयकं स्वमतमुपस्थापयति।

"स्वर्गे सौख्ये खलु बहुविधं प्राप्यं पुण्ये प्रणष्टे
लोके मर्त्ये पुनरपि नरो जायते कर्मभोक्तुम्॥"[24]

भगवद्गीतायां यथोक्तं 'क्षीणपुण्ये मर्त्यलोकं विशन्ति' तथैव अत्र धार्मिक: प्रतिपादयति यत्स्वर्गे सौख्यं खलु बहुविधं प्राप्यते।

"स्वर्गेलोके न भयम् किञ्चनास्ति
न तत्र त्वं,नजरया बिभेति।"[25]

किन्तु कियत्कालं तत्र सुखोपभोग: यावत्पुण्यं तावदेव अनन्तरं पुन: मर्त्यलोकं विशन्ति। इदमेव हि कर्ममाहात्म्यम्।सत्कर्मप्रभावात्पुण्यं प्राप्य स्वर्गप्राप्तिर्भवति क्षीणे पुण्ये पुन: मर्त्यलोके वास: अथवा सत्कर्मचित्तशुध्दे अपि प्रभवति यस्य फलं मोक्षो भवति।शुद्धचित्तात्प्रज्ञाजायते प्रज्ञया तत्त्वज्ञानाय समर्थो भवति तत्त्वज्ञानात्भक्तिरुत्पद्यते।

ज्ञानाद्भक्तिरूत्पद्यते इत्यस्मिन्कथने ज्ञानोत्तरभक्ते: प्रतिपादनं कविना कृतम्।अत्र प्रज्ञाचक्षुगुलाबरावमहाराजानां प्रभावो दृश्यते।[26]

कवे: दार्शनिकत्वमत्र स्फुटीभवति। दर्शनशास्त्रे कर्मज्ञानभक्तिरित्येतेषु मोक्षस्य करणम् अर्थात्साक्षात्कारणं किं भवति इत्यस्मिन्विषये महतीचर्चा वर्तते।तत्सारं संगृह्य अत्र कवि: वदति–

"ज्ञानाद्भक्ति: क्वचिदिह भवेद्भक्तितोज्ञानमेव
कस्मात्किंस्यादितिहृदयगापीडयेद्भूरिशङ्का।
सेयं मोघं तुदति विफला दूरतो मित्रहेया
ज्ञानं भक्तिर्मिथइहयुते मोक्षहेतुर्नशङ्का।"[27]

एवञ्च ज्ञानंभक्तिश्चमोक्षेमिथउभेऽपिहेतुर्भवत: इति कवि: स्वमतं प्रतिपादयति काकाय संदेशं निवेदयति च अग्रे -

हे काक! त्वं यदा पितृलोकं गमिष्यसि तदा नयनसुखकरं त्वां दृष्ट्वा ते सर्वे पितर: हर्षोल्लासिता: भविष्यन्ति।तेषां कृते त्वं नयनसुखकर: एव यतोहि त्वं तेषां वंशजेभ्य: संदेशं वहसि पिण्डं नयसि अत: नयनसुखकरात्त्वत्सजलनयना: प्रहृष्टा: ते पितर: पिण्डं स्वीकरिष्यन्ति।

**धर्मस्य माहात्म्यम्**

धार्मिक: संदेशे अग्रे धर्मस्य माहात्म्यं कथयति –

"धर्मायत्तं सुखमिति महत्तत्त्वमाख्यातिवर्यो
व्यास: पूज्यो विदितहृदयो धर्ममातुर्वयस्य।"[28]

महाभारते व्यासै: लिखितं 'धर्मात् अर्थश्चकामश्चकिमर्थं न च सेव्यते" अत: धर्मरूपमातु: हृदयगतं ज्ञात्वा सर्वं सुखं धर्मायत्तमस्ति इति महदिदं तत्त्वं व्यासवर्येण प्रोक्तम्।शास्त्रेषु धर्मस्य विषये लिखितमस्तियद्व: अस्माकं धर्म: स्थिर: शाश्वतश्चअस्ति तस्य पालनं सर्वै: मनुष्यै: यत्नेन कर्तव्य:

**दर्शनशास्त्रस्य महत्त्वम्** –

धार्मिको वदति अस्माकं देशे यदिह परमं वरिष्ठं शास्त्रजातं तत्मङ्लमस्ति।सर्वे वेदा: साङ्गा: मनुष्यजीवने शान्तिम्सौख्यं च प्रददाति वेदान्तानुसारमपि निर्मलचित्तस्य मनुष्यस्य जीवने आत्मतत्त्वज्ञानसामर्थ्यम् उत्पद्यते। श्रीमद्भगवद्गीता अपि विशिष्टै: वाक्यपुष्पै: जीवनस्य सार्थक्यं स्पष्टं ब्रुते।अत एव वदामि –

"अस्माँस्त्रातुं भवति बहुधा निर्मितं शास्त्रजातं॥
देशेऽस्मिंस्तत्क्षपयति तमोबोधदीपेन मित्र॥"[29]

अर्थात् अस्माकं देशे निर्मितं शास्त्रमिदं अस्माकं रक्षणार्थमेवविद्यते।तत्शास्त्रम् अज्ञानतम: नाशयति।

"यावच्छास्त्रंलसति भुवने तावदेवास्ति सौख्यं।
तन्नास्माकं हितमिहपरं शास्त्रशून्ये हि लोके॥"[30]

अर्थात्यावत्शास्त्रम् इहलोके विलसिष्यति तस्य अध्ययनं भविष्यति तावत्भूमौ सौख्यं विलसिष्यति। शास्त्राध्ययनहीने लोके मनुजानां हितं न भवेद्। शास्त्रस्य माहात्म्यं स्पष्टयितुमग्रे वदति –

"प्राचीं श्रित्वा दिशमिह रवौ दीप्यमानेऽपिदेवे।
यस्योद्बद्धं नयनं युगलं तस्य न स्यात्प्रकाश: ॥"[31]

प्राच्यां दिशि यदा रविरुदेति देदीप्यमानो भवति तदा सर्वत्र तमोनाश: भवति प्रकाश: प्रसृतो भवति किन्तु यस्य नयनयुगलं पिहितं तस्य कृते प्रकाशो न भवति। एवमेव लोके मनुजानां श्रेयसे शास्त्रं तु सिद्धमेव किन्तु शास्त्रविषयकश्रद्धाया:

लोपेन मङ्गलं द्रष्टुं नेत्रशक्तिरेवनश्यति। अत: शास्त्रविषयकश्रद्धामेहृदयकुहरे सदादीप इव वर्धेत इति मे प्रार्थनायाचनावाममपितृन्कथय इति।

"तस्माद्याचेतवहिमुखतो मित्रपितृन्तदैव
श्रद्धामिद्धां हृदयकुहरे दीपकल्पां जनानाम्।
श्रेय: सर्वं विनिहितमिहक्षेमहेतौ सदर्थं
श्रद्धायां तद्भवतु हृदये बद्धमूला सदैव।"[32]

एवञ्च सन्देशं काकाय निवेद्य धार्मिक: शान्तो भवति काकोऽपि काका इति श्रवणमधुरं स्वरं कृत्वा दिशि प्रस्थानं करोति। काकस्य रवः धार्मिकस्य हृदये ॐकाररूपेण निनदति।अत्र काव्यं संपूर्ण भवति।

**काकदूतस्य प्रासङ्गिकता**

प्रासङ्गिकता समयोपयोगिता इत्यपि वक्तुं शक्यते।अद्यतनसामाजिकीस्थिति: शोधनिबन्धे आदौ वर्णिता एव। स्वशास्त्रविषयक: स्वधर्मविषयक: स्वदेशविषयक: स्वसंस्कृतिविषयक: स्वाश्रमोचितकर्मविषयक: अभिमान: नैव दृश्यते अद्यतने काले।पाश्चात्यानाम् अन्धानुकरणे न ईश्वरविषयकश्रद्धापि लयङ्गता। अस्मिन्काले कथं पुन: स्वदेशधर्मकर्मविषयकोऽभिमान: जागरयितव्य: शास्त्रविषयिकी श्रद्धा कथम् उत्पादनीया एतादृशानां प्रश्नानां समाधानमस्ति दृक्श्राव्यमाध्यमानि। काव्यमपि तादृशमेव महत्त्वपूर्णं साधनमस्ति। काव्यपठनेन विचारपरिवर्तनं भवति किंकर्तव्यतायां समाधानं लभ्यते। काकदूतम्इत्यस्य पठनेन शास्त्रविषयकं धर्मविषयकं श्रद्धाविषयकं श्राद्धविषयकं च मन:परिवर्तनं भवति। अद्य समाजे एतादृशकाव्यानां महती आवश्यकता अस्ति।यस्मिंश्चअस्माकं संस्कृतिपोषकतत्त्वानि सन्ति। येषां काव्यानां पठने न सत्कर्मप्रतिसदाचारान्प्रतिच मनुष्यस्य प्रवृत्ति भर्वेत्। काव्यमिदं समाजस्य इमाम् आवश्यतां सर्वार्थेन सम्पादयति इयमेव च अस्य प्रासङ्गिकता।

**निष्कर्ष : -**

काव्यस्यास्य नाम काव्यविषयमभिव्यनक्ति।अन्येषु दूतकाव्येषु सत्स्वपि इदं काव्यं स्वविषयवस्तुना उद्दिष्टेन च तेभ्य: विशेषतःभिद्यते।

समाजोद्बोधनपरं काव्यमिदं दूतकाव्येषु नूतनविषयं स्वीकृत्य नवनवीनलेखकान् ईदृक्कार्यंकर्तुम् अवश्यं प्रेरयिष्यति इति मे मति :।

## सन्दर्भसूचि:

| सन्दर्भविभाग: | सन्दर्भग्रन्थस्यनामानि | वर्णनक्रमांक: श्लोकक्रमांक: |
|---|---|---|
| 1 | संस्कृतसाहित्याचा सोपपत्तिक इतिहास | 388 |
| 2 | काकदूतम् | 1 |
| 3 | तत्रैव | 3 |
| 4 | तत्रैव | 2 |
| 5 | तत्रैव | 8 |
| 6 | तत्रैव | 11 |
| 7 | तत्रैव | 15 |
| 8 | तत्रैव | 16 |
| 9 | तत्रैव | 21 |

| | | |
|---|---|---|
| 10 | तत्रैव | 21 |
| 11 | तत्रैव | 24 |
| 12 | तत्रैव | 24 |
| 13 | तत्रैव | 26 |
| 14 | तत्रैव | 27 |
| 15 | वेदान्तसार | 119 |
| 16 | तत्रैव | 123 |
| 17 | काकदूतम् | 30 |
| 18 | तत्रैव | 31 |
| 19 | तत्रैव | 32 |
| 20 | कठोपनिषद् | 1-1-2 |
| 21 | काकदूतम् | 32 |
| 22 | तत्रैव | 34 |
| 23 | कठोपनिषद्शांकभाष्य | 1-1-2 |
| 24 | काकदूतम् | 37 |
| 25 | कठोपनिषद् | १-१-१२ |
| 26 | निदिध्यासनप्रकाशन १.यष्टी (पृ.सं. 177) | 75-78 |
| 27 | काकदूतम् | 39 |
| 28 | तत्रैव | 42 |
| 29 | तत्रैव | 45 |
| 30 | तत्रैव | 46 |
| 31 | तत्रैव | 47 |
| 32 | तत्रैव | 48 |

## सन्दर्भग्रन्थसूचिः


| ग्रन्थस्य नाम | ग्रन्थकर्तुः नाम | प्रकाशकस्य नाम |
|---|---|---|
| कठोपनिषद्शांकभाष्य | | गीत प्रेस्स, गोरखपुर |
| काकदूतम् | प्रो. मधुसूदनपेन्ना | संस्कृतसंवाद, (संस्कृतपत्रिका), नवदेहली |

| | | |
|---|---|---|
| निदिध्यासनप्रकाशन, यष्टी(पृ.सं. 177) | श्री गुलाबराव महाराज | श्री घटाटे प्रकाशन, नागपूर |
| महाभारतआदिपर्व | --- | गीत प्रेस्स, गोरखपुर |
| वेदान्तसार | सदानन्द यति | श्रीम.ग.चाफ़ेकर,ठाणे |
| संस्कृतसाहित्याचा सोपपत्तिक इतिहास | डॉ. वि. वा. करंबेळकर | श्रीशारदाप्रकाशन, नागपूर |

# आधुनिकसंस्कृतसाहित्ये हास्य-व्यंगविमर्श:

**शुभमय पाहाडि**

प्रभातकुमार महाविद्यालय: काँथि:,

subhamoy.pahari13@gmail.com

## शोधसार:

*वैदिककालादारभ्य संस्कृतसाहित्यस्य अविरामं गति: नितरां दृश्यते । भारतीयसंस्कृतसाहित्यं भवति विश्वस्य अत्युत्तमं प्रेरणाप्रदायकं साहित्यम् । जिह्वाया: आस्वादनाय यथा षट् रसा: प्रसिद्धा: तथैव हृदयस्य आस्वादनाय नवरसा: प्रसिद्धा: । जिह्वाया आस्वादनं लौकिकानन्देन सम्बद्धम् । हृदयस्य आस्वादनञ्चालौकिकानन्दकोट्यामन्तर्भवति । यतो हि अलौकिकानन्दस्य साक्षात् सम्बन्ध: वस्तुभि: न भवति केवलं भावानुभूत्या एव । भावानुभूति-भावानुभूत्या आस्वादयोर्मध्ये भेद: विद्यते । नवरसेषु हास्यस्य रसरूपतां सर्वै: निर्विवादं स्वीकृता । मनोविज्ञानस्य पण्डितैरपि हास: मूलप्रवृत्तित्वेन गृहित: । हास: भवति एक: प्रीतिपरक: भाव: चित्तविकासस्य एकं रूपञ्चेति । वस्तुत: हास्योद्रेक: आकार-वेष-आचार-अभिधान-अलंकार-अर्थविशेष-वाणी-चेष्टादीनां विकृतभावेन भवति । अर्थात् यत्र अभिनेतु: वक्तुश्च आकारविकृति:, वाग्विकृति:, वेषविकृति:, चेष्टाविकृति:, अन्यान्यविकृतिश्च वर्णिता: भवन्ति । अथवा अभिनयनं भवति तत्र हास्यरस: आभिव्यज्यते। आधुनिकसंस्कृतकाव्येषु हास्यविनोदनात्मक-व्यंगात्मक-काव्यानां महत् स्थानं विद्यते । वस्तुत: प्राचीनकाले एतादृशानां काव्यानां निर्माणम् अत्यल्पमासीत् । आधुनिकसमये तु विनोदनात्मक-व्यंगात्मककाव्यानां न्यूनता प्राय: दृश्यते । वस्तुत: मनसि आनन्दस्य उत्पत्त्यर्थं हास्योत्पादनाय च व्यंगकाव्यस्योद्भव: ।*

***कुञ्चिका: शब्दा:*** - संस्कृतसाहित्यम्, हास्य:, व्यङ्ग:, विनोदनम्, आकारविकृति: ।

### आधुनिकसंस्कृतसाहित्ये हास्य-व्यंगविमर्श:

अधुना भव: इति आधुनिक:" इति व्युत्पत्त्या अधुना + ठञ् प्रत्ययेन आधुनिक इति शब्दस्योद्भव: । वस्तुत: आधुनिक इति शब्द त्रिधा गृह्यते। प्रथमत: विंशशतके एकविंशशतके च विरचितानि काव्य-नाटकानि, यानि विषयदृष्ट्या अभिनवत्वं प्रतिपादयन्ति तानि भवन्ति आधुनिकानि । द्वितीयत: समसामयिक-समस्यामवलम्ब्य विरचितानि काव्य-नाटकान्यपि आधुनिकानि । अन्ते च प्राचीना प्रसिद्धा कथा येषु नूतनतया परिवेशिता तानि सर्वाणि आधुनिककोट्यामन्तर्भवन्ति । अत्र विशेषत: आधुनिकसाहित्यपदेन मूलत: मौलिकं साहित्यं बोध्यते । वैदिककालादारभ्य संस्कृतसाहित्यस्य अविरामं गति: नितरां दृश्यते । भारतीयसंस्कृतसाहित्यं भवति विश्वस्य अत्युत्तमं प्रेरणाप्रदायकं साहित्यम् । पाश्चात्यगवेषक: मेक्समुलारमहोदय: तस्य " India: What can it teach us " इति ग्रन्थे कथयति " समग्रेऽस्मिन् संसारे ज्ञानीनां पण्डितानां च देश: भारतवर्ष: , यत्र विशालो ज्ञानभाण्डार: हस्तलिखितपाण्डुलिपिरूपेण सुरक्षितोऽस्ति"[1] । वैदिककालादेव साहित्यशास्त्रं प्रसरति । एकादशशतके आचार्यमम्मटेन काव्यप्रयोजनविषये प्रतिपादितं यत् – यशप्राप्ति: अर्थप्राप्तिस्तु वर्तमानकाले नाधिकं प्रेरकम् ।[2] जिह्वाया: आस्वादनाय यथा षट् रसा: प्रसिद्धा: तथैव हृदयस्य आस्वादनाय नवरसा: प्रसिद्धा: [3]। जिह्वाया आस्वादनं लौकिकानन्देन सम्बद्धम् । हृदयस्य आस्वादनञ्चालौकिकानन्दकोट्यामन्तर्भवति । यतो हि अलौकिकानन्दस्य साक्षात् सम्बन्ध: वस्तुभि: न भवति केवलं

[1]Chattopadhyay, Rita, 20th Century Sanskrit Literature, Sanskrit Sahitya Parishat, , Kolkata, 2008, p.176.

[2] काव्यप्रकाश:

[3] तत्र ।

भावानुभूत्या एव । भावानुभूति-भावानुभूत्या आस्वादयोर्मध्ये भेद: विद्यते । नवरसेषु हास्यस्य रसरूपतां सर्वै: निर्विवादं स्वीकृता । मनोविज्ञानस्य पण्डितैरपि हास: मूलप्रवृत्तित्वेन गृहित: । हास्यरसविषये आचार्य: भरत: तस्य " नाट्यशास्त्रे" कथयति –

" विपरीतालंकारैर्विकृताचाराभिधान वेशैश्च ।

विकृतैरर्थविशेषैर्हसतीति रस: स्मृतो हास्य: ॥[4]"

भावप्रकाशे उच्यते – " प्रीतिर्विशेष: चित्तस्य विकासो हास उच्यते " ।[5] पुनश्च साहित्यदर्पणकारेण विश्वनाथेनोक्तम् – " वर्णादि वैकृताच्चेतो विकारो हास्य इष्यते " ।[6] अपि च दशरूपककार: कथयति –

" विकृताकृतिवाग्वेरात्मनस्य परस्य वा ।

हास: स्यात् परिपोषोऽस्य हास्यस्त्रिप्रकृति: स्मृत:"॥[7]

सुतरां हास: भवति एक: प्रीतिपरक: भाव: चित्तविकासस्य एकं रूपञ्चेति । वस्तुत: हास्योद्रेक: आकार-वेष-आचार-अभिधान-अलंकार-अर्थविशेष-वाणी-चेष्टादीनां विकृतभावेन भवति । अर्थात् यत्र अभिनेतु: वक्तुश्च आकारविकृति:, वाग्विकृति:, वेषविकृति:, चेष्टाविकृति:, अन्यान्यविकृतिश्च वर्णिता: भवन्ति । अथवा अभिनयनं भवति तत्र हास्यरस: अभिव्यज्यते । हास्यरसस्य स्थायिभावोऽस्ति हास: । वचनस्य चेष्टाया: विकृतिश्च आलम्बनविभावा: भवन्ति । नाट्यसाहित्ये यद्यपि हास्य: ( humour) उपादानत्वेन स्वीकृत: तथापि स तु न मुख्य: । भरतस्य नाट्यशास्त्रे उत्तम-मध्यम-अधमत्वेन हास्यस्य भेदत्रयं निर्णीतम् । तत्र विशुद्ध: हास्य: भवति उच्चाङ्गस्वरूप: (wit) उत्तमश्च । मध्यमस्तु मार्जित: हास्य: ( humour) । अमार्जितहास्यश्च (jest, lampoon) अधमपदवाच्य: । रसस्यास्य नेत्रनिमीलनम्, मुखविकासादयश्चानुभावा:, निद्रा-आलस्य-अवहित्थादय: व्यभिचारिभावा: । एतेषां विभावानुभावव्यभिचारिभावानां संयोगात् हास्यरसस्य निष्पत्ति: ।यथा –

"गुरोर्गिर: पञ्चदिनान्यधित्य, वेदान्तशास्त्राणि दिनत्रयञ्च ।

अमी समाध्राय च तर्कवादान् समागता: कक्कुटमिश्रपादा:" ॥[8]

प्राचीनसंस्कृत रूपकेषु प्रायश: हास्यरसस्याभिव्यक्तिर्नासीत् किन्तु शुद्रकस मृच्छकटिके बहुकालादेव हास्य-व्यङ्गयो उपस्थिति: दृश्यते । मन्ये तदर्थमेव नाट्यकारेण शकारचरित्रं चित्रितम् । नाटकेषु प्रहसनं विदूषकस्योपस्थितिरेव हास्यरसं सृजति । केचन सुभाषितश्लोका: विद्यन्ते येषु विषयदृष्ट्या, वचनदृष्ट्या च हास्यस्य यथार्थावतरणमस्ति । यथा –

" असारे खलु संसारे सारं श्वसुरमन्दिरम् ।

हर: हिमालये शेते हरि: शेते पयोनिधौ" ॥[9]

अपि च श्रुयते –

" परान्नं प्राप्य दुर्बुद्धे मा प्राणेषु दयां कुरु ।

परान्नं दुर्लभं लोके प्राण: जन्मनि जन्मनि" ॥[10]

विविधेषु ऐतिहासिक- सामाजिक- धार्मिक- श्रृंगारिक- नैतिक- राष्ट्रवादी- प्रवृत्तिविशिष्टेषु आधुनिकसंस्कृतकाव्येषु हास्यविनोदनात्मक-व्यंगात्मक-काव्यानां महत् स्थानं विद्यते । वस्तुत: प्राचीनकाले एतादृशानां काव्यानां निर्माणम् अत्यल्पमासीत् । आधुनिकसमये तु विनोदनात्मक-व्यंगात्मककाव्यानां न्यूनता प्राय: दृश्यते । वस्तुत: मनसि आनन्दस्य उत्पत्त्यर्थं हास्योत्पादनाय च व्यंगकाव्यस्योद्भव: । साम्प्रतिकेषु प्रकाशितासु पत्रपत्रिकासु विनोदनात्मकस्य व्यंगात्मकस्य काव्यस्य रचना दरीदृश्यते । आधुनिक-

[4] नाट्यशास्त्रम्,
[5] भावप्रकाश:,
[6] साहित्यदर्पणम्,
[7] दशरूपकम्,
[8] देशोपदेश:, गौडच्छात्र:। कश्मीर संस्कृतसीरिज्, १९२४ ।
[9] Chattopadhyay, Rita, 20th Century Sanskrit Literature, Sanskrit Sahitya Parishat, , Kolkata, 2008, p.201.
[10] आधुनिक संस्कृत काव्य परम्परा, पृ. ८७ ।

वंगीयकविषु वेणुधरतर्कतीर्थेन विरचिते " यमपुरीपर्यटनम्" इति लघुकाव्ये रोचकहास्यरसस्य उद्रेग: भवति । उच्यते तत्र " यमलोकमधिकृत्य अद्यापि किमपि भ्रमणवृत्तान्तं कुत्रापि केनापि न प्रकाशितं न वा तदर्थं चेष्टितम्" । विशेषत: वङ्गप्रदेशस्य राजनैतिकं सामाजिकं वातावरणञ्चाधिकृत्य व्यङ्ग्माध्यमेन प्रणितमिदं काव्यम् ।[11] आपातहास्यरसस्यान्तराले समाजस्य निष्ठुरं दिग्दर्शनं " पट्टकाष्ठिका" इति काव्ये विहितम् । व्यङ्गिद्रूपेण आधुनिकजीवनस्य भेजालसर्वस्वता सरसतया " अथ भेजालकथा" काव्ये वर्णिता । हास्यच्छलेन मनोरमदृष्ट्या दर्शनस्य सुगभीरं तत्त्वमत्र उपस्थापितम् । आन्तर्जातिकस्तरे राजनैतिकसमस्यामाश्रित्य सिद्धेश्वरेण विरचिता व्यङ्गनाटिका " धरित्री-पति-निर्वाचनम्" इति काव्यम् । निरर्थकहास्यरसपरिवेषणस्य नास्ति कोऽपि अवकाश: इत्यनेनोद्घोषितम् । तस्य सर्वेषु नाटकेषु प्रसङ्ग आयाति । सर्वाणि नाटकानि दर्शकमन:सु प्रश्नायते –

" हास्यच्छलेन कुत्रापि प्रश्न एवोपस्थाप्यते, न दीयते उत्तरम्.
न ज्ञायते वा किमुत्तरम् अस्य, सर्वैरेव वा ज्ञायते तत्" ॥[12]

राधावल्लभत्रिपाठीत्रिपाठीविरचितम् " मशकधानी" इति काव्ये धनवादी-भोगवादीसमाजस्य चित्रं प्रतिफलितम् । -- " It delineates a pathetic story of human deceit and oppression by the power corrupt rich on the powerless poor."

प्राचीनेषु हास्यप्रधानग्रन्थेषु दामोदरगुप्तस्य " कुत्तिनीमतम्" (७७९-८१३), क्षेमेन्द्रस्य " समयमातृका"(१०५०), जल्हणस्य " मुग्धोपदेश:" (११५०), प्रभृतय: अन्यतमा: । क्षेमेन्द्रस्य " देशोपदेश:" ग्रन्थे कृपण-वेश्या-गौडच्छात्र-वृद्धजामाता-वैद्य-वाणी-कायस्थादीनां दोषाणां विनोदनात्मकरीत्या विमर्श: प्रदर्शित: । दृष्टान्तरूपेण गौडच्छात्रवर्णने उच्यते –

" अलिपिज्ञोऽत्यहंकार: स्तब्धो विप्रतिपत्तये
गौड: करोति प्रारम्भं भाष्ये तर्के प्रभाकरे ।
स्पर्शं परिहरन् याति गौड: कक्षाकृताञ्चल
कुञ्चितेनैव पार्श्वेण दम्भभारभरादिव" ॥[13]

तस्यैव " नर्ममाला" काव्यस्य " परिहासनामक" प्रकरणे कायस्थ-नियोगी-राज्यपाल-गुप्तचर-लेखकादिराज्याधिकारीणां धनार्जनस्य चातुर्यमयकार्याणां वर्णनं समाजहिताय तेन वर्णितम् । उक्तञ्च –

" अपि सुजन विनोदायोम्भिता हास्यसिद्धै ।
कथयति फलभूतं सर्वलोकोपदेशम्" ॥[14]

केनचित् अज्ञातकविना विरचितस्य " सुभाषितरत्नभाण्डागार:" इति सुभाषितग्रन्थे नैकेषु पद्येषु क्वचित् हास्य-व्यंगयो: युगपत् उपस्थिति: दृश्यते । तत्र अस्ति –

" काव्यं करोषि किमु ते सुहृदो न सन्ति
ये त्वामुदीर्णपवनं न निवारयन्ति ।
गव्यं घृतं पिब निवातगृहं प्रविष्य
वाताधिका हि पुरुषा: कवयो भवन्ति" ॥[15]

कविषु कथम् इति उच्यते –

" युगपत् स्वगण्डचुम्बनलोलौ पितरौ निरीक्ष्य हेरम्ब: ।
तन्मुखमेलनकुतुकी स्वाननमपनीय परिहसन् पायात् ॥[16]

बहुषु काव्यभेदेषु व्यंगोऽन्यतम: । यत्र उपहासस्य आलोचना दृश्यते । अत्र आङ्लो प्रतिशब्दो भवति स्याटायर (Satire) । मध्यकालीनव्यंगस्य महत्वपूर्णं कार्यं भवति युरोपप्रदेशस्य

[11] चट्टोपाध्याय़, ऋता, आधुनिकसंस्कृतसाहित्य, प्रग्रेसिवपब्लिसार्स्, कलकाता, २०१२,पृ.३७।
[12]धरित्री-पति-निर्वाचनम्,बुडोदाचरितम्, निवेदनम्, पृ.१६. ।
[13]आधुनिक संस्कृत काव्य परम्परा,पृ. १८० ।
[14] नर्ममाला, ३.११४ ।
[15] आधुनिक संस्कृत-काव्यपरम्परा, पृ.१८० ।
[16] तत्रैव ।

Devine Comedy, दान्ते महोदयस्य ल्याटिनसाहित्यश्चेति । नवरसेष्वन्यतमो हास्यरस: सर्वदा आनन्दकर: । जीवने सर्वे प्राणीन: हसितुमिच्छति । प्राचीनकाले राजान: आनन्देन जीवितुं विदूषकं कल्पयति । ऋग्वैदिककालादारभ्य वर्तमानं यावत् हास्यस्यैकाऽवच्छिन्ना धारा संस्कृतसाहित्ये प्रवहति । व्यंगेनापि हास्यस्योत्पत्तिर्भवति । शास्त्रकारै: शब्दशक्तिरूपेण व्यञ्जना स्वीकृता । गद्य-पद्यरूपेण हास्यप्राप्तिर्स्यात् । यद्यपि काश्चन हास्यकथा: प्राचीनसंस्कृतज्ञै: लिखिता: किन्तु ता: विशुद्धा: हास्यकथा: इति वक्तुं न शक्यते ।

साहित्यिकदृष्ट्या भाषादृष्ट्या च ड.प्रशस्यमिश्रस्य ड. शिवस्वरूपतिवारी महोदयस्य रचना न प्रौढा । कवय: स्वकीयया व्यंगकवितया समाजस्य कुरीति-भ्रष्टाचार-स्वार्थलोलुपतादीन् शब्दवाणेन लोके प्रकाशयन्ति । ड.तिवारीमहोदयस्य "सुहासिका" इति काव्ये मनोरम: आनन्दवर्धक: स्वस्थश्च हास्य: प्रकटित: । तस्य ग्रन्थारम्भे विहितायां गणेशवन्दनायामपि हास्योद्रेग: दृश्यते । -

" नमस्तस्मै गणेशाय योऽतिभीत: पलायते ।
मूषकं वाहनं वीक्ष्य प्लेगाशंकाप्रपीडित: " ॥[17]

भ्रष्टाचारस्य स्तुतिरपि श्लोकेऽस्मिन् विहिता –

" उत्कोच: परमं मित्रं धूर्तता धर्मसंगिनी ।
स्वार्थस्तु गुरुर्यस्य भ्रष्टाचारं भजाम्यहम्" ॥[18]

काव्यस्यास्य प्रथमे भागे हास्य-व्यंगौ चर्चितौ । हास्यकविताक्षेत्रे सर्वज्ञात: कवि: भवति ड.प्रशस्यमिश्रशास्त्री स: " अनभीप्सितम्" इति ग्रन्थं विलिख्य साहित्यअकादमीपुरस्कारं प्राप्तवान् । " सुध्युपास्यम्" इति काव्यस्य मंगलाचरणे तेनोक्तम् –" विटपस्थकालिदासेभ्यो नम:" ।

" कश्मीरपण्डितजनान् न हि चिन्तयन्ते
लेहस्थ बौद्धजनतां न विचारयन्ते ।
किं चाल्पसंख्यकपदेन न ते गृहीता:
पृच्छामि तांस्तु विटपस्थितकालिदासान्" ॥ [19]

तस्य प्रेमिका प्रकरणे राजनैतिकं संकेतमाधारीकृत्य अर्थध्वनि: स्मुत्पन्ना । यस्तु संस्कृतवाङ्मये नूतन: प्रयोग: ।

उदाहरणं यथा

"यथा त्वं भाजपा चिह्नं प्रिय मह्यं प्रदत्तवान् ।
अहं कांग्रेसचिह्नं तत् तुभ्यं दत्तवती तथा" ॥ [20]

अनन्तरं कालिदासस्य ग्रन्थेषु विनोदस्य स्वाभाविक:, प्रासङ्गिक: शाब्दिकश्चेति रूपत्रयं दृश्यते । विदग्धकवि: कालिदास: यथास्थानं असम्बद्धता-अनपेक्षितता-कृत्रिमतादिभि: कारणै: उक्तविनोदस्य रूपत्रयस्य हास्योत्पादकं चमत्कारमुत्पादयति । तस्य अभिज्ञानशकुन्तलम् नाटऽपि द्वितीय-पञ्चम-षष्ठाङ्केष विदूषकचेष्टायाम् उक्तिद्वारा च हास्यरसस्य अभिव्यक्तिर्भवति । यथा द्वितीयाङ्के " किं मोदकखादिकायाम्"[21] अथवा " त्रिशङ्कुरिवान्तरात्मा..." [22] कालिदासस्य विनोदस्तु सौम्यप्रकृतित्वात् हास्योत्पादक:, न च अट्टहासजनक: । अष्टादशशतके वाञ्छानाथेन प्रणीतं " माहिशशतकम्" इति हास्यप्रधानं काव्यं समुपलभ्यते । यत्र महिशस्य संकेतरूपेण काव्यस्याधुनिकता प्रकटिता । इदन्तु एकं अन्यापदेशकाव्यम् (Satirical Piece) । यद्यपि प्राचीनपरम्परादृष्ट्या शतककाव्यमिदम्, तथापि तत्र लौकिकसंस्कृतसाहित्यस्य नास्ति कोऽपि लेश: । काव्येऽस्मिन् नास्ति कोऽपि वीर:

[17] झा. जगदानन्द,अन्तर्जाल, हास्य काव्य परम्परा तथा सम्स्कृत के हास्य कवि।
[18] तत्रैव,
[19] तत्रैव,
[20] तत्रैव।
[21] अभिज्ञानशकुन्तलम्, द्वितीयाङ्क:,पृ.११३।
[22] तत्र, पृ.१४७।

नायक: काऽपि वा सुन्दरी नायिका , न च प्रेमानुभूतिरिति । केवलश्चात्र क्रोध: प्रकटित: । अत: इदन्तु व्यतिक्रमं काव्यम् । राजा-महिषयोर्मध्येऽत्र तुलना जाता । तन्मते राजा-महिषयोर्मध्ये महिष: एव श्रेय: । उच्यते तर्हि –

" धन्यं सैरिभमेकमेव भुवने मन्ये किमन्यैर्नृपै-
र्यो धान्यैश्च रक्षति जनान् सर्वोपकारश्रम:" । [23]

अस्मिन् काव्ये शब्दश्लेश-अर्थश्लेशायो: सम्यक् व्यवहारो दृश्यते । दृष्टान्तरूपेण उच्यते –

" कौपीनाङ्कतया स्थितोऽसि चरसि त्वं दण्डहस्तान्वित:
सोत्साहं बलिना समं कलयसि स्पर्धां प्रतिस्पर्धिना ।
पादं न्यस्त रसातले स्ववपुषा त्वं पुष्करं गाहसे
तेन त्वां महिष त्रिविक्रमकृतं नारायणं मन्महे" ।। [24]

सम्प्रति अनुकरणमूलककाव्यानां वहूलं प्रणयनं भवति । एतानि सामाजिक-राजनैतिक-व्यङ्गविनोदनं प्रस्तौति । तेषु अनुकरणमूलकव्यङ्गस्य चत्वारि रूपाणि दृश्यन्ते । यथा – क. पुराणानुकरणम्, ख. गीतानुकरणम्, ग. मेघदूतकाव्यानुकरणम्, घ. स्तोत्रकाव्यानुकरणश्चेति । आधुनिकयुगे त्रय: कवय: प्रसिद्धा: विद्यन्ते ये पुराणशैल्या काव्यप्रणयणं कृत्वा सामाजिककुरीतिनां, कुपरम्परान, अनाचारान् प्रति च व्यङ्गभावं प्रतिपादयति । ते भवन्ति रामपाणिवाद: (१३०७-१३८१), बाबादीक्षितवाद्वे( १८१५) नरसिंहाचार्यपुणेकरश्चेति ।

केरलप्रदेशस्य प्रसिद्ध: कवि: रामपाणिवाद: तस्य "पाठकाचार्यक्रम:" इति काव्ये छद्मवेशधारीणां धूर्त्तांणामुपहास: जात: । स: कथयति मूर्खाणां छद्मवेशधारणादेव समाजे तेषां सम्मान:, प्रकृतपण्डितानान्तु मर्यादा नास्ति । अल्पज्ञजना: कथं महासभायां प्रविश्य जनान् अयथार्थमर्थं प्रेषयति तदत्र वर्णितम् । पुराणशैल्या: शिष्यजिज्ञासा भवति –

" को वा पाठकदीक्षायामधिकारी भवेदिह ।
को वेष: का च वा वृत्ति: पाठकस्य महामते" ॥ [25]

पुनश्च -

" इत्युक्तस्य ब्रह्मबन्धुस्तस्मै सर्वमवर्णयत् ॥
हन्त ते कथयिष्यामि पाथकाचार्यमुत्तमम् ।
एतादृशस्य प्रश्नस्य वक्ता श्रोता च दुर्लभ:" ॥ [26]

एवं कवि: प्रश्नोत्तरमाध्यमेन छद्मवेशी-अल्पज्ञं प्रति तेषां धूर्त्ततां प्रति च व्यङ्गात्मिका दृष्टि: प्रददाति ।

ऊणविंशशतके बाबादीक्षितवाटवे तस्य " कल्पित-कलिवृत्तादर्शपुराणम्" काव्ये धर्मच्यूत-अनाचारमार्गानुसारीनां वयबृद्धानां वचनानि तिरस्कारी, पाश्चात्यसभ्यताम् आदर्शत्वेन मन्यमानान् युवकान् प्रति आक्षेप: सञ्जात: । काव्येऽस्मिन् हरिदासलक्षणं, सन्तलक्षणं, साधुलक्षणं, शास्त्रीलक्षणं, पण्डितलक्षणं, गृहस्थलक्षणं, सामाजिकसंस्कार:, विप्र-चण्डालभेद:, गर्दभारोहणनिर्णय:, उन्नतिशब्दार्थ:, गणिकोपभोगादय: विषया: वर्णिता: । तत्र साधुलक्षणप्रतिपादने कवि: कथयति –

" साधुवन्ति स्वकार्यं ये कपटेनैव सर्वदा ।
ते साधवा: समाख्याता: साम्प्रतं मूर्खमण्डले" ॥ [27]

श्वपालननिर्णये उच्यते –

" शुनां रथा प्रकर्तव्या द्विजेन नियमात्सदा ।
प्रत्यक्षफलदायित्वात्सपत्नीकेन तातवत् ॥
मेनकाचुम्बनात्स्वादु श्रीमतां च श्वचुम्बनम् ।
तिलोत्तमालिङ्गनाच्च श्वाश्लेषश्चातिसौख्यद:" ॥ [28]

---

[23] Mahishasatakam of Vancanatha.
[24] आधुनिक संस्कृत-काव्यपरम्परा, पृ.१८९ ।
[25] संस्कृत रत्नाकर, १.१२.१९५६ ।
[26] पाठकाचार्यक्रम:।
[27] कल्पित-कलिवृत्तादर्शपुराणम्, साधुलक्षणम् ।
[28] तत्र,श्वपालनम् ।

एवं धारवाडप्रदेशस्य कित्तुरनिवासी नरसिंहाचार्यपुणेकर: " मृत्तिकावृषभकथापूजा" काव्ये सामाजिकीं दुर्नीतिं प्रति दण्डप्रयोगं कृतवान् ।

धारवाडस्य सहस्रबुद्धेशास्त्रीणा प्रणीते " चहागीता" काव्ये आधुनिकसमाजे सुप्रचलितं व्यसनं प्रति मार्गनिर्देश: विहित: । सप्ताध्यायात्मिकेऽस्मिन् काव्ये पुष्पिकासु लिखितं यत् – " इति श्रीचहागीतासूपनिषत्सु रथ्याकुल्यायां पतनशास्त्रे"।[29] " श्रीचहागीताध्यानम्" इति ग्रन्थारम्भ: गीताया: " पार्थाय प्रतिबोधाय" इति पद्ये दृश्यते –

" भक्तेभ्य: प्रतिबोधितां भगवता पेयेश्वरेण स्वयं ।
मूर्खाणां विषवर्षिणीं भगवतीं वंशाचलाध्यायिनीम् ।
अम्ब त्वामनुसन्दधामि खलु "टी" पयोद्वेषिणीम्" ॥ [30]

अस्या: गीताया: चतुर्थाध्याये विद्यार्थीदशा कथिता । अद्यतनीया: छात्रा: कीदृशी व्यसनासक्ता: तदेवात्र समुपवर्णिता: । पिता-पुत्रयो: संवाद: परिहासपूर्णतया उल्लिखित: । उच्यते तत्र –

" पितोवाच – सेवसे मदिरां कस्मात् ?
पुत्र आह – स प्लेग प्रतिबन्धिका" ॥ [31]

छात्राणां धुम्रपानं प्रति व्यङ्गं प्रकाशयन् कवि: कथयति –

" बिडी हरत्यध्ययनश्रमं न: बिड्येव चेत: कुरुते प्रसन्नम् ।
बिड्येव वातं विदधातिपूतं विश्रान्तिहेतुर्न बिडीं विनाऽन्यत् ॥
निषेवते यो बिडिमादरेण न बाधते तं सलिलं न वात: ।
यस्यास्ति स-म्याच बिडी समूहो भवन्ति मित्राणि बहूनि तस्य"॥ [32]

अपि चोक्तम् –

" बिड्येव भार्या खलु शीतकाले बिड्येव मित्रं भवति प्रवासे ।
बिडी स्वधूमेन नरस्य क्षुत्-तृड्पीडां च दूरीकुरुते
अल्पकालम्" ॥ [33]

ग्रन्थस्यास्य सप्तमेऽध्याये समाजे प्रचलितस्य दूराचारस्य चित्रणं जातम् । उच्यते तर्हि कविना –

"स्वकीयसूनून् प्रहरन्तिलत्तया स्कन्धेन वेश्यातनयात् वहन्ति
मन्यन्तेऽरि मोहतो धर्मपत्नीं प्राणेभ्योऽपि प्रेयसीं
वार्नारीम्" ॥ [34]

अत: कवि: उपदेशत्वेन कथयति – मद्यपायीन: न्यूनमशिक्षिता: इति । उच्यते च –

" यत्र पेयेश "टी" देवो यत्र कप्पधरा नरा: ।
तत्राल्पायुर्विपद् रोगा ध्रुवाऽनीतिर्मतिर्मम" ॥ [35]

अनन्तरञ्च कफी विषये बहूनि विनोदनात्मककाव्यानि विरचितानि । यथा आत्रेयविरचिता " कफिषोडशिका", सम्पत् कुमार आचार्येण विरचितम् "कफीपानीयम्" वेङ्कटेश्वरेण प्रणीतम् " कफिशतकम्" काव्यञ्च प्रकाशितम् । " कफिशतकम्" इति काव्ये एवं विनोदनात्मकं वाक्यं लिखितं यत् –

" यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि सर्वाणि नश्यन्ति कफिपानात् पदे पदे" ॥[36]

एतादृशं व्यङ्गात्मकं काव्यं भवति सुरतप्रदेशे आयोजितं जातीयकंग्रेसाधिवेशनमवलम्व्य एल.रङ्गिलादासेन प्रणीतं व्यङ्गात्मकं काव्यं " कंग्रेसगीता" इति ।

साम्प्रतिके काले कालिदासस्य मेघदूतस्य परम्परया बहूनि व्यङ्गकाव्यानि विरचितानि । अधुना एतादृशस्य व्यङ्गात्मकदूतकाव्यस्य माध्यमेन चौर- अपराधी-कामुक-मूर्खै: परिव्याप्तसमाजे चित्रितम् । एतादृशं प्रसिद्धं काव्यं भवति चिन्तामणि-रामचन्द्रसहस्रबुद्धेविरचितं " काकदूतं काव्यम्" ।

---

[29] चहागीता, १.१।
[30] तत्रैव,
[31] तत्र, ४.३४।
[32] तत्र,४.३३।
[33] तत्रैव,
[34] तत्र,७.४ ।
[35] तत्र, ७.७३ ।
[36] संस्कृत-साहित्य-परिषद् पत्रिका,१९४१, एप्रिल ।

रामावतारशर्मणा विरचिते " मुद्गरगीतम्" इति काव्ये धूर्त्तोणां व्यङ्ग्ध्वनि: श्रूयते । उच्यते तत्र –

" किं मे पुत्रैर्गुणनिधिरयं तात एवैष पुत्र:
शून्यध्यानैस्तदहमधुना वर्त्तये ब्रह्मचर्यम् ।
कश्चिन्मूर्खश्चपलविधवास्नानपूतोदकेषु
स्वान्ते कुर्वन्निति समवसत्कामगिर्याश्रमेषु" ॥[37]

अपि च स्तोत्रकाव्यान्यनुसृत्य नैकानि व्यङ्गकाव्यानि विरचितानि । दिल्लीस्थेन गुरुदयालुशर्मणा कृतं " भगवतीस्तवराज:" इति काव्यं स्तोत्रकाव्यानुसारी । अत्र आधुनिकयुवत्या उपहासत्वेन न्यासं साधयति – " अस्य भगवतीस्तोत्रस्य देवीदासऋषि:, उपजातिछन्द:, रतिर्बीजं , नेत्रे शक्ति :, कुचौ कीलकम्, महाचण्डीदेवता, भक्तजनमारणमोहनोच्चाटने विनियोग:" ।[38] एतादृशि काव्ये प्रायश: समस्यापूर्ते: प्रयत्न: सञ्जात: । सुतरां मनसि आनन्दस्य उत्पत्त्यर्थं हास्योत्पादनाय च व्यंगकाव्यस्य महद्वदानमस्त्येव । हास्यरसेन सह समाजसंस्करणं भवति व्यङ्गकाव्यस्य मूलमुद्देश्यमिति दिक्।

## सहायकग्रन्थानिक्रमणिका

१. गांवकर,श्री केशवराव, आधुनिक संस्कृत काव्य परम्परा, चौखम्बा विद्याभवन, वाराणसी, २००४ ।

२. क्षेमेन्द्र:, देशोपदेश:, कश्मीरसंस्कृतसीरिज,१९२४ ।

३. शास्त्री, सहस्रबुद्धे,चहागीता,प्रकाशक, ड. हीरालाल् शुक्ल

४. संस्कृतसाहित्य परिषद् पत्रिका, १९४१ ।

५. स्वामी. सुरजनदास:, रससिद्धान्त की शास्त्रीयसमीक्षा, हंसा प्रकाशन, जयपुरम्, २००० ।

६. Vancanatha, Mahishasatakam, Edt. Tripathy, Radhavallabha, New Bharatiya Book Corporation, New Delhi, 2010, p.VI.

७. Bhattacharya , Narendra nath & Chattopadhyay Dipak, Theatre in ancient India, cover page, Essays of Siddheswar chaattopadhyay edt. by and New Delhi, 1993.

८. Chattopadhyay, Rita, 20th Century Sanskrit Literature, Sanskrit Sahitya Parishat, , Kolkata, 2008, p.176.

---

[37] मुद्गरदूतम्, १ ।

[38] संस्कृतरत्नाकर, प्रथमोऽङ्क:, १.१२.१९५६ ।

# श्रीमधुभारतीमहकविरचितकृपास्मृतेः दर्शनिकविश्लेषणम् ।

**श्रद्धा उपाध्ये**

भारतीय दर्शन विभागः क.का.सं.वि.रामटेकम्

## शोधसारांशः

*एकविंशतितमे शतके विद्यमानानां कवीनां काव्यपरिशीलनदृष्ट्या समायोजिते अस्मिन् अन्ताराष्ट्रिये चर्चासत्रे सर्वादौ उत्कृष्टस्यास्य विषयस्य चयनार्थम् आयोजकसमितिसदस्यान् अभिनन्दामि । **मातुःपराम्बायाःकृपाअनवरतमेव अवतात्** `इति आशयं निवेदयन्तीयं रचना मुहुर्मुहुः आकर्षयतिद्रावयति च सश्रद्धस्यचित्तम् । कस्या अपि विशिष्टदेवतायाः नामोल्लेखं विना विरचितं शतश्लोकात्मकं स्तोत्रमिदम् । आदौपञ्चाशत्श्लोकेषु निबद्धं काव्यमिदं गुर्वाज्ञया शतश्लोकेषु परिणतमिति ।**गुर्वाज्ञयेदंशतकंचिकीर्षुः पुनःप्रवृत्तोस्मिकृपाभिसिन्धौ** । **(कृपास्मृतिः-५१)** अनेन श्लोकांशेन ज्ञायते । कृपाशतश्लोकी इयं कविहृदयं दार्शनिकतत्त्वानि च द्योतयति इति वाचकभाग्यम् । अस्मिन्लेखे परमदार्शनिकस्य मधुभारतीमहाकवेः **कृपास्मृति**नामिकायां शतश्लोक्याम् आगतानां दार्शनिकतत्त्वानां माध्यमेन काव्यपरिचयःकार्यते ।*

***कृपास्मृतिशतश्लोक्याः संख्यादृष्ट्या विषयविभागः -***

*कृपास्मृतेरवलोकनेन ज्ञायते यत् महाकवेर्जीवनस्य भागभूतस्य अद्वैतस्य मुख्यांशानां प्रतिपादनम् २१श्लोकेषु, कृपायाः दार्शनिकतत्त्वदृष्ट्या वर्णनम् ११ श्लोकेषु, योगदर्शनस्यांशाः ५श्लोकेषु, गीतायां प्रतिपादिताः अंशाः ७श्लोकेषु, भक्तेर्गरीयस्त्वम् ७श्लोकेषु, शरणागतेर्महत्त्वम् २श्लोकयोः, गुरुवर्णनम् २श्लोकयोः, विधिवर्णनम् १ श्लोके आगतमस्तीति ।*

***पारिभाषिकशब्दावली*** *– भेदहानिःजगन्मिथ्यात्वं, उपासना, चित्तशुद्धिः*

आआदिकवेः वाल्मिकेः प्रवाहितेयं सुरसरित्कालक्रमेण न लुप्ता न च कृशाङ्गतां गता अपितु स्वकीयकाव्याधाराभिः अनवरततया सुप्रवाहितास्तीति नूनं प्रमोदगौरवावहम्।

**कविपरिचयः -**

**पुराणमित्येव न साधु सर्वमिति(मालविकाग्निमित्रम्)** प्रमाणयन्तः कवयः अस्मिन् शतके अपि स्युः नाम विविधबिरुदभाजः तथापि तेषु मुकुटमणिरूपेण चकास्ति देदीप्यमानदिनमणिरिव मधुभारतीमहाकविः । **जन्तूनां नरजन्म दुर्लभं(विवेकचूडामणिः-२)** लोके तत्रापि भारते स्थितिः इति यथा विद्वान्सः वदन्ति तथा एकस्मिन् एव व्यक्तित्वे **बहूनाम् उत्कृष्टगुणानांसमवायः** दुर्लभतयैव प्राप्यते । यथा – षड्भाषावित्त्वम्, महाकवित्वम्, प्रचीनार्वाचीनशास्त्रवेत्तृत्वम्, सर्वेषु शास्त्रेषु मर्मदर्शिपाण्डित्यम्, भाषायां व्यक्तित्वे च माधुर्यम्, अजातशत्रुत्वम्, ऋजुत्वम्, विनम्रता च देवदुर्लभानाम् गुणवान धनी अस्ति **आचार्यः मधुसूदनपेन्नावर्यः** । तस्य ग्रन्थनामानि एव मम वचनपुष्टै पर्याप्तानि । यथा-

**ग्रन्थपरिचयः -**

| अक्र. | ग्रन्थनाम श्लोकसंख्या च | ग्रन्थप्रकारः | ग्रन्थाधारितं शास्त्रम् | विषयः वैशिष्ट्यं च |
|---|---|---|---|---|

| | | | | |
|---|---|---|---|---|
| १. | श्रीकाव्यकण्ठचरितम् (२१सर्गात्मकम्)(८५०श्लोकाः) श्रीप्रज्ञाचाक्षुषम् (१०सर्गात्मकम्) (८५० श्लोकाः) | महाकाव्यम् | अलंकारशास्त्रम् | काव्यकण्ठगणपतिमुनि-चरित्रपरकम् |
| २. | वसुधैवकुटुम्बकम् (१२०) | लघुकाव्यानि | अलंकारशास्त्रम् | राहूलसांकृत्यायनचरित्रम् |
| | मुद्गलचरितम् (६०) | | | मुद्गलमहर्षिचरित्रम् |
| | नरमेधः (५५) | | | अमेरिकादेशस्य युगुलभवननाशम् आद्धृत्य रचितम् |
| ३. | काव्यकण्ठो विजयते | रूपकम् | अलंकारशास्त्रम् | काव्यकण्ठगणपतिमुनि-चरित्रपरकम् |
| | काकदूतम् | दूतकाव्यम् | अलंकारशास्त्रम् | |
| | देवरातवैभवम् (५०) | रूपकम् | अलंकारशास्त्रम् | देवरातमहर्षिचरित्रम् |
| | तत्त्वसुषमा | | दर्शनम् | |
| ७ | शारदास्तुतिः श्रीगुरुवैभवम् आवेदनम् कृपास्मृतिः श्रीवैभवम् | स्तोत्रवाङ्मयम् | अलंकारशास्त्रम् | सरस्वतीस्तुतिः श्रीरमणमहर्षिस्तोत्रम् श्रीगायत्रीस्तोत्रम् कृपास्तोत्रम् श्रीलक्ष्मीस्त्रोत्रम् |
| ८ | गुलाबगीता | श्रीगुलाबरावमहारज-दर्शनम् | मधुराद्वैतम् | श्रीप्रज्ञाचाक्षुषम् इति महाकाव्यस्य अन्तिमभागः |
| | योगसूत्रसारः | पातञ्जलसूत्राणां पद्यमयसारः | योगदर्शनम् | सर्वेषां प्रसिद्धभाष्यानां मुख्यांशसङ्ग्रहः |
| १० | मुद्गलचरितम् | चरित्रकाव्यम् | | |
| ११ | अनुवादग्रन्थाः | | | |
| १२ | वैयाकरणभूषणसारः | आङ्ग्लानुवादः | व्याकरणम् | |
| १३ | अद्वैतसाम्राज्यम् | विशिष्टाद्वैतम् | दर्शनम् | आङ्लानुवादसहितः |
| १४ | मधुराद्वैतसिद्धिः | संस्कृतानुवादः | दर्शनम् | मधुराद्वैतप्रतिपादकः आद्यसंस्कृतग्रन्थः |
| १५ | भक्तिसूत्रभाष्यम् | पाण्डुलिपिसम्पादनम् | योगदर्शनम् | शाण्डिल्यभक्तिसूत्राणाम् अभिनवव्याख्यायाः विवरणात्मकः |

| | | | | |
|---|---|---|---|---|
| १६ | द्रव्यसारसङ्ग्रहः | सानुवादग्रन्थसम्पादनम् | वैशेषिकदर्शनम् | वैशेषिकदर्शनस्य अज्ञातप्रकरणग्रन्थः |

अत्र विस्तरभयात् महाग्रन्थरत्नाकरात् संस्कृतकृतिमौक्तिकानि एव विचित्य अत्र सङ्गृहितानि।

मधुभारतीमहाकविरचितग्रन्थानां प्रकारः संख्यादृष्ट्या विभगश्च -एतेषु सर्वेषु अपि ग्रन्थेषु मौलिकता शास्त्रवैविध्यं च वरीवर्तते । **अधुना एतेषु कृपास्मृतिनामकम् लघुकाव्यमेकम् परिचाययितुम् यत्नः क्रियते।**




**कृपास्मृतिः -**

कविना रचितेषु काव्येषु कृपास्मृतिनामकम् एकम् लघुकाव्यम् स्तोत्रकव्यरूपेण प्रसिद्धम् । भारतदेशे स्तोत्रवाङ्मयं प्रचुरमात्रया उपलभ्यते । तत्रापि आदिशङ्कराचार्यैः विरचितस्य स्तोत्रवाङ्मयस्य प्रसिद्धिः सर्वविश्रुता वर्तते । आधुनिककालेपि **भारतीतीर्थस्वामिभिः** रचितम् **महाविष्णुस्तोत्रं(गरुडगमन तव चरणकमलमिह मनसि लसतु मम नित्यम्।)** नितरां वैशिष्ट्यमावहति । अद्यावधि असंख्यानि स्तोत्राणि विविधैः कविभिः नानाविधकामनानां पूर्त्यै विरचितानि दृश्यन्ते । प्रायः सर्वोपि कविः एतादृशानि स्तोत्रसुमानि तत्तदिष्ट्देवताचरणयोः समर्प्य आत्मनिवेदनेन चित्तशुद्धिमाप्तुं यतते । केचन च पौनःपुन्येन तानि ग्रथयित्वा देवतासामीप्यं समाप्नुवन्ति । तथापि मधुभारतीसदृशाः विरला एव केचन नवविधस्तवनेन मातरम् आनन्दयन्ति । कृपास्मृतिः तादृशी एव ।

**`मातुः पराम्बायाः कृपा अनवरतमेव अवतात्`** इति आशयं निवेदयन्तीयं रचना मुहुर्मुहः आकर्षयति द्रावयति च सश्रद्धस्य चित्तम् । कस्या अपि विशिष्टदेवतायाः नामोल्लेखं विना विरचितं शतश्लोकात्मकं स्तोत्रमिदम् । आदौ पञ्चाशत् श्लोकेषु निबद्धं काव्यमिदं गुर्वाज्ञया शतश्लोकेषु परिणतमिति

**गुर्वाज्ञयेदं शतकं चिकीर्षुः**

**पुनः प्रवृत्तोस्मि कृपाभिसिन्धौ । (कृपास्मृतिः-५१)**

अनेन श्लोकांशेन ज्ञायते । कृपाशतश्लोकी इयं कविहृदयं दार्शनिकतत्त्वानि च द्योतयति इति वाचकभाग्यम् । अस्मिन् लेखे परमदार्शनिकस्य मधुभारतीमहाकवेः **कृपास्मृति**नामिकायां शतश्लोक्याम् आगतानां दार्शनिकतत्त्वानां माध्यमेन काव्यपरिचयः कार्यते ।

**कृपास्मृतौ सन्निविष्टानां दार्शनिकतत्त्वानां माध्यमेन काव्यपरिचयः –**

कृपास्मृतेः पठनसमये अवलोकातानां तद्गतदार्शनिकतत्त्वानाम् सङ्कलनम् अत्र कोष्ठकमाध्यमेन कृतं विद्यते । तस्य विवरणम् अग्रे द्रष्टुं शक्यते ।

| कृपास्मृतौ सन्निविष्टानि दार्शनिकतत्त्वानि | श्लोकसंख्या |
|---|---|
| **१.अद्वैतम् -** | |

| | |
|---|---|
| भेदहानौ उपायः | (६४)(८०) |
| जगन्मिथ्यात्वम् | (१९) (७१) (७२) (७३) (७४) (७५)(८१) |
| सर्वं खल्विदं ब्रह्म । | (८६) |
| उपासना, मानसपूजा | (३१)(६८) |
| चित्तशुद्धिः | (२८,२९,३०,६५,९१) |
| संस्कारः | (६६) |
| शास्त्रसमन्वयः | (३३) |
| जीवन्मुक्तिः, विदेहमुक्तिः | (९५) |
| कठोपनिषद् | (५७) |
| २.कृपा - | |
| कृपाभावे दुर्गतिः | (४०)(४६) |
| कृपा सर्वदेवीरूपिणी | (१३) |
| गुरुलाभः कृपातः | (५१) |
| शास्त्रतत्त्वाकलनमपि कृपायाः | (५३) |
| तपस्विषु भासमाना कृपा एव | (५५) |
| कवेः जिज्ञासुत्वात् ज्ञानीरूपेण परिणतिः कृपायाः | |
| कृपा पृथक्पदार्थः | (६०) |
| शास्त्रारण्ये मार्गदर्शिनी | (२७) |
| विरक्तेरुपायः | (४२)(५८) |
| ३.योगः | |
| मेरुदण्डवर्णनम्, कुण्डलिनी जागरा च | (३४) |
| मृत्युभयम् | (२०) |
| योगिनामपि दृढः अभिनिवेशः। | (९४)(२२) |
| योगो भयहारि, | (७९) |
| ४.गीता - | |
| न हन्यते हन्यमाने शरीरे | (२१) |
| विभूतिः कृपैव | (१८) |
| ममैवांशो | (८६) |

| | |
|---|---|
| **कर्मानुबन्धीनि** | (८७) |
| **इन्द्रियाणि प्रकृतिस्थानि कर्षति ।** | (८९) |
| **५.उद्दिधीर्षा** | (५९) |
| **६.भक्तेर्गरीयस्त्वम्** | (४८)(४९)(५६)(६९)(९२)(९३)(९६) |
| **७.चतुर्धा वाणी** | (३७)(३८) (४३) (४०) |
| **८.तादात्म्यम् –** | (७७)(७८) (१७) (९) |
| **९.गुरुस्मरणम्** | (२३) (८३) |
| **१०.शरणागतेर्माहात्म्यम्** | (३९) |
| **११.शून्यवादखण्डनम्** | (६३) |
| **१२.विधिवर्णनम्** | (६७) |

**अद्वैतवेदान्तप्रतिपादकांशाः** - कस्यापि दार्शनिकसिद्धान्तस्य प्रतिपादनधिया अस्य स्तोत्रस्य रचना नैव कृता आचार्यवर्येण । भगवत्कृपायाः स्तवनं, तद्विषये कार्तज्ञाभिव्यक्तिः च मूलतया अनुलक्ष्य आविर्भूतं भगवदनुसन्धानमेव हि तत् । तथात्वेपि कवेः मनःकोणे अवस्थितानां दार्शनिकतत्त्वानां माध्यमेन विहितम् एतत् स्तवनं नूनं आदिशङ्कराचार्याणां संस्मारणं कारयति ।

**ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ।(विवेकचूडामणिः -२८)**

इति सुप्रसिद्धस्य श्लोकांशस्य निदर्शकः अस्ति अयं श्लोकः –

**यद् ब्रह्मदृष्ट्या जगदस्ति मिथ्या ।**
**तज्जीवदृष्ट्या तु ननु सत्यमेव ।**
**जीवो यया सत्यपदं प्रयाति**
**सा ते कृपा मामवतात् सदाम्ब ॥**

अस्य वैशिष्ट्यं नाम अस्य अद्वैततत्त्वस्य निरूपणं यथार्थज्ञानिनः दृष्ट्या कृतम् अस्ति । परम्

**देहात्मप्रत्ययो.......लौकिकंतद्वदेवेदम्**
**.........आआत्मनिश्चयात् । (१.१.४ ब्र.सू.)**

इति कथनमिव जीवदृष्ट्या जगत् सत्यमस्ति चेदपि सः सत्यपदं प्रयाति इत्युक्ते सः ब्रह्मैक्यं प्राप्नोति कृपायाः । एवं मिथ्यात्वसत्यत्वप्रतिपादनद्वारा वेदान्तोक्तप्रयोजनप्राप्तेः उपायोपि दर्शितः आचार्येण ।

**भेदहानौ उपायः –**

यत्र द्वैतं न विद्यते तदेव अद्वैतम् । जगति दृश्यमानं भेदजातं मिथ्या तत्र सत्तारूपेण ज्ञायमानं तत्त्वमेव एकमात्रं सत् तच्च ब्रह्म इति सर्वत्र अद्वैतवेदान्ते प्रसिद्धः कश्चन सिद्धान्तः । सृष्टौ भासमानेषु पदार्थेषु भेदबुद्धिः दोषवशात् जायते । अविद्या एव दोषकारणम् इति ज्ञाते भेदबुद्धिः नश्यति । एवं भेदबुद्धेः प्रहाणाय उपायकथनं श्लोकद्वयेन कृतं विद्यते । तत्रापि वैशिष्ट्यं नाम अगणितगुणशालिनः परमेशस्य ज्ञानानन्तरं तद्विषयिणी भक्तिः स्वयमेव उदेति । ततश्च ध्येयस्पष्टतायाः कारणेन ध्यानं शक्यते इति प्रतिपादितम् । अतः ज्ञानात् भक्तिः ततश्च ध्यानम् इति स्पष्टः कश्चन सोपानक्रमः दर्शितः देवतन्मयत्वाप्तौ ।

**ज्ञाते परेशस्य गुणौघतत्त्वे**
**भक्तिः स्वयं जायत एव तस्मिन् ।**

**तत्पृष्टतो ध्यानमथास्ति शक्यम्**

**या भेदहानौ खलु तन्मयत्वम् ॥(६४)**

**२) साम्ये मनोमेस्तु विकारजाते**

**भ्रान्तं न चोच्चावचभेदजाले ।**

**भवेद्यया शक्यमिदं तदर्थे**

**सा ते कृपा माम् अवतात् सदाम्ब॥ (८०)**

**जगन्मिथ्यात्वम् –**

वेदान्तदर्शनस्य सर्वेषु ग्रन्थेषु मिथ्यात्वस्य प्रतिपादनं खण्डनं च भूरिशः कृतं वर्तते । **मिथ्यात्वं च स्वाश्रयत्वेनाभिमतयावन्निष्ठात्यन्ताभावप्रतियोगित्वम् इति वेदान्तपरिभाषायामागतं मिथ्यालक्षणम्** । कार्यात्मना विद्यमानं सर्वं मिथ्या इति ज्ञातस्य जीवस्य मिथ्याविरहः ईशकृपया शक्यः । ये द्वैतवादिनः अन्ये सर्वेपि मिथ्यात्वं निराकुर्वन्ति तेपि ब्रह्मात्मज्ञाने निरता भवेयुः इति सदिच्छां करोति कविवर्यः । मिथ्यात्वस्य शुक्तिरजतयोः उदाहरणांशे रज्ज्वंशे सत्यत्वम्, रज्जौ सर्पभानं मिथ्येति स्फुटं प्रतिपाद्य आचार्यवर्यः अन्येषां ख्यातिवादिनां मतानि निराकरोति । मिथ्याभूतस्य प्रपञ्चस्य विवरणेन चर्चया च नास्ति किमपि सुसाधितं नरस्य । अतः सत्यविषयस्य बोधने मम मनः लग्नं भवेत् इत्यपि प्रार्थयति कविपुङ्गवः । मिथ्यासत्ययोः भेदज्ञानमात्रं न अपि तु सत्यतत्त्वस्य साक्षात्कारेण तज्ज्ञानस्य परिसमाप्तिः भवति इति शास्त्ररहस्यं जानता आचार्येण तत्त्वसाक्षात्कारार्थं विनतिः कृता वर्तते ।

कृपास्मृतेः (७१) (७२) (७३) (७४) (७५)(८१) एतेषु श्लोकेषु एतत्सर्वं वर्णनं पठितुं शक्यते ।

**सर्वं खल्विदं ब्रह्म । (छा. उप.)**

इत्यस्य सर्वज्ञातस्य महावाक्यस्योल्लखः कृपास्मृतेः (८६) श्लोके प्राप्यते । तत्र आचार्यः प्रार्थयति - ब्रह्म सर्वम् अस्ति चेत् मूर्तौ सत्यां तदभावे च सर्वदैव मम ब्रह्मबोधात्मकः साम्यबोधः भवतु इति ।

**उपासना मानसपूजा च –**

अद्वैतवेदान्तशास्त्रस्य अधिकर्तृत्वप्राप्त्यै **उपासनायाः वर्णनं चित्तशुद्धेःउपायरूपेण** भवति साधनचतुष्टये अन्तर्भावकारणात् । **(४वेदान्तसारः)** अत एव अधिकारीलक्षणस्य अन्ते **नितान्तनिर्मलस्वान्तः** इति तद्विशेषणं दत्तम् । **(४वेदान्तसारः)** मानसपूजा अपि उपासनायाः प्रकारान्तरम् । एतयोः द्वयोः अपि उल्लेखः कृपास्मृतेः (३१) (६८) श्लोकद्वये पठितुं शक्यते ।

**चित्तशुद्धिः –**

चित्तशुद्धेः असाधारणं माहात्म्यं विद्यते अध्यात्मशास्त्रे । अतः तदर्थं विशेषतया यतनीयं मनुजेन इति श्रीमद्भगवद्गीतायाम् , योगशास्त्रे, अद्वैतवेदान्ते च तत्र तत्र उपदिष्टम्। आचार्यवर्येणापि कृपायाः चित्तशुद्धिः जायते इति प्रतिपादितम् । तत्रापि भगवत्तत्वस्य बोधानन्तरमेव तद्भवति इति कथयित्वा ज्ञानिन एव चित्तशुद्धिः न तु अज्ञस्य कस्यचिदिति स्फुटं निर्दिष्टम् । आचार्यवर्णितः चित्तशुद्धिक्रमः इत्थम् – आदौ शाब्दबोधः, ततः मनोबोधः, ततः स्वानुभवः प्राप्यते । अर्थात् स्वानुभूतिः चित्तशुद्धेः फलं भवति । बीजवापकार्यादौ यथा भूशोधनम् अनिवार्यं तथा स्वानुभूत्यै चित्तशुद्धिः अनिवार्या इति वर्णितम् आचार्यवर्येण । चित्तशुद्धिः कर्मणोः पूर्वापौर्वभावः प्रसिद्धः वेदान्ते । श्रीमद्भगवगीताभाष्यारम्भे तत् तथा उपदिष्टम् **आदिशङ्कराचार्यैरपि प्रवृत्तिलक्षणो धर्मो …….. सत्त्वशुद्धये भवति इति।** अस्मदाचार्यवर्यः अपि कथयति यत् चित्तशुद्ध्यै कृतं कर्म दोषाय न भवति इति । एतत् सर्वमपि साररूपेण ग्रथितं **(२८,२९,३०,६५,९१)** एतेषु श्लोकेषु कृपास्मृतौ ।

**संस्कारः –**

चित्तशुद्धिः संस्काराद् भवति इति सर्वविदितम् । संस्कारश्च दोषापाकरणगुणाधानरूपश्च भवति । **(१.१.४ ब्र.सू.)** कृपावशात् तच्च कथं सिद्ध्यति इति पापविशोधनात् सद्गुणावापशब्दैः संक्षेपेण वदति (६६) श्लोके ।

**भक्तेर्गरीयस्त्वम् –**

मधुराद्वैतसम्प्रदाये मोक्षाद् भक्तिः गरीयसी इति मन्यते । अतः **मुक्तेरपि श्रेयसी नामरक्तिः ।(४८कृ.स्मृ.)** इति आचार्यवर्यस्य वचनम् । सामान्यतया एवं प्रकारेण वर्णनं कैरपि पूर्वाचार्यैः आदिशङ्कराचार्यादिभिः न कृतमित्यतः तथा नाङ्गीकुर्वन्ति दर्शनकेसरिणः । तेषामुत्तराय पेन्नावर्यः एवं लिखति स्वोपज्ञे पद्ये –

**दुर्मेधसां भक्तिरितीयमुक्तिः**<br>
**साध्वी न शास्त्रे गदितापि नैव ।**<br>
**ज्ञानात् परा भक्तिरिति स्वबुद्ध्या**<br>
**विचिन्वतामार्यवराः यथार्थम् ॥९२॥**

एवम् (४८,४९,५६,६९,९२,९३,९६) एतेषु सप्तश्लोकेषु भक्तिवर्णनं पठितुं शक्यते । एवम्प्रकारेण तत्त्वसौगन्ध्यभरितानि दार्शनिकसुमानि कृपास्मृतौ प्रतिपदं शोधयितुं शक्यन्ते जिज्ञासुना मधुकरेण । **मया तु विस्तरभयात् स्थालीपुलाकन्यायेन अत्र कानिचित् वर्णितानि । तथापि लेखारम्भे दत्ते कोष्ठके अन्यविधानां दार्शिनिकतत्त्वानां शोधनाय मार्गः दर्शितः अस्ति स्तोत्रपिपठिषवेभ्यः ।**

**कृपास्मृतिशतश्लोक्याः संख्यादृष्ट्या विषयविभागः -**

कृपास्मृतेरवलोकनेन ज्ञायते यत् महाकवेर्जीवनस्य भागभूतस्य अद्वैतस्य मुख्यांशानां प्रतिपादनम् २१श्लोकेषु, कृपायाः दार्शनिकतत्त्वदृष्ट्या वर्णनम् ११ श्लोकेषु, योगदर्शनस्यांशाः ५श्लोकेषु, गीतायां प्रतिपादिताः अंशाः




७श्लोकेषु, भक्तेर्गरीयस्त्वम् ७श्लोकेषु, शरणागतेर्महत्त्वम् २श्लोकयोः, गुरुवर्णनम् २श्लोकयोः, विधिवर्णनम् १ श्लोके आगतमस्तीति ।

**हृद्गतम् -**

दार्शनिकतत्त्वानाम् साक्षात् आचरणेन आदर्शभूतं व्यक्तित्वम् अस्ति अस्मदाचार्यवर्यस्य । केनचित् विदुषा,सत्कविना,दर्शनिकेन शिक्षकेण वा अनुकरणीयं जीवनदर्शनमेव आरेखितमस्ति अस्मिन् स्तोत्रे । पेन्नामहोदयेन लिखिताः सर्वेपि ग्रन्थाः यथा शास्त्रमर्मद्योतकाः, उत्कृष्टभाषाभिव्यंजकाः, पाण्डित्यपरिपाकरूपाः तथैव तस्य जीवनमपि । **चित्ते वाचि क्रियायां च महताम् एकरूपता** । इति वचनस्य निदर्शकं व्यक्तित्वम् अस्मासु राजते इति सौभाग्यशालिनः वयम् । कस्यचिदपि सत्कवेः काव्यपठनसमये तावन्मात्रं ज्ञातुं न अपि तु कविहृदयं ज्ञातुं यतनीयमिति तदीयमुपदेशमुररीकृत्य कृपास्मृतेः पठनसमये अवलोकितानां दार्शनिकांशानां माध्यमेन कविपरिचयं कारयितुम् अत्र प्रयत्नः विहितः अस्ति

**विद्यावाचस्पतेः मधुभारतीवर्यस्य काव्ये विद्यमानाः संशोधनप्रेरकविषयाः -**

एवमेव मधुभारतीमहाकविना रचितानि शारदास्तुतिः, श्रीगुरुवैभवम्, आवेदनम्, श्रीवैभवादीनि अन्यानि स्तोत्राणि,

सर्वे ग्रन्थाश्च सर्वैः पठनीयाः परिशीलनीयाश्च । तस्य सर्वविधकृतीषु संशोधनांशाः प्रचुरमात्रया प्राप्तुं शक्यन्ते इत्यतः ताः अध्येतव्याः । यथा कालिदासादिकवीनां कृतीनां पठनेन अद्यावधि बहवः कवयः सञ्जाताः तथैव मधुभारतीमहाकवेः कृतयः अपि सच्चरित्रनिर्माणाय कवित्वसृजनाय च जीवननिधिरिव पोषयितुं पर्याप्तानि । इति शम् ।

**४. उपसंहारः –**

**सारांशः - कृपास्मृतिशतश्लोक्याः तत्त्वसारः –**

**लेखेस्मिन् एतावता वर्णितेभ्यः विषयेभ्यः कृपास्मृतिशतश्लोक्याः एतानि वैशिष्ट्यानि दर्शयितुं शक्यन्ते ।**

- **कस्या अपि विशिष्टदेवतायाः नामोल्लेखं विना विरचितं शतश्लोकात्मकं स्तोत्रमिदम् ।**
- **मिथ्यात्वसत्यत्वप्रतिपादनद्वारा वेदान्तोक्तप्रयोजनप्राप्तेः उपायदर्शनम् ।**
- **ज्ञानात् भक्तिः ततश्च ध्यानम् इति स्पष्टः कश्चन सोपानक्रमः दर्शितः देवतन्मयत्वाप्तौ ।**
- **मिथ्यासत्ययोः भेदज्ञानमात्रं न अपि तु सत्यतत्त्वस्य साक्षात्कारेण तज्ज्ञानस्य परिसमाप्तिः भवति।**
- **मिथ्यात्वस्य शुक्तिरजतयोः उदाहरणांशे रज्ज्वंशे सत्यत्वम्, रज्जौ सर्पभानं मिथ्येति ।**
- **मूर्तौ सत्यां तदभावे च सर्वदैव ब्रह्मात्मकः साम्यबोधः सर्वं खल्विदं ब्रह्मेति महावाक्यस्य आशयः।**
- **ज्ञानिन एव चित्तशुद्धिः शक्या न तु अज्ञस्य ।**
- **आचार्यवर्णितः चित्तशुद्धिक्रमः इत्थम् – आदौ शाब्दबोधः, ततः मनोबोधः, ततश्च स्वानुभवः प्राप्यते।**
- **मुक्तेरपि श्रेयसी भक्तिः यथा साधनं तथैव साध्यमपि अस्त्येवेति निर्णयः ।**

**सन्दर्भग्रन्थसूची**


1) मालविकाग्निमित्रम् – चौखम्बा सुरभारती प्रकाशनम्, वाराणसी.
2) विवेकचूडामणि: - चौखम्बा सुरभारती प्रकाशनम् वाराणसी.
3) महाविष्णुस्तोत्रम् – चौखम्बा सुरभारती प्रकाशनम् वाराणसी.
4) ब्रह्मसूत्रम् – चौखम्बा सुरभारती प्रकाशनम् वाराणसी.
5) छान्दोग्योपनिषत् – चौखम्बा सुरभारती प्रकाशनम् वाराणसी.
6) वेदान्तसारः – चौखम्बा सुरभारती प्रकाशनम् वाराणसी.
7) वेदान्तपरिभाषा – चौखम्बा सुरभारती प्रकाशनम् वाराणसी.
8) श्रीमद्भगवद्गीताशाङ्करभाष्यम् – गीताप्रेस गोरखपुर, उत्तरप्रदेश

# लक्ष्मित्तम्पुराट्टिवर्यायाः सन्तानगोपालकाव्यम् – एकं समीक्षात्मकमध्ययनम्।

**स्मेराचन्द्रन्**

श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयःकालटि, (केरलम्)

smerachandran94@gmail.com

## सारांशः

*अनेकासु विश्वभाषासु संस्कृतभाषा सप्रथमं स्थानमलङ्करोति। केरलदेशस्य मलयालभाषायाः चास्तित्वे तथा विकासे च संस्कृतभाषा प्राधान्यमर्हति। केरले संस्कृतभाषायाः सम्पोषणाय, प्रचारणाय च बहवः पण्डिताः आसन्। एतया काव्यकृतीनां तथा शास्त्रकृतीनाम् अपि रचना कृता। एषु काव्यकृतिषु लक्ष्मित्तम्पुराट्टिवर्यया कृतं सन्तानगोपालकाव्यं विशेषतमं वर्त्तते। ललितमधुरयुक्तः सर्गत्रयात्मकश्च भवति अयं ग्रन्थः। भागवतकथामनुसृत्यैव काव्यस्यास्य रचना कृता। अस्य काव्यस्य इट्टालियन् परिभाषा प्रो. मरियो- वल्लौरिना कृता वर्त्तते। काव्यरचनायाः कारणं, रचनाकालः, कवयत्रियाः स्थितिकालः, काव्ये विद्यमान अलङ्कार- छन्दसां विषयपरामर्शः च अत्र सूच्यते। सन्तानगोपालकाव्यस्य समीक्षात्मकमध्ययनेन काव्यस्य वैशिष्ट्यं कियद् वर्त्तते इति निर्धारणं क्रियते।*

## उपोद्घातः

उत्तरकेरले विद्यमान कटत्तनाट् राजवंशस्था संस्कृतपण्डिता आसीत् लक्ष्मित्तम्पुराट्टी। लक्ष्मित्तम्पुराट्टी संस्कृते सन्तानगोपालं, भागवतसंक्षेपं चेति ग्रन्थद्वयस्य निर्माणं कृतवती। ग्रन्थनिर्माणे करिणीप्रसवन्यायः एव स्वीकृतः इति वटक्कुंकूर् महाशयेन सूचितम्।[93] सन्तानगोपालं यमककाव्यं भवति।[94] त्रये सर्गयुक्ते अस्मिन् काव्ये त्रिंशत्युत्तरैकशतं श्लोकाः सन्ति। स्वीयपुत्रस्य रविवर्मणः अनारोग्यावस्थायाम् तद्रोगशमनार्थम् एव अस्य काव्यस्य रचना कृता इति ग्रन्थतः ज्ञायते। भागवतकथाम् अनुसृत्य सुमधुरैः श्लोकैः एव काव्यस्य अस्य रचना कृता। यद्यपि अस्य सन्तानगोपालकृतेः रचनाकालविषये उल्लिखितप्रमाणं न प्राप्यते, तथापि कृतेः कर्त्रियाः लक्ष्मित्तम्पुराट्टिवर्यायाः जीवनकालः पञ्चचत्वारिंशत्युत्तर अष्टशतैकसहस्रतमवर्षात् (1845) प्रभृति नवोत्तरनवशशतैकसहस्रतमपर्यन्तं[95](1909) विद्यते इत्यतः ग्रन्थोऽयं नवदशशतकस्य उत्तरार्धे अथवा विंशतिशतकस्य प्रारम्भे जातमिति विद्वत्तल्लजानां मतम्।

## सन्तानगोपालकाव्यम्

सन्तानगोपालकाव्यस्य कथायां प्रारम्भे सान्दीपिनिमहर्षेः आश्रमात् गुरुदक्षिणां प्रदाय कृष्णबलरामौ प्रतिनिवृत्तौ इत्यमुमं विषयं कंसस्य बन्धने स्थिता देवकी श्रुतवती। अपि च महर्षेः सान्दीपिनेः पुत्रस्य रक्षणं समुद्रे स्थितस्य पञ्चनराक्षसस्य वधं कृत्वा कृष्णबलरामौ साधितवन्तौ, तथा च राक्षसवधेन पाञ्चजन्यशङ्खस्य प्राप्तिरपि सञ्जातः इति। अतः देवक्या स्वपुत्रयोः कृष्णबलरामयोः दर्शनसन्दर्भे तयोः पुरतः स्वकीयषड्पुत्राणां रक्षणं करोतु इति अनुज्ञां प्रयच्छत्। कृष्णबलरामौ इयं अनुज्ञा स्वधर्मम् इति मत्वा तत्पालने परिपूर्णश्रद्धां वितनुतः इति प्रथमसर्गस्य नवम श्लोकात् अस्य कार्यस्य सूचना प्राप्यते। यथा-

पुत्रं पुरा यम-पुरात् स्व-गुरोः प्रनष्टं
हृत्वापि कृष्ण कलिता किल दक्षिणाऽस्य।

---

[93]केरलीयसंस्कृतसाहित्यचरित्रम्, भागः5,पु.214.

[94]सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्ति यमकं विनिगद्यते।।

[95]केरलसाहित्यचरित्रम्,भागः4,पु.521.

आहृत्य कंस-निहतानपि षट् कुमारान्

मातुः प्रदर्श्य तरसाऽपहृतो विषादः ।।[96]

प्रथमसर्गस्यआदौ विनष्टपुत्रकस्य ब्राह्मणस्य करुणार्द्रचित्रणं कवयत्रिया सुचारुतया चित्रीकृतम्। ब्राह्मणोऽयं नवमपुत्रस्य मृतशरीरं आदाय द्वारकां प्रविश्य कृष्णं प्रति साहाय्यं कर्तुं प्रार्थयति। किन्तु उचिते समये कृष्णस्य साहाय्यं न अलभत्। पुत्रस्य वियोगदुःखेन शोकसंविघ्नमानसस्य ब्राह्मणस्य कृते अर्जुनः प्रतीक्षायाः अङ्कुरमिव साधुवचनैः तोषितवान्। पश्चात् पुत्रस्य रक्षां करिष्यामि इति प्रतिज्ञां कुर्वन् ब्राह्मणं आश्वासनं दत्तवान्। किन्तु अग्रिमपुत्रस्य रक्षणे असमर्थः अर्जुनः अग्निप्रवेशार्थं सज्जः भवति। सन्दर्भेऽस्मिन् वासुदेवः कृष्णः प्रत्यक्षीभूत्वा अर्जुनस्य कृते तत्मनोकामनाः सर्वाः सफलो भविष्यति इत्याश्वासवचनैः प्रथमसर्गं समाप्यते। अर्जुनस्य अग्निप्रवेशोद्यमपर्यन्ता कथा एव प्रथमसर्गे सुललितया शैल्या विन्यसिता। अस्मिन् सर्गे आहत्य त्रयश्चत्वारिंशत् श्लोकाः सन्ति।

द्वितीयसर्गस्य प्रारम्भे पश्चिमदिक्पालकस्य वरुणदेवस्य लोकं प्रति कृष्णः अर्जुनं स्वीकृत्य प्रस्थितवान्। गमनसन्दर्भे यमलोकादीनां विभिन्नानां लोकानां दर्शनं कृत्वा अन्ते वैकुण्ठे एव ब्राह्मणकुमारानां प्राप्तिः भवति। अतः श्रीहरेः विष्णुदेवस्य पदकमले नमस्कारोपचारादिसमर्पणेन आगमनोद्धेश्यान् प्रकटीकरोति। पश्चात् भगवतः श्रीहरेः अनुज्ञया ब्राह्मणकुमारान् स्वीकृत्य कृष्णार्जुनौ प्रतिनिवृत्तौ इति द्वितीयसर्गे प्रतिपादिता कथा। अस्मिन् सर्गे सप्तत्रिंशत् श्लोकाः सन्ति। एतदनन्तरकथा तृतीयसर्गे विवृणोति।

वैकुण्ठलोकात् कृष्णार्जुनयोः प्रत्यागमनं ततः ब्राह्मणगेहप्राप्तिना तृतीयसर्गस्य प्रारम्भः भवति। पश्चात् ब्राह्मणस्य तत्पत्नेः च पुत्राणां दर्शनेन सामोदप्रमोदः जायते। एवं कृष्णार्जुनयोः प्रशंसा, कथनं, प्रकीर्तनं च भवति। पुत्रप्राप्त्यनन्तरं सन्तुष्टस्य ब्राह्मणस्यानुग्रहम् इत्थं प्रतिपादितम्-

समधिकाधिक-मोद- विधायिनः

प्रतिविधानमहो न जगत्रये।

किमधिकं बत दातुमिदं जग-

द्विजय ते जयते भुज-विक्रमैः।।[97]

इह तु दीन- परायण सर्वदा

यदु -पतिः स ददातु हितं तव।

निज -वयोविलयेऽपि च योगिना-

मसुलभं सुलभं पदमस्तु तत्।। [98]

पश्चात् कृषणार्जुनौ द्वारकां प्राप्नोति। ततः तौ द्वौ युधिष्ठिरस्य राजसूययज्ञाय प्रस्थितवन्तौ इति तृतीयसर्गस्य कथासारम्। अस्मिन् सर्गे पञ्चाशत् श्लोकानां निवेशनं कृतम्। द्रुतविलम्बितवृत्ते यमकालङ्कारस्य निवेशनेन निर्मितः भवति तृतीयः सर्गः।

उदाः-**द्विज-वर प्रणतोऽस्मि धनञ्जय-**

स्तव पदाब्ज-युगे सह-बालकः।

अनुगृहाण विषादमशेषयन्

दयितयाऽयि ! तयाऽतिशुचार्तया ।।[99]

**समधिकाधिक-मोद- विधायिनः**

प्रतिविधानमहो न जगत्रये ।

किमधिकं बत दातुमिदं जग-

द्विजय ते जयते भुज-विक्रमैः।।[100]

**इह तु दीन-परायण सर्वदा**

यदु- पतिः स ददातु हितं तव।

---

[96]सन्तानगोपालकाव्यम्, प्रथमः सर्गः, श्लो.9.

[97]सन्तानगोपालकाव्यम्, तृतीयः सर्गः, श्लोकः8.

[98]सन्तानगोपालकाव्यम्, तृतीयः सर्गः, श्लोकः9.

[99]सन्तानगोपालकाव्यम्, तृतीयः सर्गः, श्लोकः3.

[100]सन्तानगोपालकाव्यम्, तृतीयः सर्गः, श्लोकः8.

निज -वयोविलयेऽपि च योगिना-

मसुलभं सुलभं पदमस्तु तत्।। [101]

काव्ये वसन्ततिलका, मालिनी, उपेन्द्रवज्रा, उपजाति, पुष्पिताग्रा, द्रुतविलम्बितम्, शार्दूलविक्रीडितम्, पृथ्वी, शिखरिणी इत्यादीनां छन्दसां सन्निवेशनं यथायोग्यं कृतम्। प्रथमसर्गे विद्यमाने अन्तिमश्लोकातिरिक्ते सर्वे श्लोकाः वसन्ततिलकावृत्ते एव भवन्ति। यथा-

आसीच्छ्रिया विजित- निर्जर- राजपुर्यां

कश्चित् पुरा द्विज- वरः किल कृष्ण- पुर्याम्।

सोऽयं स्वधर्म- निरतः सह धर्म पत्न्या

रेमे सुखं हरि पदाम्बु-ज-दत्त-चित्तः।।[102]

अस्मिन् सर्गे विद्यमानः अन्तिमः श्लोकः मालिनीवृत्ते भवति। यथा-

त्यज विजय विषादं साप्रतं सर्वमेव

प्रिय-सख तरसा ते वाञ्छितं साधयिष्ये।

इति सुमधुर- वाचा सान्त्वयित्वा तमेनं

कर-तलमवलम्ब्य प्रस्थितो वासुदेवः।।[103]

द्वितीयसर्गस्य अन्तिमः श्लोकः पुष्पिताग्रावृत्ते भवति। यथा-

इति मधु-रिपुणा कताभ्यनुज्ञौ

यदु-वर-पाण्डु सुतावतिप्रहृष्टौ ।

पद-सरसिजयोर्निपत्य भूयो

द्विज- तनयैश्च ततः प्रतस्थिवासौ।। [104]

तृतीयसर्गस्य प्रारम्भतः चतुष्षष्टिपर्यन्तं श्लोकाः द्रुतविलम्बितवृत्तस्थाः भवन्ति। यथा-

अथ तदा-हरि-लोक-विलोकना-

दुदित- तत्त्व- धिया स धनञ्जयः।

कत- हरि- स्तुतिरस्त-मदोऽविशद

द्विज- गृहे जगृहे च परा मुदम्।।[105]

**उपसंहारः**

लक्ष्मित्तम्पुराट्टी उत्तमा विदुषी भक्तकवयित्री च आसीदिति काव्यतः ज्ञायते। पुत्रस्य अनारोग्यावस्थायां जाता भक्तिः भागवतपारायणेन पराकाष्ठां अलभत्। एवं विधा भक्तिः सन्तानलाभाय तथा सन्तानगोपालग्रन्थलाभाय च कारणीभूता जाता। अद्यत्वे समाजे विद्यमान प्रजानां क्लेशः अथवा दुःखं ( आधिभौतिकादि ) भरणशिराकेन्द्रस्य उपरि आरोपयन्ति। तद्वत् लक्ष्मित्तम्पुराट्टिवर्यायाः काले आसीदिति अनुमन्तव्यं भवति। यतः पुत्रशोकयुक्तः ब्राह्मणः राज्ञः द्वारकातिपतेः कृष्णसमीपं गत्वा तर्जनं चकार इत्यतः समाजे विद्यमानस्य दुःखभावस्य तथा अशान्तेः च कारणीभूतः भवति राजा। त्रिविधानाम् आधीनां उपशमनम् एव श्रीमद्भागवतादि पुराणग्रन्थानां अध्ययनप्रयोजनं भवति लोके। कार्यमिदं मनसि निधाय एव लक्ष्मित्तम्पुराट्टिवर्या स्वजीवनस्य आधीनां उपशमनाय भागवतकथामाश्रित्य सन्तानगोपालमिति काव्यं रचयामास। काव्यगुणपुष्ट्या सन्तानगोपालकाव्यस्य कृते सहृदयश्लाव्यतां प्राप्तम्।

**सहायकग्रन्थसूची-**


- केरलसाहित्यचरित्रम्, उळ्ळूर् . एस्. परमेश्वर अय्यर्, केरलसर्वकलाशाला प्रकाशनविभागः, तिरुवनन्तपुरम्, 1957.
- केरलसाहित्यचरित्रम्- चर्चयुम् पूरणवुम्, वटक्कुंकूर् राज राज वर्म राजा, मङ्गलोदयम्, तृश्शूर्, 1967.
- केरलसंस्कृतविज्ञानकोशम्, पूवट्टूर्. एन्. रामकृष्णप्पिळ्ळा, करन्ट् बुक्स्, कोट्टयम्,2006.


[101]सन्तानगोपालकाव्यम्, तृतीयः सर्गः, श्लोकः9.

[102]सन्तानगोपालकाव्यम्, प्रथमः सर्गः, श्लो.1.

[103]सन्तानगोपालकाव्यम्, प्रथमः सर्गः, श्लो.43.

[104]सन्तानगोपालकाव्यम्, द्वितीयः सर्गः, श्लो.37.

[105]सन्तानगोपालकाव्यम्, तृतीयः सर्गः, श्लो.1..

- केरलीयसंस्कृतसाहित्यचरित्रम्, वटकुंकूर् राज राज वर्म राजा, श्री शङ्कराचार्या संस्कृतविश्वविद्यालय, कालटी. 1997.
- साहित्यदर्पणम्- व्याख्यानम्, आचार्य शेषराजशर्मा, चौखम्भा कृष्णदास् अक्कादमी वाराणसी, संस्करणम् 15, 2013.
- The Contribution of women to Sanskrit Literature, (vol. VI) Sanskrit Poetesses (part B) Vaidyanatha- prasada-prasasti, Attributed to Devakumarika and Santana-Gopala- Kavya by Lakshmi Ranji. Edited with English introduction, notes, Jathindra Bimal Chaudhuri,Calcutta,1940.

# आधुनिकसंस्कृतसाहित्ये श्रीजीवन्यायतीर्थस्यावदानम्

**भवेशमण्डलः**

कलिकाताविश्वविद्यालयः

man.bhabesh@gmail.com

**विषयसारः**

*श्रीजीवन्यायतीर्थ आसीद् बङ्गीयविद्वान्। आधुनिकसंस्कृतसाहित्येषु तस्य नाम स्वर्णिमाक्षरमयं वर्त्तते। आधुनिकसाहित्यं काठिन्यमुक्तं कर्तुं स सदैव कृतचेष्ट आसीत्। एषः श्रीजीव ऊनविंशविंशशतककस्य प्रख्यातः संस्कृतकविः तथा नाट्यकारः। तत्रभवान् विंशशतके आधुनिकसंस्कृतसाहित्यं विचित्रसंस्कृतरचनामाध्यमेन सुसमृद्धं कृतवान्। तस्य खण्डकाव्यं, महाकाव्यं, चित्रकाव्यं, विलापकाव्यं, दृश्यकाव्यं चेत्यादिरचनासम्भार आधुनिकसंस्कृतसाहित्यस्य मूल्यवानध्याय इव। गवेषणापत्रेऽस्मिन् अस्माभिः श्रीजीवप्रणीतकाव्यसमुदयस्य समालोचनं पाठकानां सविधे स्पष्टीकर्तुमिष्यते।*

प्रसिद्धः संस्कृतपण्डितः कविस्तथा नाट्यकारो महामहोपाध्यायः श्रीजीवन्यायतीर्थः पश्चिमबङ्गस्य उत्तरचब्विशपरगणा इति स्थाने १८९३- खीष्टाब्दस्य २६-जानुयारीमासि अजायत। स महामहोपाध्यायः पञ्चाननतर्करत्नमहोदयस्य पुत्र आसीत्। स न्याय-व्याकरणालंकारकाव्यदर्शनादिषु विविधेषु विषयेषु पाण्डित्यं लब्धवान्। कलिकाताविश्वविद्यालये तथा यादवपुरविश्वविद्यालये सोऽअध्यापकपदे समासीन आसीत्। तस्य रचनायाः संख्या अनेकाः तन्मध्ये पञ्चशताधिकसहस्रं श्लोकयुतं महाकाव्यम्, चित्रकाव्यम्, खण्डकाव्यम्, विलापकाव्यम्, इत्यादीनि प्रसिद्धानि वर्तन्ते। अत्युच्चरचनाया हेतोः स राष्ट्रपतिपुरस्कारं प्राप्तवान्। एतद्यतिरिच्य महोपाध्यायः, महामहिमोपाध्यायः, देशिकोत्तमः, व्याकरणशिरोमणिः, चेत्यादीनि उपाधिचातुर्येण भूषितोऽभवत्। १९९२-खीष्टाब्दे तस्य देहावसानमभवत्।

श्रीजीवस्य महाकाव्यं '**पाण्डवविक्रमम्**' अष्टादशसर्गात्मकम्। महाभारतवनपर्वणि वर्णितानि घटनाबहुलानि आश्रित्य कविरयं पञ्चशताधिकसहस्रश्लोकयुतं महाकाव्यं रचितवान्। वीरोऽस्य महाकाव्यस्याङ्गी **रसः**, सहकारी रसः खलु शान्तरसः। सत्य-शिव-सुन्दराणां महजजयगीतमत्रोद्घोषितम्। अर्जुनमुखात् कविरात्माभिप्रायं व्यक्तीकरोति –

**"राजन्! सत्यं शिवं भवति सुन्दरमित्यभिन्नम्"**[i]

आलोच्यमहाकाव्यस्य विशेषत्वं खल्वलंकारप्रयोगः। विश्वनाथाचार्यस्य सर्वालंकाराः प्रायेणात्रालोचिताः सन्ति। महाकाव्यमिदमलंकारकाव्यम् इत्यभिधानं न तावदतिरेकि। अप्रसिद्धछन्दसामपि प्रयोगबाहुल्यं दृश्यतेऽत्र। यथा – 'मत्तमयूरम्', 'मृगेन्द्रमुखम्', 'कलहंसः', 'मञ्जुभाषिणी' चेति छन्दांसि।

**"सारस्वतशतकम्"** जीवस्यान्यतमं **चित्रकाव्यम्**। सप्ताधिकशतकेन (१०७) श्लोकेन समन्वितं काव्यमिदं **खण्डकाव्यमिति** वक्तुं युज्यते। अस्य काव्यस्य चित्रत्वाख्यायाः कारणत्वेन वक्तुं शक्यतेऽत्र प्रायेण पञ्चाशत्प्रकाराणां बन्धश्चित्रमाध्यमेन प्रदर्शितः। साहित्यदर्पणोक्तानां पद्म-खड्ग-मुरज-गोमूत्रिका-सर्वतोभद्र-बाण-वाणीबन्धादीनां प्रयोगो लक्ष्यते।

**"ऋतुश्चक्रचङ्क्रमणम्"** जीवस्यान्यतमं गीतिकाव्यम्। काव्यमिदमाधुनिकर्तुसंहारमिति वक्तुं युज्यते।

वसन्तकालीनवर्णनामाध्यमेनास्य काव्यस्य सूत्रपातः। वसन्तस्य प्रकृतेरुत्फुल्लता, ग्रीष्मस्य नीरवता, वर्षाणां सौदामणेर्मेघावाहनम्, शरदो महामायाया आगमनम्, शीतकालस्य विषादमयता चेति वर्णितवान् श्रीजीवो गीतिकाव्येऽस्मिन्।

कविर्जीवोऽनेकानि नाटकानि प्रणीतवान्[ii]। प्रायेण त्रिंशदुत्तराणि नाट्यानि तस्य अवलोक्यन्ते। विषयवस्त्वालोक्य तस्य नाट्यानि निम्नलिखितश्रेणिकक्षेषु विभाजितव्यानि –

**पौराणिकविषयाश्रयिनाट्यानि** – 'गिरिधरसम्बर्धनम्', 'श्रीकृष्णकौतुकम्', 'नागनिस्तारम्', 'कैलासविजयम्' च।

**राजनीतिसमस्याश्रयिनाट्यानि** – 'चण्डताण्डवम्', 'स्वातन्त्र्यसन्धिक्षणम्', 'सिन्धुसौरीसंग्रामम्' च।

**चरित्रकेन्द्रिकनाट्यानि** – 'श्रीशङ्कराचार्यवैभवम्', 'विवेकानन्दचरितम्','निगमानन्दचरितम्','महाकविकालदसम्' चेति।

**विविधविषयकेन्द्रिकनाट्यानि** – 'पुरुषरमणीयम्', 'विवाहविडम्बनम्', 'विविधपर्यासनम्', 'चौरचातुरीयम्', 'वागविरागम्', 'पुरुषपुङ्गवम्', 'दरिद्रदुर्दैवम्', 'वनभोजनम्', 'शतवार्षिकम्', 'क्षुत्क्षेमीयम्', 'चिपिटकचर्व्वणम्', 'साम्यसागरकल्लोलम्','मातृपूजनम्', 'योग्ययुगलमेलनम्', 'रामनामदातव्यचिकित्सालयम्','भट्टसंकटम्','माधुरीसुन्दरम्' चेति। एतेषां रूपकाणां मध्ये केषाञ्चिदालोचनमधः क्रियते।

**दरिद्रदुर्दैवम्** – प्रहसनमिदं १९६८-खीष्टाब्दे संस्कृतसाहित्यपरिषत् इति स्थानतः प्रकाशितमभवत्। परसमृद्धिकारता कथम् आत्मविनाशहेतुत्वेन उन्नीता भवति सात्र निर्दिश्यते।

**चण्डताण्डवम्** – द्वितीयविश्वयुद्धस्य प्रेक्षाभूमिमाश्रित्य नाटकं रचितवान् श्रीजीवः। १९४४-खीष्टाब्दस्य फेब्रुयारीमासि दिल्ल्याम् एकं महायज्ञमनुष्ठितमभवत्। जीवपुत्रो जानकीजीवनम १९४८-खीष्टाब्दे नाटकमिदं प्रकाशितवान्। राष्ट्रीयसंस्कृतमहाविद्यालये अस्य नाट्यस्य मञ्चाभिनयोऽभवत्।

**रागविरागम्** – १९७२-खीष्टाब्दे 'रूपकचक्रम्'' इत्यत्र प्रकाशितमेकं श्लेषात्मकं रूपकम्। सङ्गीतसाधनायाः विरूपतायाः विरोधितायाश्च कटाक्षरूपेण नाट्यस्यास्य रचना।

**शतवार्षिकम्** – इदं १९७२ रूपकचक्रे प्रकाशितमभवत्। नाटकमिदं कलिकाताविश्वविद्यालयस्य शतवर्षमुपलक्ष्य अनुष्ठितम्।

**वनभोजनम्** – १९६१-६२खीष्टाब्दे प्रणवपारिजातपत्रिकासु प्रकाशितमभवत् नाटकमिदम्। मानवानामीर्षा मूर्खता कथं विवादापन्नान् तान् करोति तदत्र वर्णितम्।

**विवाहविडम्बनम्** – १९६१-खीष्टाब्दे संस्कृतप्रतिभापत्रिकायां नाटकमिदं प्रकाशितम्। रतिकान्तनाम्नः वृद्धस्य विवाहवासना एवास्य नाट्यस्य प्रतिपाद्यम्।

**मातृपूजनम्** – १९७६-७७-खीः प्रणवपारिजातपत्रिकातः प्रकाशितमिदं दशाङ्कसमन्वितं प्रकरणम्।

**माधुरीसुन्दरम्** – दशाङ्कसमन्वितेऽस्मिन् प्रकरणे प्रेमकाहिनी मुख्यत्वेन उपजीव्या। अस्यापि प्रकाशनं प्रणवपारिजातपत्रिकातऽभवत्।

**चिपिटकचर्व्वणम्** – १९७२-खीष्टाब्दे रूपकचक्रेऽस्य नाटकस्य विषयवस्तुरूपेण कृपणं कपालिनं लक्षीकृत्य कटाक्षं कृतवान् नाट्यकारः।

**पुरुषपुङ्गवम्**-१९६०-६१-खीः संस्कृतसाहित्यपरिषत्पत्रिकायां भाणोऽयं प्रकाशितोऽभवत्। सामाजिकसमस्याकेन्द्रिकोऽयं भाणः।

**महाकविकालिदासम्**–१९६३-६४ख्रीःप्रणवपारिजातपत्रिकायां नाट्यमिदं प्रकाशितमासीत्। पञ्चाङ्कविशिष्टं नाटकमिदं कालिदासस्य जीवनचरिताश्रयि।

**पुरुषरमणीयम्** – १९४८-ख्रीष्टाब्दे जीवपुत्रेण जानकीवल्लभेन प्रकाशितस्यास्य साहित्यपरिषदानुकूल्येन मञ्चस्थमासीत्।

**विवेकानन्दचरितम्** – पञ्चाङ्कव्यापृतस्यास्य नाट्यस्य विषयवस्तु खलु विवेकानन्दचरितम्। १९६५-ख्रीष्टाब्दे इदं 'रामकृष्णवेदान्तमठ'तः प्रकाशितमभवत्।

**सिन्धुसौवीरसंग्रामम्** - काश्मीरसमस्या एव नाट्यस्यास्य विषयवस्तु।

**स्वातन्त्र्यसन्धिक्षणम्** – नाट्यमिदं लघुभावविवर्जितम्। भारतं द्विखण्डीकृत्य भेदनीत्या स्वाधीनतायाः संकूटपद्धतिमाश्रितवान् ब्रिटिशशासकः, तदत्र वर्णितम्।

**समस्याकल्लोलम्** – एकाङ्करूपकमिदम्। १९६०-७०-समये बङ्गीययुवसमाजस्य मध्ये यादृशो विक्षोभोऽजायत तदत्र वर्णितम्। ''नक्शाल''-आन्दोलनविषयाश्रयि रूपकम्।

**निगमानन्दचरितम्** – प्रख्यातस्य स्वामिनो निगमानन्दस्य जीवनमाश्रित्य नाट्यमिदं रचितवान् जीवः।

श्रीजीवः सामान्यतया नाट्यकारस्तथा महाकविरिति रूपेण परिज्ञातोऽपि, तस्य बहुमुखिन्याः प्रतिभाया निदर्शनं – '**विलापकाव्यम्**'[iii]। स विलापकाव्यत्रयं लिखितवान् –

क. न्यायाधीशविलापः

ख. विलापगाथा

ग. विलापः

एषां मध्ये न्यायाधीशविलापनामधेयं काव्यं महामान्यविचारपतेः विजनमुखोपाध्यायस्य महाप्रयाणे रचितवान्। संस्कृतसाहित्यपरिषत्-पत्रिकायाम् अष्टात्रिंशत्-सम्भारे प्रकाशितमासीत्। काव्येऽस्मिन् दशसंख्यकाः श्लोका वर्तन्ते। मन्दाक्रान्ताछन्दसः सावलीलतास्य काव्यस्य विशेषत्वम्। निदर्शनरूपेण श्लोकोऽयमुल्लिख्यते–

''रूपं भूपोचितमपि मुखं फुल्लराजीवतुल्यं
दाक्षिण्यं ते दिनकृत इवाक्षीणमपाप्रसारि।
कम्रं चेतः कुसुमसदृशं यत्तमापि प्रतीपः
पुत्रस्नेहं प्रियजनगणं हा कथं वा जहासि।।''[iv]

**विलापगाथा** – विलापगाथेयम् अनन्तकुमारतीर्थमहाशयस्य महाप्रयाणे विलिखिता कविना। तत्र अष्टौ श्लोकाः सन्ति। मदान्क्रान्ता तथा शार्दुलविक्रीडितम् चेति छन्दोद्वयेन संमिश्रितमिदं गाथाकाव्यम्। शार्दुलविक्रीडितछन्दस उदाहरणरूपेण निम्नलिखितश्लोक उल्लेखनीयः –

''हा हा तर्काम्बुधिरनवधिः शोषितः केन रोषा-
चूडा न्यायचलपरिचिता चूर्णिता केन तूर्णम्?
सूरो दूरद्युतिवितरणात् कातरो ध्वान्तपूर-
छन्दो लोकान्तरमपि गतो हन्त! सार्थः कृतान्तः[v]''

**विलापः** – काव्यमिदम् अक्षयकुमारशास्त्रिणो महाप्रयाणे काले संरचितम्। संस्कृतसाहित्यसम्भारस्य चतुर्विंशतितमे सम्भारे प्रकाशितमभवदिदम्। काव्येऽस्मिन् अष्टसु श्लोलेषु वसन्ततिलकछन्दसा विलापो वर्णितः।

एतानि विना कविरयं १९६१-ख्रीष्टाब्दे रवीन्द्रजन्मशतवार्षिक्यां सप्तस्तवकेऽतीव सुमधुरां प्रशस्तिं रचितवान्। पूज्यपादैस्तैःद्विजेन्द्रलालराय-दिलीपकुमारराय–सुनीतिकुमारचट्टोपाध्याय–अक्षयकुमार–विजनकुमार-गोपिकामोहनानां महाप्रयाणे हृदयग्राहिणी श्लोकगाथाविरचिता।

## अन्त्यटीका

1. पाण्डवविक्रमम् – ८/६५

2. संस्कृतकाव्यचर्चाय वाङाली : सेकाल ओ एकाल, अञ्जलिकामुखोपाध्यायः, पृ. – ६३-७०
3. आधुनिक संस्कृत काव्य: वाङाली मनीषा शतवर्षेर आलोके, ऋताचट्टोपाध्यायः, पृ.- ८५-८६
4. न्यायाधीशवियोगविलापः – ८
5. विलापगाथा - १

**ग्रन्थपञ्जी**


1. चट्टोपाध्यायः, ऋता. आधुनिक संस्कृत काव्य: वाङाली मनीषा शतवर्षेर आलोके. कलकाता : संस्कृतपुस्तकभाण्डारः,२०१८प्रथमप्रकाशनम्)।
2. चट्टोपाध्यायः, ऋता. आधुनिक संस्कृत साहित्य (१९१०-२०१०) छोटगल्प ओ नाटक. कलकाता : प्रग्रेसिभ पाब्लिशार्स, २०१२ (प्रथमप्रकाशनम्)।
3. चट्टोपाध्यायः, ऋता. पण्डितश्रीजीव न्यायतीर्थेर सारस्वतसाधना. कलकाता : संस्कृतपुस्तकभाण्डारः, २००४.
4. भट्टाचार्यः, सञ्चिता. आधुनिक संस्कृत साहित्येर रूपरेखा. कलकाता : कलकाता एल दे एन्ड कों, २०१३.
5. मुखोपाध्यायः,अञ्जलिका.संस्कृतकाव्यचर्चाय वाङाली : सेकाल ओ एकाल. कलकाता : संस्कृतपुस्तकभाण्डारः, २०१३.

# विंशशतकस्य बङ्गीयमहिलानाट्यकर्त्रीणां संस्कृतनाट्यसाधना

**भोलानाथमण्डलः**

कलिकाताविश्वविद्यालयः

bholanathmondal73@gmail.com

**सारांशः**

*प्राचीनसमयत एव संस्कृतवाङ्मये महिलाकवीनां सविशेषं स्थानमासीत्। वैदिकसमयात् घोषा, गोधा, विश्ववारा, सूर्या, सावित्री, अपाला, वागम्भृणी, लोपामुद्रा, रोमशः, ऊर्वशी, चैत्राः प्रख्याताः सप्तविंशतिसंख्यकाः मन्त्रद्रष्टृमहिलार्षय आसन्। यासामुल्लेखः शौणकस्य बृहद्देवतायां लक्ष्यते[vi]। उपनिषद्युगे गार्गी, मैत्रेयी इत्यादिविदुषीणां नामानि श्रूयन्ते। वैदिकोत्तरकालेऽपि महिलाकवीनां यथा – शीलाभट्टारिका, विज्जा, मारुला, वैजयन्ती, लक्ष्मीः चेति नामानि श्रूयन्ते। आधुनिकसमयेऽपि क्षमाराओ, लीलारावदयालुः, नलिनीशुक्ला, मिथिलेशकुमारी चैतासां विविधमहिलाकवीनां नामानि श्रूयन्ते। यासां रचनाभिः कृत्स्नं संस्कृतसाहित्यं नितान्तमेव समृद्धं भवति। विंशशतके बङ्गदेशे संस्कृतसाहित्ये बङ्गीयमहिलानाट्यकवीनां महद् योगदानमासीत्। एतासां महिलानाट्यकवीनां मध्ये रमाचतुर्धूरी, ब्रह्मचारिणीवेलादेवी, गौरीधर्मपालः, जयश्रीनागः चेति उल्लेखयोग्याः। गवेषणापत्रेऽस्मिन् एतेषां कवीनां नाट्यसाधनाप्रसङ्गे वयं ससंक्षेपमालोचयामः।*

---

## रमाचतुर्धूरी (१९११-खीष्टाब्दः)

सा १९११-खीष्टाब्दस्य फेब्रुयारीमासस्य अष्टमदिनाङ्के कलिकातानगर्यां वन्द्यवंशे जज्ञे। तस्याः पिता सुधांशुमोहनवोसः, माता च रोमोलादेवी। असाधारणपाण्डित्याधिकारिणी रमा-चतुर्धूरी भारतवर्षस्य प्रथमा रमणी या अक्सफोर्डविश्वाविद्यालयतः (Oxford University) 'विद्यावारिधिः' इत्युपाधिं लेभे। भारतवर्षस्य सैव प्रथमा नारी या पश्चिमबङ्गराज्यस्य रवीन्द्रभारतीविद्यालयस्य उपाचार्यपदे समासीना बभूव। 'Royal Asiatic Society of Bengal' इत्यस्य प्रथमा नारी 'Fellow' इति। जार्मानदेशतः सा उच्चकोटिकभारतीयनागरिकसम्मानेन विभूषितासीत् १९७० खीष्टाब्दे।

नाट्यविशारदरमादेवी तस्याः कारयित्र्या प्रतिभया विंशत्यधिकानि नाटकानि संस्कृतेन रराच। तस्या अर्वाचीनसंस्कृतनाटकपाठेन सहृदयसामाजिकाः नितान्तमाप्लुताः। तत्कृतयः सर्वाः 'प्राच्यवाणी' इति प्रतिष्ठानतः प्रकाशिता अभवन्। एता नाट्यकृतयः विषयवस्तुलोकनेन सर्वैरस्माभिः निम्नरीत्या प्रदर्शयितुं शक्यन्ते –

१. वरेण्यचरित्राश्रयिनाटकम्

२. कालिदासमेघदूताश्रयिनाटकम्

३. स्वीयकल्पनाश्रयिनाटकम्।

### १. वरेण्यचरित्राश्रयिनाटकम्

| | | |
|---|---|---|
| क. | यतीन्द्र-यतीन्द्रम् | ञ. चैतन्य-चैतन्यम् |
| ख. | शंकर-शंकरम् | ट. गणदेवतानाटकम् |
| ग. | युगजीवनम् | ठ. अग्निवीणानाटकम् |
| घ. | निवेदिता-निवेदितम् | ड. भारततातम् |
| ङ. | अभेदानन्दम् | ढ. भारतपथिकम् |
| च. | भारताचार्यम् | ण. तानतनुः |
| छ. | रामचरितमानसम् | त. लेलिनविजयम् |
| ज. | रसमयरासमणिः | थ. भारतवीरम् |
| झ. | प्रसन्नप्रसादम् | |

२. **कालिदासमेघदूताश्रयिनाटकम्**

क. कविकुलकोकिलम्

ख. कविकुलकमलम्

ग. मेघमेदूरणीयम्

३. **स्वीयकल्पनाश्रयिनाटकम्**

क. पल्लीकमलम्    ग. नगरनूपुरम्

ख. देशदीपम्    घ. संसारामृतम्

**समग्रनाट्यानां संक्षिप्ताध्ययनम्**

१. **वरेण्यचरित्रश्रयिनाटकम्**

विश्ववन्द्यचरित्राणि आश्रित्य रचितमेतादृशं नाटकम्।

क. यतीन्द्र-यतीन्द्रम् – नाटकमिदं रमादेव्या आदिमं नाट्यम्। पत्युः मरणात् परं तस्य चरितावलम्बनेन नाटकमिदं रचितम्। नाटकेऽस्मिन् द्वादशसंख्यकानि दृश्यानि वर्तन्ते।

ख. शंकरशंकरम् – अद्वैतवेदान्तवादिनः शिवावताररूपिणः शंकराचार्यस्य जीवनदर्शनं तथा तत्प्रचारितवेदान्तसरस्वतीमाश्रित्य चतुर्दशदृश्यैः रराच नाटकमिदम्।

ग. युगजीवनम् – युगावतारपुरुषस्य श्रीरामकृष्णस्य दीव्यजीवनं तथा दैवभावमाश्रित्य दशदृश्यसमन्वितं नाटकमिदं रचितम्।

घ. निवेदिता-निवेदितम् – प्रख्यातपरिव्राजकस्वामिविवेकानन्दैः आयारल्यान्ड-निवासिन्या मार्गारेटनोवेलाख्याया भगिनीनिवेदिताया रूपान्तरम् इति विषयमवलम्ब्य द्वादशदृश्यैः रचितमिदं नाटकम्।

ङ. अभेदानन्दम् – रामकृष्णशिष्यस्य स्वामिनः अभेदानन्दमहाराजस्य जीवनस्य विचित्रा दिशोऽस्य नाटकस्योपजीव्याः। अस्य नाटकस्य दृश्यसंख्या द्वादश।

च. भारताचार्यम् – विख्यातदार्शनिकसर्वपल्लीराधाकृष्णमहोदयस्य जीवनं तथा दार्शनिकचिन्ता चास्य नाटकस्य विषयवस्तु। तत्र द्वादश दृश्यानि सन्ति।

छ. रामचरितमानसम् – रामचरितमानसस्य रचयितुः भक्तकवितुलसीदास-महोदयस्य जीवनचरितमवलम्ब्य रचितमिदं नाटकम्। द्वादशदृश्यात्मकं नाटकमिदम्।

ज. रसमयरासमणिः – बङ्गीयविदुष्या राणीरासमणेः कथामाश्रित्य दृश्याष्टकेन नाटकमिदं विरचितम्।

झ. प्रसन्नप्रसादम् – नाटकेऽस्मिन्नस्ति कालीसाधकस्य रामप्रसादस्य जीवनेतिवृत्तम्। नाटकस्यास्य दश दृश्यानि सन्ति।

ञ. चैतन्य-चैतन्यम् – नदीयानिवासिनो महाप्रभोश्चैतन्यदेवस्याविर्भावः, बाल्यलीला, दिग्विजयः, महासमाधिश्चेत्यादयो विषया अत्र वर्तन्ते। दृश्यपञ्चक-समन्वितमिदं नाटकम्।

ट. गणदेवतानाटकम् – बङ्गीयसाहित्यिकताराशङ्करवन्द्योपाध्यायमहोदयस्य जीवनचरितमस्य नाटकस्योपजीव्यम्।

ठ. अग्निवीणानाटकम् – नाटकेऽत्रास्ति महाकवेः नजरुल-इसलामस्य जीवनवृत्तान्तः।

ड. भारततातम् – गान्धिमहोदयस्य जीवने संघटितानि ‘हरिजनोद्धारः’ ‘साम्प्रदायिकमेलनम्’ लवणसत्याग्रहान्दोलनं चेत्यादीनि वृत्तानि दृश्याष्टकेन आलोचितानि सन्ति।

ढ. भारतपथिकम्–
सुप्रसिद्धसमाजसंस्कारकराममोहनरायमहोदयस्य जीवनचरितं दृश्यपञ्चकेऽङ्कितम्।

ण. तानतनुः – सङ्गीतचूडामणितानसेनस्य जीवनचरितमस्य नाटकस्य उपजीव्यम्।

त. लेलिनविजयम् – मास्कवादिनो लेलिनस्य जीवनं नाटकस्यास्य विषयवस्तु।

थ. भारतवीरम् – माराठ्याधिपतिशिवाजीमहाराजस्य जीवनगाथा नाटकस्यास्य विषयः।

**२. कालिदासमेघदूताश्रयिनाटकम्**

कविकुलशेखरकालिदासस्य तस्य च खण्डकाव्यंमेघदूतमाश्रित्य रमादेवी एतादृशनाट्यानि रचितवती।

क. कविकुलकोकिलम् – महाकवेः जीवनमाधारीकृत्य दृश्यदशके नाटकमिदं रराच।

ख. कविकुलकमलम् – तस्यैव महाकवेरुत्तरकालीनजीवनस्य नाटकस्य उपजीव्यम्। अत्र अष्टौ दृश्यानि वर्त्तन्ते।

ग. मेघमेदूरणीयम् – सर्वजनविदितं मेघदूतनाटकं खण्डकाव्यं नाटकस्यास्य विषयवस्तु। अत्र षड्संख्यकानि दृश्यानि सन्ति।

**३. स्वीयकल्पनाश्रयिनाटकम्**

कविकल्पनामाश्रित्य अवलम्ब्य वा रचितमेतादृशं नाटकम्।

क. पल्लीकमलम् – प्रणयिप्रणयिन्योः रूपकुमारकमलकलिकायाः परिणयः तथा ग्राम्यसंस्कृतिरत्र चित्रिता। नाटकेऽस्मिन् नव दृश्यानि सन्ति।

ख. देशदीपम् – चम्पकवदननाम्नः युवकविशेषस्य स्वीयमातृभूमिप्रेमा नाटकेऽस्मिन् चित्रितः। अत्र नव दृश्यानि वर्तन्ते।

ग. नगरनूपुरम् – मेघलानाम्न्या वारविलासिन्या रमण्या भोगमयजीवनमत्र वर्णितम्। अत्र दश दृश्यानि सन्ति।

घ. संसारामृतम् - दारिद्र्यजर्जरितायाः कस्याश्चित् कन्यायाः दुःखमयजीवनप्रवाहोऽस्य नाटकस्याधारः। अत्र सप्त दृश्यानि वर्तन्ते।

अर्वाचीनेयं नाट्यकर्त्री रमाचतुर्धुरी स्वीयप्रतिभाप्रकाशात् समुज्ज्वला। तस्याः रचनासु सर्वत्रैव प्रतिभाया लाञ्छनं विन्यस्तम्। एकत्र रचनासु यथा नाट्यशास्त्रविधानमनुसृत्य – 'नान्दी', 'प्रस्तावना', 'सन्धिः', 'अर्थोपक्षेपकम्' च संयोजितानि वर्तन्ते तथान्यत्र नाट्यविधेः अनुशासनप्राचीरं भित्त्वा नवीनतायाः स्पर्शः संयोजितः। यथा पल्लीकमलनामके नाटके नायिकायाः जन्मकथा पश्चाद्वर्तनकौशलेन प्रदर्शिता[vii]। सा खलु नाटके 'अङ्कः' इति न लिखित्वा 'दृश्यमि'ति लिखितवती। काव्यसौन्दर्यसृजनेऽपि तस्या दक्षता अनस्वीकार्यैति। तस्याः वर्त्तिकास्पर्शेन नाट्यचरित्राणि अकृत्रिमतां लेभिरे। संस्कृतनाटके व्यवहृतं शब्दकाठिन्यं परित्यज्य तया सरलभाषाः संयोजिताः। तस्या रचना सहृदयमानसोद्वेजिसमासबद्धशब्दता मुक्ता। सुखोद्यवचश्चयो नटनटीनां वदने संलापमाध्यमेनोपस्थापितः। संक्षिप्तसंलापैः सह सुदीर्घसंलापानामपि संयोजनं परिलक्ष्यते नाटकेषु। नाटकानां मध्ये पात्रपात्रीणां मुखे अनेके बङ्गीयशब्दा अपि व्यवह्रियन्ते यथा – "दुत्तेरि"[viii], 'लुकोचुरि'[ix], "कुलुकुलु'[x] च इत्यादयः। बङ्गभाषातिरिक्ता – 'ओयाटार्' 'गड्'[xi] इत्यादय आङ्गलशब्दाः, 'पाणि', 'आल्ला'[xii] इति शब्दा अपि दृश्यन्ते। कतिपयाङ्गलवाक्यमपि दृश्यते – "The boat is sinking,but I shall see the Sunrise."[xiii]

नाटकेषु भक्तिभावगम्भीरमानकं सङ्गीतं श्रूयते, यत्र मातुः जगतः कालीदेव्या आराधनायां मग्नसाधकस्य भक्तिभाव उपस्थापितः। सङ्गीतान्येतानि बङ्गीयश्यामासङ्गीतानां संस्कृतानुवादा इत्यनुभूयन्ते[xiv]। एवं सङ्गीतमुर्च्छना नाट्यकाव्यानि सहृदयसमाजान् ह्लादयमान् करोति भूयो भूयः।

**ब्रह्मचारिणी वेलादेवी (१९१९-खीष्टाब्दः)**

इयं वेलादेवी १९१९-खीष्टाब्दस्य नदीयाप्रदेशेऽजायत। तस्याः शिक्षाग्रहणं महामहोपाध्यायकालिपदतर्काचार्यस्य योगेन्द्रनाथतर्कतीर्थस्य च सान्निध्यादेवाभवत्। सा वेलादेवी 'तर्क-वेदान्त-व्याकरणतीर्थः' इत्युपाधिद्वारा विभूषिताभवत्। कलिकातायाः दक्षिणेश्वरस्थितस्याद्यापीठस्य बालिकाश्रमप्रतिष्ठानस्य सा अध्यक्षासीत्। महिलानाट्यकर्त्रीयं नाटकत्रयप्रणयनमाध्यमेन बङ्गीयार्वाचीनसंस्कृतनाट्यधारां विभूषितवती। नाटकत्रयमिदं

क. नचिकेतश्चरितम्

ख. महीयसी गार्गी

ग. विराड्गृहम्

क. **नचिकेतश्चरितम्** – दृश्याष्टकसमन्विते नाटकेऽस्मिन् यमनचिकेतसोः आख्यानमस्ति। विश्वजिद्यज्ञे नचिकेतसः पिता उद्दालको येषां धेनूनां दानं चक्रे, ता धेनवोऽस्थिचर्मसमन्विताः केवलम्। एतद् दृष्ट्वा नचिकेता उवाच – "अस्माकं गोशालायां स्वस्था धेनवो वर्तन्ते। तत् कथं एता धेनूः ददाति भवान्"[xv]। अतः परमेषो नचिकेताः पित्रेऽवदत् – "कस्मै अहं प्रदास्ये"। एतच्छ्रुत्वा क्रुद्धो नचिकेतसः पिता – "त्वामहं यमाय दास्यामि"। ततः पितृभक्तः स पितृप्रतिज्ञापालनार्थं यमालयमुपेतः। इतो यमराजेऽनुपस्थिते तद्दर्शनार्थी नचिकेता दिनत्रयं यावत् उपवासं चक्रे। अभ्यागतब्राह्मणातिथिं कृतोपवासं दृष्ट्वा विचलितो यमराजोऽकल्याण-निवारणार्थं त्रीन् वरानयच्छत् ते। स नचिकेता वरत्रयेण क्रमेण – पितृप्रसन्नतायाः, अग्निविद्यायाः, आत्मविद्यायाश्च ज्ञानं लब्धवान्।

ख. **महीयसी गार्गी** – दृश्यपञ्चकसमन्वितेऽस्मिन्नाटके बृहदारण्यकप्रसिद्धं गार्गीयाज्ञवल्क्ययोः संवादो मुख्यरूपेणोल्लिखितो वर्तते। यत्र सृष्ट्यात्मतत्त्वविचार-विषये उपस्थितसमस्यायाः निरसनार्थं पितुर्गर्गमुनेः सविधे उपस्थितायां तस्यां पितृदेवकथितनिष्कामकर्मनिवृत्तिमार्गाभ्यां तस्याः शङ्काया निरसनं बभूव। अन्यतः भारतवर्षस्य राज्ञा जनकेनायोजितायां ब्रह्मज्ञानसभायां गार्गी उपस्थिता सती शास्त्रविषये याज्ञवल्क्येन सह तर्केषु लिप्ता बभूव। तर्के पराभूतापि गार्गी जनकेन राज्ञा प्रशंसिताभवत् – "यावत्कालं भारतवर्षं वर्तते तावत्कालं गार्गी महिला सर्वत्र कीर्त्तिता भविष्यति"[xvi]।

ग. **विराड्गृहम्** – दृश्यषट्कसमन्वितेऽस्मिन्नाटके महाभारतस्य विराट्पर्वणः काहिनी प्रदर्शितास्ति। यत्र पाण्डवानामज्ञातवासान्तिमपर्व, आत्मप्रकाशः, भीमेन कीटकवधः, उत्तराभिमन्व्योर्विवाहः चेति घटनाः नाटकेऽत्र मुख्यत्वेनोपन्यस्ताः।

नाट्यकर्तृरूपेण वेलादेव्याः मूल्यायनम् अल्पपरिसरे न सम्भवः। तस्या नाट्यानि लघुनाट्यानि इति कथयितुं शक्यन्ते। तस्या नाटके नाट्यशास्त्र-विहितनान्द्यादीनां प्रयोगोऽस्ति। उदाहरणरूपेण वक्तुं शक्यते – 'नचिकेतश्चरिते' नान्दीरूपेण रामकृष्णपरमहंसस्य स्तुतिरस्ति। विराड्गृहे भगवतः श्रीकृष्णस्य स्तुतिरस्ति। भरतवाक्यादीनां प्रयोगेऽपि सा नैपुण्यं दर्शयति। नचिकेतश्चरितनामके नाटके उपनिषदः शान्तिमन्त्रः पठितोऽस्ति। विराड्गृहेऽमङ्गलनाशनार्थं मङ्गलकामनार्थं प्रार्थयति। नाट्यविधिमाश्रित्यैव नाट्येषु बीजविन्दुपताकानां प्रयोगं करोति। अलंकार-छन्दोगुणादीनां

प्रयोगोऽपि लक्ष्यते तद्रचनायाम्। सा खलु नाटके ''अङ्कः'' इति न लिखित्वा ''दृश्यम्'' इति लिखितवती। भाषाया अनाडम्बरतया तस्याः नाट्यरसः सम्यक्तया सामाजिकैरास्वाद्यते।

**गौरीधर्मपालः (१९३७-खीष्टाब्दः)**

विंशशतकस्यान्यतमार्वाचीना नाट्यकर्त्री गौरीधर्मपालः अन्यतमा बङ्गीयकविः। १९३७-खीष्टाब्दे कलिकातायां जायमानेयं महिला शिक्षाक्षेत्रे विचित्रमाणिकानि एकत्रीकृतवती। शिशुसाहित्ये तस्या असामान्यकृतिना सह ''शिशु साहित्य संसद' इत्युपायेन विभूषिताभवत्। संस्कृतनाट्यसाहित्याय विदुषीयं - ''जननी'' इति नाट्यम् उपायनरूपेणायच्छत्। एकाङ्कावच्छिन्नेऽस्मिन् नाटके कस्य परिकरस्य गृहिनीमाश्रित्य नाट्यमिदं रचितम्। यत्र जननी माता तथा महाविद्यालयस्य अध्यापिका। सा उभयकर्मपाशेन पूर्णतयाबद्धा सती विचित्रमानसिकयन्त्रणां सहते। संसारसम्बन्धिकर्मणः ईषद्भावेन स्खलिता सती धवपुत्रादिना सापमानिता वर्तते। अवशेषे यदा स्वामिनः ''नास्ति त्वया प्रयोजनम्'' इति श्रुतवती तदा संसारस्य सारगर्भतामास्वाद्य गृहं त्यक्तुमुद्यतवती, किन्तु तदा परिकरपरिजनैर्निवारिताभवत् इत्यत्र नाट्यस्य परिसमाप्तिः।

गौरीदेव्या रचनेयं रसोत्तीर्णा। नाटकमिदं सहृदयास्वादनयोग्यतां विचार्य विरचितमेव कथितुं शक्यते। यद्यपि नाट्यस्यास्य प्रस्तावना बङ्गभाषया रचिता तथापि तयैव नाट्यवस्तु सुष्ठुतयोपन्यस्तम्। अत्र सूत्रधारस्य तथा नटनटीनां नितान्तमेवोपस्थितिर्न लक्ष्यते। केवलं मित्रद्वयस्य पारस्परिककथोपकथनमाध्यमेन प्रस्तावना उपस्थापिता नाट्यकर्त्र्या -''एखन आरम्भ हच्छे संस्कृत नाटक।

- संस्कृत नाटक? के देखवे शुनि?
- 'गृहिणी' ना 'जननी' कि येन एकटा नाम
- कि आछे? राजाराजड़ा आछे ना आर्यपुत्र?
- राजाराजड़ा नेइ, आर्यपुत्रओ नेइ। ताहले आछे टा की?
- आछे, सकालसातटार कोलकातार मध्यवित्त परिवारेर खावार घरेर दृश्य।
- नाटक टा लिखछे के?
- एकजन मानुष
- आरे ठाट्टा करिस ना, सेकि वाम ना दक्षिण, वाङाल ना घटि?''[xvii]

रचयित्री नाट्यस्यास्य समापनं सुन्दरभङ्ग्या कृतवती। विश्वकवि-रवीन्द्रनाथठाकुरेण ''भारततीर्थ'' इत्यस्य पद्यस्यावृत्तिरालोक्यते भरतवाक्यरूपेण। यत् नाट्यस्यार्वाचीनत्वस्य प्रमाणम्। नाट्यस्यार्थभाषातिशयेन मनोरमा तथा हृदयाह्लादिनी। परन्तु प्रादेशिकानां यथा हिन्दी, माराठी, काश्मीरी, राजस्थानी, मालयालम्, चेत्यादिभाषाणामधिकतया व्यवहारोऽस्य नाट्यस्य वैशिष्ट्यम्। आङ्गलभाषाणां यथा – ग्यासः (Gass), केरोसिनम् (kerosene) व्याटिङ्[xviii] चेति प्रयोगः परिदृश्यते। बङ्गदेशे प्रचलितानां प्रवादवचनानां भूरिशः प्रयोगेण नाट्यमिदं समृद्धम्। यथा –

बङ्गभाषा – ''कारो पौष मास कारो सर्वनाश''

संस्कृतम् – ''छात्राणां पौषमासो मम तु सर्वनाशः'' इति।

अतः सर्वदिश आलोच्य नाट्यमिदं वचनातिरेकीति वक्तुं युज्यते।

**जयश्रीनागः**

विंशशतकीयमहिलानाट्यकर्त्रीनामन्यतमा जयश्रीनागः। पश्चिमबङ्गप्रदेशस्य वर्धमाननामधेयस्थाने साजायत। तस्या एकाङ्कसमन्वितम् – ''आदिकवेरुद्भावनम्'' नाटकं वाल्मीकिकथया परिपुष्टम्। तमसानद्यास्तटे परिव्राजनसमये

व्याधहतं प्रणयाविष्टं क्रौञ्चपक्षिणं दृष्ट्वा शोकातुरः सन् तन्मुखादादिमः श्लोको निर्गतः –

''मा निषाद प्रतिष्ठां त्वमगमः....'' पुराकाहिनीमिमामाश्रित्यैव नाट्यमिदं रचितवती महाशया जयश्री। अस्य नाट्यस्य काहिनी प्राचीनापि सहृदयस्यास्वादनार्थं सा यथेष्टं चेष्टितवती। ''आदिकवेरुद्भावनम्'' एतद्विना शिशूनां कृतेऽपि कतिपयं नाट्यं तया विलिखितम्। एषां मध्ये ''मातृवन्दनम्'', ''चौरनिरूपणम्'', ''वधिरजामातृसंवादः'' – चेत्यादीनि नाट्यानि।

परिशेषे वक्तुं शक्यते बङ्गेषु महिलानाट्यकवीनां या अर्वाचीना धारा नाट्यसाहित्येषु प्रारब्धासीत् सा धारा अद्यापि प्रचलति। यद्यपि एतेषां महिलानाट्यकाराणां संख्या न्यूनाः तथापि तासां लेखनी तु नवदिगन्तोन्मोचनकारिणी। नाट्यशास्त्रविधिमनुसृत्य यद्यपि ताः सर्वदा नाट्यानि न रचयन्ति। नूत्नभावधारया उद्बुद्धास्ते आधुनिकरीतिमनुसरन्ति। तासां (नाट्यानि) संक्षिप्तानि किन्तु सारगर्भाणि वर्तन्ते। आधुनिकनाट्यानां लघुत्वविषये वक्तुं युज्यते – प्राचीनकाले रचितानि नाट्यानि विस्तृतानि। तेषामभिनयोऽपि सुदीर्घसमयं यावच्चलति। किन्तु अधुना समाजे सर्वेषां समयसंक्षेपात् नाट्यानामिदं विवर्त्तनम्। तथा नाट्यानां विषयवत्तापि प्रत्येकमानुषाणां स्वीयजीवनकथेति प्रतिभाति। अतोऽनायासेन ते संक्षिप्ताधुनिकनाट्यानि प्रति आकृष्टा भवन्ति।

## अन्त्यटीका

[1]घोषा गोधा विश्ववारा अपालोपनिषन्निषत्।
ब्रह्मजाया जुहुनाम अगस्तस्य स्वसादितिः।।
इन्द्राणी चेन्द्रमाता च सरमा रोमशोर्वशी।
लोपामुद्रा च नद्यश्च यमी नारी च शाश्वती।।
श्रीलाक्षा सार्पराज्ञी वाक् श्रद्धा मेधा च दक्षिणा।
रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिताः।। (बृहद्देवता – २/८२-८६)

[1]पल्लीकमलम्, रमाचतुर्धूरी, पृ. – ५०-५८

[1]युगजीवनम् (द्वितीयदृश्यम्), रमाचतुर्धूरी, पृ. - १६

[1]युगजीवनम् (तृतीयदृश्यम्), रमाचतुर्धूरी, पृ. - २१

[1]युगजीवनम् (षष्ठदृश्यम्), रमाचतुर्धूरी, पृ. - ४६

[1]युगजीवनम् (नवमदृश्यम्), रमाचतुर्धूरी, पृ. - ८९

[1]युगजीवनम् (नवमदृश्यम्), रमाचतुर्धूरी, पृ. - ८९

[1]निवेदिता-निवेदितम् (द्वादशदृश्यम्), रमाचतुर्धूरी

[1]कदा भविष्यति स प्रेमसञ्चारः।
भूत्वा पूर्णकामो वदिष्यामि हरिनाम,
पतिष्यति नयनयोः प्रेमाश्रुधारा।। ४८ (युगजीवनम्, चतुर्थदृश्यम्, रमाचतुर्धूरी, पृ. – २७)

[1]नचिकेतश्चरितम्, वेलादेवी, पृ. - ४

[1]महीयसी गार्गी, वेलादेवी, पृ. - ३३

[1]अंशोऽयं रीताचट्टोपाध्यायमहाभागायाः '**आधुनिक संस्कृत साहित्य**' इत्याख्यपुस्तकात् गृहीतः, पृ. – १५५-१५७

[1]भागोऽयं शुभ्रजित्सेनमहोदयस्य 'भारतवर्षे आधुनिकसाहित्यम् : विहङ्गदृष्ट्या परिशीलनम्, पृ. – ४७०

## परिशीलितग्रन्थसूची


1) उपाध्यायः, रामजी. *आधुनिक संस्कृत नाटक* (भागः - २). वाराणसी : चौखम्बा विद्याभवन, २०१४ (पुनर्मुद्रितसंस्करणम्)।

2) चतुर्धूरी, रमा. *निवेदिता-निवेदितम्.*कलिकाताः प्राच्यवाणी,

3) चतुर्धूरी, रमा. पल्लीकमलम्. कलिकाता : प्राच्यवाणी,

4) चतुर्धूरी, रमा. *युगजीवनम्.* कलिकाता : प्राच्यवाणी,
5) चट्टोपाध्यायः, ऋता. *आधुनिक संस्कृत साहित्य(१९१०-२०१०) छोटगल्प ओ नाटक* . कलकाता : प्रग्रेसिभ पावलिशार्स, २०१९ (पुनर्मुद्रणम्)।
6) द्विवेदी, मीरा. *आधुनिक संस्कृत महिला नाटककार.* दिल्ली : परिमल पब्लिकेशनस्, २००० (द्वितीयसंस्करणम्)।
7) मुखोपाध्यायः, अञ्जलिका. *संस्कृत काव्यचर्चाय वाङाली(सेकाल ओ एकाल).* कलिकाता : संस्कृतपुस्तकभाण्डारः, २०१३ (प्रथमसंस्करणम्)।
8) मुखोपाध्यायः, गोपेन्दुः. संस्कृत साहित्येर इतिवृत्त. कलकाता : इउनाइटेड वुक् एजेन्सि, १४१९ (प्रथमप्रकाशनम्)।
9) ब्रह्मचारिणी, वेलादेवी. नचिकेतश्चरितम्. कलकाता : आद्यापीठ, १३८३ (बङ्गाब्दः)।
10) ब्रह्मचारिणी, वेलादेवी. महीयसी गार्गी. कलकाता : आद्यापीठ, १३८३ (बङ्गाब्दः)।
11) शर्मा, मञ्जुलता. *अर्वाचीन संस्कृत साहित्य (दशा एवं दिशा)*. दिल्ली : परिमल पब्लिकेशनस्, २००४ (प्रथमसंस्करणम्)।
12) Chottopadhyaya, Rita. 20th Century Sanskrit Literature (A glimpse into Tradition and Innovation). Kolkata: Sanskrit Sahitya Parishat and Sanskrit Pustak Bhandar.

# विंशतिशतकस्यअनुदितनाट्यसाहित्ये डॉ.ग.बा.पळसुलेमहोदयानां योगदानम्।

**भाग्यश्री भलवतकर**

मू.जे.महाविद्यालय,जळगाव

bhalwatkarb@gmail.com

**सारांश:**

*संस्कृतसाहित्ये विविधता दृश्यते तेषु नाटकं, काव्यं, खंडकाव्यं, गीतीकाव्यं, चम्पूकाव्यं, कथासाहित्यम् इत्यादय: अधुना तु यात्रावर्णनं, पत्रकारिता, अनुदितसाहित्यं, इ. संस्कृतसाहित्यस्य नूतनाविष्कार: साहित्ये विविधप्रकारेण संस्कृतसाहित्य जगति प्रसूत: । महाराष्ट्रे मराठीनाटकस्य परंपरा पुरातना अस्ति। अनुदितनाटकस्य परंपरा महाराष्ट्रे इ.स.१८५८तमे प्रारभत। तेषु संगीतनाटकम्, लोकनाट्यम्, एकपात्रीनाटकम्, ऐतिहासिकनाटकम्, पथनाट्यम् इत्याद्या: मराठीरंगभूम्यां नाट्यप्रयोगार्थं अनेकानि नाटकानि सन्ति; तेषु ऐतिहासिकमराठीनाटकेषु वसंत: कानेटकर: महाभागस्य नाम अग्रे अस्ति।महाभागस्य 'रायगडला जेव्हा जाग येते' इति प्रसिद्धऐतिहासिकनाटकमस्ति। एतद्नाटकस्य संस्कृतभाषायाम् अनुवाद: ग.बा.पळसुलेमहाभागेन कृतम्। अनुवादसाहित्ये महाभागस्य योगदानं महदस्ति। प्रस्तुतशोधपत्रे २०,२१शतके अनुदितसाहित्यविषये महाराष्ट्रे ग.बापळसुलेमहाभागस्य योगदानं किदृश: वर्तते; एतद्विषये चिंतनं करोमि।*

**महत्त्वपूर्ण: बिंदव:** (Key words) –नाटकं, अनुदितसाहित्यम्, योगदानम्

**प्रस्तावना :-**

संस्कृतसाहित्ये नाटकस्य परंपरा पुरातनी खलु।नाटकस्य मुलं वेदे संवादसूक्तेषु दृश्यते। नाट्यमिति पदं 'नट्' इति धातूम् 'ण्वुल्' प्रत्यययोगेन निष्पदयते।[1] नटानां कर्मधर्मो वा नाट्यमिति अभिप्राय:। साहित्यदर्पणे "रत्याद्युद्बोधकालोके विभावा: काव्यनाट्ययो:" इति व्याख्याकृता।[2] भरतमुनीना "लोकवृत्तानुकरणंनाट्यं" इति कथितम्।[3] दशरुपके 'अवस्थानुकृतिनाट्यम्' इति उक्तम्।[4] महाकविकालिदासेन मालविकाग्निमित्रंनाटके 'नाट्यं भिन्नरुचेर्जनस्य बहुदाप्येकं समाराधानम् इति कथितम्।[5] नाटकस्य विषये एषा परंपरा प्राचीनकालत: एतावत्पर्यंतं प्रचलति।संस्कृतनाटकस्य प्रभाव: मराठी, हिन्दी, तेलगु, कानडी, बंगाली, गुजराथी तथा च भारतीयसर्वेषां भाषायां प्रतिबिंबितम्।मराठीनाटकेषु एष: प्रभाव: विशेषेण दृश्यते। १७७४ खि. सरविलियमजोन्सद्वारा आग्लभाषया अभिज्ञानशाकुंतलस्य अनुवादेन सहैव आधुनिकसंस्कृतरचानाया: सूत्रपात: समारब्ध: इति मन्यते इतिहासबुधै: । तत: आरभ्य अद्यावधि सा साहित्यधारा प्रवर्तते एव अनारतम्।संगीतशाकुंतलं प्रथमत: रंगभूमीम्यां आगतम्।मराठीसाहित्ये उत्तमोत्तमानाम्नाटकानाम्निर्मिति: जायते। तेषु वसंतकानेटकरमहाभागस्य नाम अग्रे अस्ति। वसंतकानेटकरमहाभागेन ऐतिहासिकनाटकस्य महति श्रृंखलामराठीनाटके प्रारब्धा।ऐतिहासिकनाटकं च महाराष्ट्रीय-नाटकस्य एक: स्वियोविशेष:। अनुमितो विशंतिशतकात्परिवर्तिन: समयत: संस्कृतनाट्यसाहित्यस्य जगति महत्परिवर्तनं जातम्; तेषु अनुदितसाहित्यस्य नूतन: प्रवाह: दृश्यते। संस्कृतस्य आधुनिकानि नाट्यानि अपि प्रचुरतया उपलभ्यते। आधुनिकीनाम्नाट्यकृतीनाम् अभिनयादिकार्यक्रमा: विभिन्नेषु विशिष्टेषु अवसरेषु द्रष्टुं शक्यन्ते। महाराष्ट्रे मराठीसाहित्ये ये ऐतिहासिक-प्रसिद्धानि नाटकानि सन्ति ; तेषु वसंतकानेटकरमहाभागस्य योगदानं विशेषेण दृश्यते। 'रायगडालाजेव्हाजागयेते' तथा च 'इथे ओशाळला मृत्यु' इति द्वे ऐतिहासिकनाटके प्रसिद्धे। ग.

बापळसुलेमहाभागेन वसंतकानेटकर-लिखितम् 'रायगडा जेव्हा जाग येते' तथा च 'इथे ओशाळला मृत्यु' इति लोकप्रियनाटकद्वयस्य संस्कृतभाषायाम् अनुवादं कृतम्।तथा च तृतीयम् अनूदितं रुपकं नाम धर्मवीरभारती इत्येषाम् अंधायुग ( हिन्दी) अस्ति। प्रस्तुतशोधपत्रे गबापळसुलेमहाभागस्य अनूदितसाहित्यविषयकं योगदानं प्रस्तूये।

उद्दिष्टम्- आधुनिक-अनूदितसाहित्यस्य स्वरूपम्, वैशिष्ट्यानां च समीक्षणम्, इत्यस्य शोधनिबन्धस्य उद्दिष्टमस्ति।

**ग.बा.पळसुलेमहोदयस्यसाहित्यम् –**

प्राप्तराष्ट्रपतिपुरस्कारः (1995 ), प्रसिद्धः संस्कृतपंडितः डॉ. ग.बा. पळसुलेमहाभागः संस्कृतानुरागी आसीत्।पुण्यपत्तने पुणेविश्वविद्यालये संस्कृतपालीविभागे विभागाध्यक्षरूपेण विराजितः। महाभागेन केवलं संस्कृतभाषायाम् अपि तु जर्मनभाषासु प्रभुत्वं सम्पादितम्।महाभागेन उपनिषदे, व्याकरणे, भाषाशास्त्र, इति विषये अध्ययनं कृत्वा बहुविधा रचनाकृता।

- विनायकवीरगाथा। (स्वतंत्रतावीरसावरकराणांचतित्रम्)
- विवेकान्दचरितम्।
- समानमस्तुवोमनः।(सामाजिकम् अंकत्रयात्मकनाटकम् - भारतशासनपुरस्कारप्राप्तम् )
- धन्योऽहं धन्योहम्। ( नाटकम्)
- भासो हासः । (नाटकम्)
- नायकम्-स्वातन्त्र्यवीराणां सावरकराणां जीवनमधिकृत्य विरचितं महाकाव्यम्

अनुदितानिकाव्यानि१) अग्निजा२)कमला३)तुकावक्ती

- अनुदितानि नाटकानि - नाटकानि -१)अथातो ज्ञानदेवोऽभूत २)धन्येयं गायनीकला ३)भ्रातृकलहम्
- अनुदितानि ऐतिहासिकनाटकानि – १) यदा रायदुर्गो जागर्ति २) अत्र मृत्यूर्विलज्जितः ३)अन्धयुगं ४) उत्तिष्ठ, कौन्तेय ! (स्वरचितम्)[६]

**ग.बा.पळसुलेमहाभागस्य अनुदित नाटकानि-**

रूपक-चतुष्टयम् इति ग्रन्थे महोदयस्य अनुदितानि त्रीणि नाटकानि सन्ति। तत्रद्वे वसंतकानेटकराणां कृतीस्तः।।१.रायगडाला जेंव्हा जाग येते (अत्र 'यदा रायदुर्गः जागर्ति) तथाच २.इथे ओशाळला मृत्यू (अत्र 'अत्र मृत्युर्विलाज्जितः) उभे अपि ऐतिहासिके। तृतीयम् अनुदितं रुपकं नाम धर्मवीरभारतीनाम्ना हिन्दीनाटककारेण रचितं 'अंधायुग' (हिंदी) अस्ति। 'उत्तिष्ठ, कौन्तेय' इति नाटकं स्वरचितमस्ति।

कथानकम् - ये महाराष्ट्रीयेतिहास्य एकंमहत्त्वपूर्णं कालखंडम्, एकं गौरवशालियुगम्–शिवशंभूयुगम्- उपजीवतः,यद् एकतः अभिमानस्पदम् अपरश्चहृद्यशल्यीभूतमपि। ऐतिहासिकं नाटकं सदपि न 'रायदुर्ग' नाटकं प्राधान्येन युद्ध-रहोमन्त्रणा-मरणमारणादिपरम्।आमरणं प्रत्यहं यस्मिन्कस्मिन्नपि समरव्यापारे व्यापृतस्यशिवप्रभोः नासित्कोऽपि अवसरः स्वपुत्रस्य शंभूराजस्य विनयाधानस्य।युवराजोऽयं प्रायः पितृसहवासवंचित एव अवर्धत। परिणामतश्चपितृविषयकस्य अन्याथाग्रहस्यस बलीभूतः । कियत् –पर्यंतम् ? अन्ततोगत्वा सशिवविरोधे महाराष्ट्रशत्रूभूतमोगलनृपं समाश्रितः विदीर्णहृदयेन शिवप्रभूना स्वयं गत्वा महता चातुर्येण, युक्तिवचोभि, स प्रत्यानीतः किंतु .....कृत्स्नं हृदयमलिनं जातमिव।रुग्णशरीरः, भग्नहृदयः शिवनृपः कश्चिदेवदिवसैस्वर्गतः । पुत्र मनसि पितृगतम् अन्यथाग्रहकृतं मनोमालिन्यम् –अयम् अस्य नाटकस्य मनोवैज्ञानिकः विषयः ।

कथानकम् –द्वितीयनाटकस्य (अत्रमृत्युर्विलज्जित:’) नाटकस्य नायक: शंभूराज:।हापित-मंत्री-सहकार्यस्य अनुष्ठानेषु तांत्रिकपुजासु च निहितकविकलशेन सहबद्धसख्यस्य, मद्यपानरतस्य, अन्ते च औरंगजेबेन बंदीग्राहं गृहीत्वा नृशंसतमपीडां कृत्वा प्राणैर्वियुक्तस्यापि मरणसमये प्रदर्शित-अलौकिक-संयमस्य, मूर्तिमद्धीरोदात्तत्वस्य तस्य हौतात्म्यम् (यदद्दष्ट्वा मृत्यूरपि विलज्जित: स्यात्) अस्य नाटकास्य विषय:।नूनं तस्य शातापराधानामपि क्षमापणसमर्थ: धीरोदात्ततम: कानेटकरमहोदय: अद्यतनीयेषु महाराष्ट्रियेषु नाटककारेषु अग्रगण्य:।तस्येदं नाटकद्वयं महाराष्ट्रेऽतीवलोकप्रियम्।

कथानकम् – तृतीयम् अनुदितं रुपकं नाम धर्मवीरभारती इत्येषां ‘अंधायुग’ (हिंदी)। प्राचीनकालादारभ्यमहाभारतेन अनेके भिन्नभिन्नप्रकारकाजना: आकृष्टा: सन्ति; धर्म-राजनीति-सामाजिकविचार-कला-कौशल्य-तत्त्वज्ञानादि-विषयकाणाम् इतिहासजिज्ञासव: अभ्यासका: संशोधकाश्च।काव्यनाटकादि प्रणेतृणां कृते महाभारतं काञ्चित् अनन्तरत्नप्रभावाखानिरेव आसीत्।अस्यां पंक्तौ तिष्ठति; अंधायुग’ रुपकं महाभारते एक: श्लोकऽस्ति – सर्वे क्षयान्तानिचया: पतनान्तासमुच्छया: । संयोगा: विप्रयोगान्तामरणान्तं च जीवितम् इति। महाभारतपठनान्तरं केषांचित् एवं प्रायैव सर्वं क्षणिकम्, सर्वं दु:खमिति रूपाचित्तवृत्तिर्भवति।धर्मवीरभारतीभि: काचिद्इदृश्येववृत्ति: अनुभूता इति भाति। किंतु न केवलं तदेव। प्रत्युतअन्याय:, वैशम्यम्, वर्गभेदा: दारिद्र्यम् इत्यादय: सामाजिकाअभिशापा: तदा बाहुल्येन आसन् (तथैव च स्थास्यन्ति !) इति विचारेऽपि अधोरेखितोऽस्ति।

अनुवादशैली – द्वे अपि ऐतिहासिकनाटकस्य भाषा उच्चतमा तथा च राजशाहीप्रभावावेण समृद्धा भवति अत: अनुवादकर्तुः परीक्षा अस्ति।किंतु ग. बा. पळसुलेमहाभागेन एतद्शिवधनुष्यं लीलया स्वीकृतं।प्रथमां केयदि शंभूराजानं. शिवरायस्य क्षामायाचनाकरणार्थं येसूबाई कथितवती तदा शंभूराजे उवाच –

**मराठीसंवाद: –**

शंभूराजे –(एकदमउसळून) महाराजांची माफी ? आम्ही ? आम्ही जाऊन महाराजाची माफी मागावी ? ते होणे नाही ! मामासाहेब हसतील आम्हाला, अष्टप्रधान घडीघडीला पाणउतारा करतील आमचा ! सरकारकडून आमचं नाक खाली झालेलं पाहून थयथया नाचतील ! ते होणे नाही. या घटकेपर्यंत आम्ही कोणापुढे मस्तक झुकवले नाही. आम्ही कधी कशाचा पश्चाताप केला नाही. कोणापुढे कधी दिलगिरीसाठी झोळी पसरली नाही ! एक मासाहेब ! बस, एक थोरल्या मासाहेब ! त्यांच्या पायांशिवाय अन्यपायांना आम्ही कधी स्पर्श केला नाही ! आम्ही तुम्हाला स्पष्ट बजावतो-(इतका वेळ येसूबाई शंभूराजांच्या मुद्रेवर टक लावून उभी आहे. नजरेला नजर मिळताच ती प्रसन्नपणे अर्थपूर्णस्मित करते.) हसू नका --- पटणार नाहीत तुम्हाला आमचे बोल----पण आम्ही स्पष्ट सांगतो की, (थबकतात. क्षणार्धांत उमगायचे ते उमगतात. मग हलके च विषण्णतेने) ठीक ठीक ! तुमचं ही रास्त आहे. घाव आम्ही घातला. आता आम्हाला माफी मागण्यावाचून गत्यंतर नाही, तुमच्याखातर ---केवळ तुमच्या शब्दाखातर महाराजांची माफी मागतो आम्ही ! [७]

**अनुदितसंवाद:-**

महाराज: क्षमायाचितव्य:? अस्माभि: ? अस्माभि: ? गत्वा महाराज: क्षमायाचितव्या: ? तन्नभविता। (येसुदेव्या: सस्मितमुखं प्रेक्ष्य) अथवा तथैव भवतु।यत्युवराज्ञी आह, युक्तमेवतत।प्रहार: अस्माभि: कृत: क्षमापि अस्माभिरेवयाचनीया।नास्ति गत्यन्तरम्। नास्ति

गत्यंतरम्युष्माकं कृते, केवलं, युष्माकं गौरवार्थम् एतेवयं गत्वा महाराजं क्षमायाचामहे।

(निष्क्रमन्द्वारदेशे पतितं राजारामस्य प्रवारकं दृष्ट्वा गृण्हाति। तंस्पर्शेनलालयन्विचारग्नोभवति।) तदानीम् अम्बा रामराजं कठोरतयावाचा ताडितवती। वात्तादडनं कृतम्, किंतु समकालमेव राजारामम् एतेन प्रावारकेण प्रावृणोदपि। नूनं भाग्यवान्रामराज:।अस्माकमपि यदि जननी आद्यजीविता अभविष्यत्। (मन्दं मन्दं निष्क्रमति ) ।८

प्रथमअंके शंभूराजस्य एक: अतीवभावपूर्णसंवाद: अस्ति ; तस्य अनुवादः पळसुलेमहाभागेन लीलयाकृतम्।

"महाराजं च कटिदेशे आश्लिष्यदीनम् आक्रोशति, "आबासाहेब, आबासाहेब, कच्चिन्न भवन्त: अस्मान् एकाकिन: परित्यज्य अपगमिष्यथ ?" एकमपि अक्षरम् अनुच्चार्य तस्य कोमलं हस्ताश्लेषं तेनिजाभि: वज्रसाराभि: अंगुलीभि: विश्लेषयन्ति, अंतर्गृहं प्रतिचअंगुलिनेर्देशं कुर्वन्ति।[९]

अत्र पळसुलेमहाभागेन भावस्पर्शीअनुवादं कृतम्, न कोपिमुलभावान्त्यक्तम्।भाषासौदर्यं, अर्थगौरवम्, रसपरिपोष: दृश्यते।

**अनूदितसंवाद:-**

"इथेओशाळला मृत्यु" इति नाटकस्य प्रथमांके कविकलशस्य एक: संवादः अतीवकाव्यात्मकम् अस्ति तस्य संस्कृतानुवाद: पश्यतु – सूर्यस्य यदि निर्वाणं भवेत्तर्हि का वा तारकाणां गति: स्यात् इति चिन्तातुरं कमपि मानवजन्तुं कवि: वक्ति-

तारकाचिन्तयाकिंते
निर्वाणं भास्करे गते ? ।
देव: क्षमाऽत्र, दुर्बुद्धे
निजं दीपं स्थिरी कुरु।।[१०]

"इथेओशाळलामृत्यू" इति नाटकस्य एकभावपूर्णसंवाद: तथा च अतीवप्रसिध्द: संवाद: येसुदेव्या: मुखे वर्तते तस्य अनुवाद:

**संस्कृते पश्य-**

"युष्माकमपि निद्रानष्टाऽस्ति, किंतु पन्त, केवलं गतान्कांश्चित्दिवसान्।भवता अयं विषय: प्रस्तुत:, इत्येव किंचित्विस्रब्धं कथयाम: ।यत: प्रभृतिआलमगीर: दक्षिणापथम् अवतीर्ण: तत आरभ्य गतानि सप्तवर्षाणि नैकस्यामपिरात्रौ आर्यपुत्रस्यचक्षु: निद्रानिमिलितम् अस्माभि: अवलोकितम्। मासानुमासम्, वर्षानुवर्षं, रात्रिंदिवम् असौ अश्वारूढ: ।न क्षुधां गणयति, न तृष्णाम् ; न आतपं, न वर्षाम्।सर्वदा युद्धम् – क्वचित् अभियानम् , क्वचित्रोध:, क्वचित्हस्ताहस्ति, क्वचित्मरणान्तसंग्राम: । इतोमध्यरात्रम् अतिक्रामति, निद्राजडम् अस्माकं नेत्रयुगलं निमीलितुम् इच्छति, इतस्तुपृष्ठनिहितहस्तस्य आर्यपुत्रस्य गतागतम् अखंडमेव।ननु अतिक्रांन्तं मध्यरात्रम्, क्षणमपितावत्विश्रम्यताम् इति प्रार्थनापरान् अस्मान् अवधीरयति। स्वस्य जागर्ति, अस्मांश्चजागरयति। क्षणमात्रमपि निद्रापरवशे अस्मन्नेत्रेदृष्टालोपं नियन्तुम् असमर्थ: आर्यपुत्र: अस्मान्सरभसं विधूय पृच्छति – 'उतिष्ठ।जगृहि।ननु इयम् आलमगिरेण आदिलशाही भक्षिता।इयं स्वाहाकृता कुतुबशाही।निद्रास्येवकथम् ? कदाचित् अस्माभि: 'महाराज, ननु श्रूयताम्।अयं विरौतिप्रभातिक: कुक्कुट: । श्व:: अभियानार्थं प्रस्थातव्यम्।क्षणमपि अनुगृह्यताम् इयं शय्या इति प्रार्थित: सन् अनिच्छयैव अस्मदवचनात् आत्मानं शाय्यायां निक्षिपति, सखड्गम्सकिरीटम्। क्षणेन च उत्स्वप्नायते – 'आबासाहेब,आबासाहेब,नगणयति आलमगीरस्य अक्षौहिणी: ।अभंगा: सन्ति साह्यदुर्गा:।समर्थौस्त:

सन्ताजिधनाजी।किंतु कातरा: सन्ति एते नयज्ञा:,एते भुक्तिभोजका: । किंकरोमि ? आर्यपुत्रस्य शिरोभारं लघुकर्तुम् अस्माभि: शिरस्त्राणम् अपनेतुं यदि प्रयत्यते, तर्हि अक्षिणीविशालीकृत्य आक्रोशति – 'अकालपीडिताऽस्तिप्रज्ञा।उद्घाटयतधान्यागाराणि।मास्तुकर ग्रहणम्।किम् अस्मन् उद्घाटयतधान्यागाराणि। मास्तुकरग्रहणम्। किम्अस्मन्-मस्तकचिन्तया ? कदाचिच्चशय्यायां इतस्ततोविवर्तमान: अर्भकवत्रोदितुं प्रवर्तते।ब्रवीति – 'हतोवाई-संग्रामेहम्बीरराय: ।न पुनर्भवितातादृशोवीरपुरुष:।आबासाहेब, संप्रति अभिजानीमोवयं, सिंहगडसंग्रामेयदानरवीरस्तानाजिर्हत:, तदाभवताकियद्दु:खम्अनुभूतं स्यात्।[११]

**अनुदित-नाटकस्यविशेषता –**

- ❖ महाभागेन ऐतिहासिकनाटकस्य भाषासौदर्यंकुत्रापिनत्यक्तम्।
- ❖ अनुवादेभावनाविलास:, भाषासौष्ठव्यं, तथाचरसोत्पत्ति: उत्तमरूपेणसाधितम्।अनुवाद इति शब्दस्यअर्थ: अनु+वादअर्थात्-अनुवदति इति अनुवाद: [१२]अस्यप्रत्यय: अनुदित त्रयोऽपि नाटकेदृश्यते।
- ❖ यदा रायदुर्ग◌ः जागर्ति इति नाटके पिता-पुत्रस्य यत्मनोवैज्ञानिकचित्रणं कृतम्तदपि कविना अनुवादेऽपि उत्तमरीत्या प्रतिपादितम्।
- ❖ व्याकरणरचना, भाषाकौशल्यम्, अलंकारयोजनाया: प्रयोग: सुस्ठुतयाकृतम्।

**उपसंहार:**

- अनुवादसाहित्येन संस्कृतभाषाभूय: विश्वभाषारूपेण प्रतिष्ठिताजाता।
- अभिज्ञानशाकुंतस्य आग्लानुवादेनसहैवचिरकालेन संस्कृतभाषायाम् अवरुद्धाया: रचनाधर्मिताया: पुनरारभ्यअजायत; तथा च अन◌ूदितसाहित्यस्य नूतना परंपरा प्रारब्धा।
- नाटके सामासिकरचना, अलंकारिकयोजना, भाषारचनाअनुवादे सुष्ठुतयाकृतमस्ति।
- संस्कृतसाहित्यस्य आधुनिकरचनासुभाषाया: सारल्यम् आधुनिकसमाजेन तथा चा साहित्येन सह संबध: दृढ: जात: ।
- अनुदितसाहित्येन अन्याभाषाया: साहित्यप्रवाहस्य परिचय: जात:।
- महाराष्ट्रे ग.बा.पळसुलेमहाभागस्य अनुदितनाट्यसाहित्येन ऐतिहासिकमराठीसाहित्यस्य लोकप्रियता पाठकजनेषु उत्तरोत्तरम् अभिवृद्धाजाता।

**संदर्भ**


१. सं.हि. को. – पृ.५१६

२. स.द.अ.१.पृ

३. ना.शा. - अ.१-१११पृ

४. द.रु-.प्र.१-७पृ -४

५. मा.अ.-अंक१-४पृ.७०

६. रुपक.चतु. –मलपृष्ठ

७. रा.जे.जा. ये.-अं.१पृ.१८

८. रुप.चतु. पृ-७

९. रुप.चतु. पृ-४०

१०. रूप.चतु –पृ१९

११. रुप.चतु. पृ-४६

१२. अनु.शा. पृ१४


**संदर्भग्रंथ**

१. रूपक-चतुष्टयम् – डॉ. ग. बा.. पळसुले, प्रकाशक: डॉ. ग. बा. पळसुले - सत्कारसमिती,पुणे२०००

२. साहित्यदर्पण –विश्वनाथसंपा. डॉ. सत्यव्रतसिंह, चौखंबाविद्याभवन, वाराणासी, २०१३

3. नाट्यशास्त्र – भरतमुनी,संपा. बाबूलालशुक्लशास्त्री, चौखंबासंस्कृतसंस्थान, वाराणासी, पुनर्मुद्रणम, इ.सं.२०७५

४.मालविकाग्नीमित्रम् –कालिदास,संपा. प्रा.गो.बनहट्टी, सुविचारप्रकाशनमंडळनागपूरआणिपुणे१९६१

६. रायगडालाजेव्हाजागयेते –वसंतकानेटक, पॉपुलरप्रकाशन, मुंबई१९९४

७. इथेओशाळलामृत्यू – वसंतकानेटकर, पॉपुलरप्रकाशन, मुबई.१९९६

८. संस्कृतसाहित्य, बिसवीशताब्धी, राधावल्लभः त्रिपाठी, राष्ट्रीय-संस्कृत-संस्थान, नईदिल्ली, प्रथमसंस्करणम्,१९९९

९. अनुवादशास्त्रम्- नलिनीचाफेकर,प्रकाशकश्री.म.ग. चाफेकर, ठाणे२००८

१०. संस्कृतहिंदीकोश – वाशि.आप्टे- मोतीलालबनारसीदासपब्लिशर्सप्रा.लि.दिल्ली.१९६६

११.दशरूपक –धनंजय,संपा.डॉ. भोलाशंकरव्यास – चौखंबाविद्याभवन, बनारस.१९९३

# बङ्गदेशीयसंस्कृतकाव्यकोविदस्य महामहोपाध्यायश्रीजीवन्यायतीर्थस्य विंशशतकीयसामाजिकावक्षयाश्रयिसंस्कृतनाट्यनिकरः, तथा तस्य मूल्यायनम्

**सुमन ब्यानार्जी**

कलिकाता विश्वविद्यालयः

sumanbanerjee7797@gmail.com

**विषयसारः**

*साहित्यं समाजस्यादर्श इति कथ्यते बुधैः। तन्मध्ये पुनर्नाट्यसाहित्यं साक्षाद्भावेन लोकवृत्तानुकरणात्मकं भवति। नाट्यविषयवस्तुसम्बन्धे स्वयं नाट्यशास्त्रमेव - "**लोकवृत्तानुकरणं भवेन्नाट्यम्**" एवं निर्दिदेश। विंशशतकसमये संस्कृतनाट्यं प्रायेण सम्पूर्णतया नाट्यशास्त्रस्य कठिनावरणस्य प्रध्वंसतां सम्पाद्याधुनिकीकरणतायामुन्नीमभवद् यद्यपि, तथापि संस्कृतनाट्यस्य विषयवस्त्वद्यापि लोकवृत्तानुकरणात्मकं वर्त्तते। अस्या आधुनिकतायाः स्पर्शं विनीय लोकवृत्तं नवाङ्गिकेन सह अदभ्रबङ्गीयनाट्यकारा नाट्येषु उपस्थापयन्ति बङ्गदेशे। एषां बङ्गीयसंस्कृतनाट्यकृत्परिकराणामन्यतमाः संस्कृतनाट्यकृत्कुलललामरूपिणो महामहोपाध्यायश्रीजीवन्यायतीर्थमहोदया लोकवृत्तसंश्लिष्टान्नाट्यप्रचयान् विरचितवन्तः। तन्मध्ये तस्य महोदयस्य विंशशतकीय-सामाजिकावक्षयमूलको नाट्यनिकरोऽतीव भास्वरः। एतन्नाट्येषु तत्रभवान्नाट्यकारो विंशशतकीयबङ्गदेशस्य तथा वैश्विकस्तरस्य सामाजिकावक्षयस्य नग्ना दिशः सुस्पष्टत्वेनोपस्थापितवान्। तत्रभवतो नाट्यकृद्दो लेखनी सरससरस्वतीराश्युपन्यासेन तत्कालीनसमाजं प्रति तिर्योगाक्रमणं कृतवतीव। अस्य गवेषणापत्रस्य संक्षिप्तपरिसरे तत्रभवन्महामहोपाध्यायकृतस्य विंशशतकीयसामाजिकावक्षयाश्रयिसंस्कृतनाट्यनिकरस्य समुल्लेखनपूर्वकं समालोचनं तथा मूल्यायनं सहृदयपाठककुलसविधेऽस्माभिरुपस्थापयितुं प्रचेष्यते।*

**नाट्यमिति** पदं **'नट'**-शब्दस्योत्तरं **'ञ्य'**प्रत्यययोगेन निष्पद्यते[xix]। नटानां कर्म, नटानां धर्मो वा "नाट्यमिति" अभिप्रायः। साहित्यदर्पणस्य प्रख्याতटीकाकारो हरिदासभट्टाचार्यमहाशयः साहित्यदर्पणस्य तृतीये परिच्छेदे विश्वनाथकथितस्य विभाव[xx]-लक्षणस्य व्याख्यानप्रसङ्गे नाट्यशब्दस्य व्याख्यानावसरे नटप्रयोज्यं हि नाट्यमित्यभिहितवान्[xxi]। अभिनयकुशलिनो नटाः संसारिणां लोकानां सुखदुःखसमुद्भूता या अवस्था, तस्या एवास्थाया अङ्गाद्यैरभिनयं कुर्वन्ति इत्येवं नाट्यं कथ्यते बुधैः[xxii]। अर्थात्, एवं सामाजिकानां वृत्तानुकीर्त्तनमेव नाट्यम् इत्यस्माभिर्वक्तुं शक्यते। महर्षिभरताद्याचार्याणामाशयस्तावदीदृश[xxiii] एव। लोकवृत्तानुकरणात्मकमेतन्नाट्यं नाटकमभिधीयते प्राज्ञैः। भगवतो नन्दिकेश्वरस्य मतेन – नाट्यमेव नाटकम्[xxiv]। साहित्यदर्पणस्य रुचिराटीकाकारो नाट्यशब्देन नाटकमेवागमयति[xxv]। हरिदासशर्म्मणोऽप्यनुरूपं मतमवलोक्यते साहित्यदर्पणस्य टीकायाम्[xxvi]। अनुमितोनविंशशतकात् परवर्त्तिनः समयतः संस्कृतनाट्यसाहित्यस्य जगति महत् परिवर्तनमजायत। संस्कृतकविसम्प्रदायः सुदीर्घसमयं यावत् प्रचलितायाः नाट्यधारायाः सुगठितावरणस्य प्रध्वंसतां स्वीयशक्त्या सम्पाद्य नवधाराविचयविलासे संसक्तः समासीत्। तैराविष्कृता सा पूर्णतया महर्षिपरम्पराप्रविहिताज्जटिलानुशासनजालादुन्मुक्तैका विलक्षणा धारा। यत्र निदारुणः सरस्वतीराशिः कवीनां पाण्डित्यस्य द्योतकत्वस्य चरमतां नालिङ्ग्य, मुख्यवस्तूपस्थापनप्रगतीनां सहायकत्वधर्मविपर्यासविधिं नाश्रित्य तथा मुख्यनाट्य-विषयवस्तुना सह आत्मन औत्कर्षप्रतिपादनलीलायां नावतीर्य मुख्यवस्तुपरिपुष्ट्यनुकूल-

विधिमेवाचरति। यत्र नाट्यवस्तुनोऽहेतुक उपन्यासः सहृदयसामाजिकवर्गस्य चेतो नोद्वेजयति। पक्षान्तरे, सा धारा आर्त्तानां, श्रेमोद्विग्नानां, संसारयातनाक्लिष्टाणां मनुष्याणां च पुनः दैनन्दिनजीवनप्रवाहमूलकनाट्यकाहिन्युपस्थापनोपायेन सामाजिकाननायासेन तादात्म्यं कारयति।

संस्कृतसाहित्येतिहासे नवाविष्कृतेयं धारा नवाध्यायसंयोजनी वर्तते। शनैः शनैः समग्रभारतदेशे प्रसार्यमाणाया अस्या धारायाः एकः स्रोतप्रवाहः बङ्गदेशं प्रविष्टः सन् बङ्गीयसंस्कृतकविसकलैर्बहुधा समादृतः समासीत्। एता नवीना धारा आश्रित्यैव बङ्गीयसंस्कृतकवयः स्वीयप्रतिभासंमिश्रणेन नाट्यकीर्त्तने लीना अभवन्। अनुमितोनविंश-शतकसमयाद् बङ्गीयसंस्कृतनाट्यकाराणां मध्ये आधुनिकधाराया नाट्येषु रुचिरजायत। तदा प्रभृति बङ्गेष्वाधुनिकधाराविहितनाट्यानां रचनाप्रवाहः समारब्धः। विंशशतकादेकविंशशतकमध्ये बङ्गदेशे एतन्नवीनधारासंसृष्टनाटकमव्यापन्नगत्याप्रचलति। अधुनातनसमयेऽस्य विवृद्धिरुपचीयमाना क्रमेणात्र। अदभ्रबङ्गीयपण्डिता अनेनैव पथा स्वीयमनीषया विचित्रं रसोत्तीर्णं नाट्यं रचयन्तनवरतम्।

विंशशतकत एकविंशशतकं यावदिति एकशतवत्सरे बङ्गदेशे विचित्ररचनाराशिभिः सह समसामयिकसामाजिकावक्षयदिश आश्रित्य बङ्गीयसंस्कृतकविकदम्बः कश्चन नाट्यरचनासु संप्रवृत्तः। समाजस्य तथा संसारस्य तिमिरमया विभिन्ना दिशः सञ्चित्रितास्तत्र। कुसंस्कारता, धर्मस्यापक्षयः, शठता, ग्रन्थिभेदनवृत्तिः, धर्मधारणच्छद्मनानरसंहारः, प्रवञ्चना, स्वीयस्वार्थ-सिद्धये परपीडनञ्चैतादृश्यः सुष्ठुसमाजसञ्चालन-परिपन्थिघटनाः तथा सुसंस्कृतेः क्रमेणापक्षीयमाणा अवस्थास्तेषु नाट्येषूपन्यस्यन्ते बङ्गीयकविभिः। तैः समकालीनसामाजिकव्यवस्थापनाया नग्नदिशो नाट्यप्रकीर्त्तनमाध्यमेन उपस्थाप्य ताः प्रति निःस्वनो धिक्कारः तथा प्रतिवादः स्वीयलेखनीद्वारा सततं विज्ञापितः। एतेषां बङ्गीय-संस्कृतनाट्यकाराणां मध्ये – क्षितीशचन्द्रचट्टोपाध्यायः,वीरेन्द्रकुमारभट्टाचार्यः, सिद्धेश्वरचट्टोपाध्यायः, नित्यानन्दस्मृतितीर्थः, सुरेन्द्रमोहनः, सुखमयगङ्गोपाध्यायः चान्योन्याः तथैतेषां संस्कृतकवीनां नाट्यानि सविशेषं समुल्लेखनीयानि वर्तन्ते। एषां मध्येऽन्यतमःश्रीजीवन्यायतीर्थः। गवेषणाप्रबन्धेऽस्मिन्नस्य नाट्यकृतः सामाजिकावक्षय-समाश्रयिनाट्यानाम् उल्लेखस्तथा तेषां मूल्यांकनपूर्वकं संस्कृतनाट्यसाहित्ये व्यङ्ग्यरचनामाध्यमेन कीदृशं तस्य योगदानमित्यालोचनमत्र भवेदिति प्रतिज्ञा।

**श्रीजीवन्यायतीर्थः (१८९४ – १९९२समयकालः)**

बङ्गदेशीयस्यास्य विदुषो जन्मसमय ऊनविंशशतकस्यान्तिमे। किन्तु, अस्य सारस्वतसाधना संघटिता विंशशतके सम्यक्तया। अतः अस्य विषयेऽत्र समालोचनमपरिहार्यमेव। विंशशतकसमयस्य समाजिकावक्षयस्य चित्रमनेन यादृशमङ्कितम्, न तथा अन्यैरिति। १८९४-खीष्टाब्दस्य 'जानुयारि'मासि **'चब्बिशपरगणा'** इति स्थाने पञ्चाननतर्करत्नात्मजो जीवोऽजायत। आधुनिकसंस्कृतसाहित्यं विचित्ररचनाराशिभिस्तेन यद्यपि समृद्धीकृतं, तथापि नाट्यकृद्रूपेण तस्य प्रसिद्धरासीद् विपुला। तन्मध्ये पुनस्तस्य विंशशतकीयसामाजिकावक्षयाश्रयिनाट्यनिकरः समाधिकतया प्रसिद्धः। नाट्यैरेभिस्तत्रभवान् तत्कालीनसमाजस्य यादृशं दुर्गतिचित्रमङ्कितवान्, न तथा अन्ये नाट्यकाराः। विषयवस्तूपस्थापनकैतवाद् यस्मात् कविरेतैर्नाट्यैः सामाजिकपरिस्थितीः प्रति व्यङ्ग्यभावं

प्रदर्शितवान्, अतः नाट्यान्येतानि व्यङ्ग्यनाट्यानि कथितुं शक्यन्तेऽस्माभिः। एतानि नाट्यानि तावत् - **'विवाहविडम्बनम्'**, **'चौरचातुरीयम्'**, **'चण्डताण्डवम्'**, **'क्षुतक्षेमीयम्'**, **'चिपिटकचर्वणम्'**, **'शतवार्षिकम्'**, **'दरिद्रदुर्दैवम्'**, **'साम्यसागरकल्लोलम्'** चेति।

**विवाहविडम्बने** नामधेये नाट्ये समाजसंसारस्य स्वरूपमुपस्थापितं नाट्यकृता। यत्र कविः षष्टिवर्षकस्य रतिकान्तनामकस्य कस्यापि विपत्नीकस्थविरस्य चन्द्रलेखानाम्न्या कन्यया सह उपयाम इति मुख्यविषयमाश्रित्य लिखितवान्। रतिकान्तः कश्चित् विवाहसम्बन्धयोजकं नियोज्य चन्द्रलेखया सह वैवाहिकसम्बन्धं स्थिरीकर्त्तुं तमादिष्टवान्। धूर्त्तः घटकोऽपि कन्यापक्षस्य सविधे वररूपेण रतिकान्तं नोपस्थाप्य तरुणनामानं युवकमुपस्थापितवान्। अन्यतो वृद्धरतिकान्त आत्मानं यौवनवन्तं दर्शयितुं विचित्रप्रसाधनद्रव्यैरात्मानं सज्जीकृत्यापि ग्रामस्थकतिपययुवकैर्विवाह आप्तबाधोऽभवत्। अवशेषे तस्य विवाहकार्यमपि सम्पन्नं नाभवत्। भग्नमनोरथो रतिकान्तोऽन्तेऽकथयत् –

**"घटको घोटकश्चैव स्यान्मनोरथचालकः।**

**क्वचित् सन्निधिमासाद्य पदाघातप्रियः पुनः।।"** xxvii*

अङ्कद्वयविशिष्टे द्विसंख्यकमुखसन्धिसमन्विते **चौरचातुरीये** प्रहसनेऽस्मिन् चौर्यवृत्तेर्विचित्रदिग्दर्शनं कारयति स्म कविः। यत्र घटंकरनामकः कोऽपि तस्करः कदापि अन्धभावं कदापि उन्मत्तभावं प्रदर्श्य कदा वा पुनः मार्गरजोनिक्षेपणेन रक्षिपुरुषाद् वारं वारं पलायते। अन्ते च कस्यापि साधोः संसर्गात्तस्य जीवने महत् परिवर्तनमजायत, स च चौर्यवृत्तिपरिवर्जने कृतसंकल्पोऽभवत्।

इदं **चण्डताण्वम्** नाटकं प्रहसनश्रेण्यन्तर्गतम्। द्वाभ्यामङ्काभ्यां समन्विते नाट्येऽस्मिन् इउरोपमहादेशस्य द्वितीयविश्वयुद्धकालीने समये हिंसात्मिका तथा अधमोचिता प्रवृत्तिः प्रदर्शिता। यत्र राशियादेशस्य नायकः स्तालिनः, जार्मानस्य हिट्लारः, इतालिदेशस्य मुसोलिनी च इत्यादीनां स्वनामप्रसिद्धानां नेतृणामुपस्थितिः परिलक्ष्यते। एतेषां राष्ट्रनेतृणां राजनैतिकक्षमतादम्भदम्भोलिना नृकुलदलनस्य निदारुणा परिणतिर्नाट्यकृता स्वीयलेखन्या चित्रिता। नाट्यस्य प्रथमेऽङ्के श्रूयते स्तालिनस्य धर्मध्वंसनार्थे उद्घोषणा। धर्मसम्बन्धे तस्याशयस्तावदीदृशः प्रदर्शितः नाट्यकृता –

**"अयञ्च धर्मो दूषणो विवेकिनां भूषणं कपटपटूनां घातकः सर्वाशुभानां पातकञ्च सर्वराष्ट्राणाम्"** xxviii*।

**क्षुतक्षेमीये** कस्यापि धनिनः कृपणतायाश्चरमतां दर्शयति स नाट्यकारः। नाटकेऽस्मिन् दृश्यते एकदा परिश्रान्तः चित्रगुप्तः रङ्गनाथस्य गृहे आतिथ्यं लेभे। परन्तु, पाचकेन भृत्येन च निवारितोऽपि ज्योतिषिरूपेण आत्मपरिचयं विज्ञाप्य गुप्तनिधिप्राप्त्युपायकथनेन गृहस्वामिनं समृद्धिं करिष्ये इति अकथयत्। इति श्रुत्वा पाचकभृत्ययोः मध्ये कोऽग्रे धनं प्राप्स्यति इत्याशया चित्रगुप्तमुद्दिश्य स्वीयहस्तौ तौ विस्तृतवन्तौ। अन्यतः पाचकभृत्ययोः कोलाहलं श्रुत्वा गृहस्वामी तत्रागत्य आगन्तुकस्य परिचयं ज्ञात्वा तथा निधिप्राप्त्यर्थे कृपणो रङ्गनाथोऽतिथिसत्कारार्थे निमज्जितोऽभवत्। यदा गृहस्वामी रङ्गनाथः पृष्टवान् तस्य आयुःकालस्य विषयं, तदा एकवत्सरकालं यावदायुरवशिष्टमिति श्रुत्वा दुःखिते तस्मिन् दीर्घायुःप्राप्त्युपायं जिज्ञासमान एकवर्षकालं यावदेव सर्वदुःखार्तजनाः तृणाच्छादनदानेन सेवनीयाः। अनेनैव पुण्येन दीर्घं जीवेदित्युक्त्वा चलितश्चित्रगुप्तः।

अन्यतो द्वितीयमुखसन्धौ कृतान्तपुर्यां दृश्यं वर्णितमस्ति। यत्र कृतान्तचित्रगुप्तयोरुपस्थितौ रङ्गनाथस्यागमनं तथा रङ्गनाथकृतपुण्यानां विस्तृतायाः सूचिकायाश्चित्रगुप्तेन

कथनात्, कृतान्तदेशात् यमदूतैः स्वकन्धैर्मर्त्यलोके पुनस्तस्य रङ्गनाथस्य प्रेषणञ्चेति लक्ष्यते।

**चिपिटकचर्वणे** कस्यापि कापालीति धनलोलुपस्य कृपणस्य धूर्त्ततान्त्रिकेण धनानां हरणमिति काहिनी समुल्लिखिता। यत्र भृत्यभृत्ययोः कोलाहलेनोद्विग्नः कपाली यदा तत्रागतः, तथा तस्य पादुका केनापि कुक्कुरेण नीता। सः कपाली पादुकोद्धारहेतवे तत्पश्चाद्धावितवान्। किन्तु, कुक्कुरदंशनादसृञ्भयस्य तस्य चिकित्सार्थं कस्यापि वैद्यस्य आगमने स उन्मत्तायते। वैद्योऽपि स्वीयसंहननहानिमाशङ्क्य पलायितः। अन्यतः स्वीयपत्युश्चिकित्सार्थे कोऽपि भण्डस्तान्त्रिकस्तस्य पत्न्यानीतः। स तान्त्रिको विचित्रवाक्चातुर्येण तथा विभिन्नशास्त्रोपायानां प्रमादपूर्णव्याख्यानं कृत्वा तस्य धनानि लुण्ठितवान्। गृहत्यागकाले स तान्त्रिको ग्रामनिवासिनां परियोजनानुसारेण लुण्ठितधनादंशविशेषाणां कपालिनः स्त्रियै प्रदानार्थे ग्रामवासिने प्रदत्तवान्। इत्येव काहिनीसारः।

रकेटयन्त्रेण मर्त्त्यमणेः स्वर्गमनम्, तथा स्वर्गस्य द्वारपालेन सह मर्त्त्यमणेः संघर्षः, तस्या मर्त्त्यमणेरवलोकने मङ्गलादिग्रहाणां शङ्का, चन्द्रसमीपात् सर्वग्रहाणामुद्वेगकारणं जानतो राहोः आश्वासवाणी, तेन सह च संघर्षः, सर्वेषां ग्रहादीनां राहोः शरणागतिः। अवशेषे विचारार्थं सर्वेषां मर्त्त्यमणिसमेतानां ग्रहादीनां ब्रह्मणः समीपे गमनम्। इत्येव **शतवार्षिकनाट्यस्य** विषयसारः।

**दरिद्रदुर्दैव**नाटके वक्रेश्वरनामकस्य कस्यचिद्भिक्षुकस्य करुणावस्थास्तथा तस्य मानवतायाः सङ्कीर्णताश्च वर्णिताः। एकदा स वक्रेश्वरः पर्याप्तभिक्षाप्तेरभावात्तस्य पत्न्या लम्बोदर्या सह वाक्कलहे लिप्तः सन् स्वीयदरिद्रावस्थायाः हेतुरूपेण पत्नीभाग्यं दृष्ट्वा गृहाच्चलितवान्। प्रखरग्रीष्मस्य समय एकस्मिन् दिवसे सर्वस्मिन् भिक्षार्थं गते चक्रेश्वरोऽपि निर्गतः, किन्तु पिपासार्दितः स शतशोऽन्विष्य जलं न प्राप्तवान्। अन्यतः क्षुद्ररामनाम्नि कस्मिंश्चिद् वणिजे आगते तस्य सविधे वक्रेश्वरः साहाय्यं प्रार्थयित्वा तेन वणिजा उपहसितो भूत्वा तं शशाप। अन्यतः वणिजे प्रस्थिते कस्यापि सिद्धस्यागमनं भवति। तस्य सविधे भगवच्छिवप्रदत्तं पाशशलाकात्रयमासीत्। तन्मध्ये तृतीयपाशस्य प्रभावेन स सिद्धो जलार्थमितस्ततो धावतो वक्रेश्वरस्य जलपात्रं पूर्णं कृतवान्। तस्य सिद्धस्य एतादृशीं क्षमतां विलोक्य स वक्रेश्वर आत्मदारिद्र्यमोचनार्थेऽनुरोधं कृतवान्। स सिद्धो दिव्यपाशमेकं दत्त्वा – अनेन पाशेन तव यो लाभो भविष्यति, तस्य लाभस्य द्विगुणवृद्धिः प्रतिवेशिनां भवेदिति उवाच। इतः सिद्धस्य वचनमिदं सत्याय पर्यवसितं दृष्ट्वा अनेन पाशेनात्मना सह प्रतिवेशिनोऽपि दारिद्र्यनिपीडितान् कर्तुमयाचत। किन्तु सपदि सिद्ध आगत्य तस्मात् पाशमनयत्। इत्ययं काहिनीसंक्षेपः।

नाट्यकारो जीवो विंशशतकीयसामाजिकावक्षयस्य पटभूमिकामाश्रित्य नाटकरचनेन संस्कृतनाट्यसाहित्येतिहासे यद् योगदानमकरोत्, एकवाक्येन तदनवद्यम्। तस्य लेखनी तस्याः लेखनीत्वमर्यादायाः ह्रासमानतां प्राप्य वर्त्तिकायत इव। तयैव वर्त्तिकया स विंशशतकीयसामाजिकावक्षयस्य निदारुणमालेख्यमङ्कितवान्। रचनायाः संक्षिप्तपरिसरे स प्रत्येकं नाट्यचरित्रं जीवितमकरोत्। तेषां सहायेनैव सामाजिकावक्षयसम्पृक्तदृश्यपटानि सूक्ष्मत्वेन समुपस्थापितवानिति। यथा धनावाप्तेः लोलुपतैव क्षुतक्षेमीयनामकनाट्ये रङ्गनाथस्य पाचकभृत्ययोर्मध्ये वादप्रतिवादं जनयति। तत्र कस्य हस्तेऽग्रे धनप्राप्तेर्योगोऽस्ति तथा ज्योतिषिरूपेणात्मनः परिचयस्य प्रदातुः चित्रगुप्तस्य सविधे हस्तदर्शनविषये कोलाहलकारिणोः तयोरुदग्रवासना तेषां व्यवहारादेवानुभूयते – **"हस्तं प्रसारयति पाचकः,**

**भृत्यस्तदुपरि, पाचकस्तदुपरि''**। आत्मनश्चौर्यवृत्तिपरिरक्षणार्थे धूर्तताया आश्रयमकरोत् घटंकरनामकः कोऽपि तस्करः चौरचातुरीयनाट्ये। रक्षिपुरुषाद्भीतः स कदापि उन्मत्तभावमाश्रयते कदा वा अन्धत्वभावं समाश्रित्य रक्षिपुरुषाणां सविधे एव कथयति – **''नेत्रहीनस्य मे यथा दिवा तथा रात्रिः''**। अहो समाजस्य कीदृशी निदारुणा गतिः।

धर्मस्यापह्नवः, धर्मस्य विपरीतव्याख्यानपूर्वकं परिवर्जनम्, धर्मः सम्प्रदायविशेषस्य प्रतारणाकौशलं चैवं धर्मस्य विश्लेषणरीतिं स्तालिनमुखा[xxix*]च्छ्रावयित्वा वर्तमानसमाजस्य धर्मस्यावक्षयचित्रमुपस्थापयितुञ्चेष्टितवानिवेति कविर्जीवः। कविर्जीवश्चण्डताण्डवनाट्यस्य माध्यमेन प्रदर्शयति कथं क्षमताशालिनो राजनैतिकनेतारः स्वीयशक्तौ तथा स्वीयाधिकारेऽविचलरूपेणावस्थानाय तथा विश्वसंसारे स्वीयशक्तिप्रदर्शनाय विश्वकल्याणप्रसङ्गं विस्मृत्य नरसंहारलीलाविलासे निमग्नाः। यत्र जीवो नरसंहारलीलायाः संकल्पं श्रायवति ब्रिटेनदेशस्थस्य ब्रिटिशसचिवमुखात् – **''विश्वं नूनं हूनहीनं विधास्ये''**[xxx*] इति वचसा। राजनीतेर्नेतारः कथमात्मानं सर्वदोषरहितं दर्शयित्वा साम्यवादच्छद्मना सर्वान् देशवासिनो विपथगामिनः कुर्वन्ति। यस्मात् समग्रदेशे निदारुणा विश्रृङ्खलता जायते, उत्पद्यते प्रत्येकदेशवासिनां मध्ये सततमुद्विग्नता। ईदृशनेतॄणां सविधे साम्यवादस्यार्थः खलु मरणं मारणं चेति। यस्य ईङ्गितं जीवेन स्पष्टतया उपस्थापितं साम्यसागरकल्लोलनामधेयनाटके साम्यवादिनेतृगणनाथस्य साम्यसंज्ञा – **''मरणं मारणं च चिरवाञ्छिता साम्यनीतेर्भित्तिभूमिः''**[xxxi*] इति कथनमाध्यमेन।

कविर्मानवानां मानवता, विवेकबोधस्यावक्षयता तथा रुचिबोधस्य नग्नदिशा सह परिचयं कारयति विवाहविडम्बने षाटोत्तीर्णजरठरतिकान्तस्य काहिन्युल्लेखमाध्यमेन। यस्य कामना तथा वाञ्छा एतादृशी गगणचुम्बिनी, यत्पूर्त्यर्थं कल्पतरुरूपेण युवतीकन्यया प्रयोजनमस्ति। स्वीयवयोवृद्धिविषये हीनचिन्तो यः सर्वैर्निवारितोऽपि उपांशु घटकयोजनां कृत्वा कृत्रिमोपायेन विगतपौरुषेयत्वस्य पुनःप्राप्तिचेष्टायां निमग्नः। तस्य देहस्य वर्णनां कर्तुं तस्य विधवा भगिनी स्वयमेव कथयति – **''पलितकेशस्य पलितदन्तस्य लुलितगात्रस्य स्थविरस्य''**[xxxii*]। तस्य विवेकवर्जस्य एकमपि प्रमाणं समाजस्यास्य महद्दृष्टान्तत्वेनोल्लेखनीयम्। यत्र स आत्मनो भगिन्या एव परुषवाक्यैर्भर्त्सनायां मुखरः[xxxiii*]।

समाजे धनिनिर्धनयोः पारस्परिकं व्यवधानं यत् सुविस्तरम् इति जीवः सम्यक्तया उपलब्धवान्। तदुपलब्धिमेव चित्राकारेण स उपस्थापयतीव क्षुतक्षेमीये तथा चिपिटकचर्व्वणे। नाट्द्वये कृपणस्वभावविशिष्टधनिनां मनस्कताया नीचता प्रदर्शिता। ते केष्वपि न विश्वसन्ति। आत्मीयाः परिजनाश्च नितान्तमेव तेषां सविधे मूल्यहीनाः। सर्वे हि भृत्यवत्। अर्थो हि प्रधानस्तेषाम्। स्वीययोषितामपि अर्थस्पर्शनेऽधिकारो नास्ति, एवमेव चित्रं चिपिटकचर्व्वणे परिलक्ष्यते। यत्र प्रतिवेशिनो धूर्त्ततान्त्रिकेण सह परियोजनां कृत्वा कपालिनः स्त्रियं धनं प्रापयन्ति। किन्तु, एतेऽर्थवन्तः पुनः यस्माद्धनलाभस्य सम्भावनां पश्यन्ति, धनप्राप्त्यर्थं तस्य सत्कारार्थे व्याकुलो भवति। ईदृशी अवस्थावलोक्यते क्षुतक्षेमीये रङ्गनाथस्य चरित्रे। यत्र चित्रगुप्तसविधादर्थलाभाय कृपणो रङ्गनाथोऽपि तस्य सेवायां लीनोऽभवत्।

कस्यापि समाजस्य महानवक्षयस्तावत्तस्य समाजस्य विपर्यस्तार्थव्यवस्था। तस्या अर्थहीनाया अवस्थाया यातना

कीदृशी निदारुणा, सा यातनानुभूयते दारिद्र्यनिपीडितेन वक्रेश्वरेण। एवं प्रकारेण तस्य सांसारिकसुखमपि लीनतां प्राप्तवत्।

विंशशतकस्य सामाजिकावक्षयप्रेक्षापटाश्रयेण श्रीजीवेन नाट्यानि रचितान्यपि उपर्युक्तसमालोचनया तद्रचनानिकरो यदि विंशशतकीयप्रेक्षापटाश्रयीत्युच्येत, तर्हि तन्न यथार्थतया मूल्यायनमण्डितमिति वक्तुं युज्यते। यतः सामाजिकावक्षयप्रेक्षापटाश्रयी एष नाट्यनिकरो युगोत्तीर्णः। यतो विंशशतकस्य जीवप्रदर्शितोऽवक्षयो व्याधिरूपेणाद्यतनसमाजे मूर्त्तिमानिव। तत्कालीनपुरुषतान्त्रिकसमाजस्यार्वाचीनोचितायाः स्त्रीदलनरीतेः या प्रवणता दृश्यते विवाहविडम्बने रतिकान्तस्य स्वीयभगिनीं प्रति **"भोजने द्विगुणा...."** इत्यादिवचसा, तादृशी स्त्रीजातीनामवमानना, ताः प्रति पारुष्यपूर्णव्यवहारः, कामनासक्तलोलुपालोकेनावलोकनञ्चेति एताः समस्या न केवलं विंशशतकस्य सामाजिकावक्षयस्य द्योतकाः, अपि तु अधुनातनसमाजे प्राकट्येन प्रतिभान्ति।

**चण्डताण्डवस्य** ब्रिटिशसचिवकथिता – **"विश्वं नूनं हूनहीनं विधास्ये"** इत्युक्तिः न केवलं विंशशतकस्य नग्नदिशः प्रति अङ्गुलीनिर्देशनां करोति। अस्माकं सर्वेषां मध्ये एव ईदृशप्रतिज्ञाकारिणो ब्रिटिशसचिवा लुक्कायिताः सन्ति। ये सततमेव स्वीयशक्तिदम्भदम्भोलिस्तेजउद्गिरणार्थे चेष्टन्ते। पारस्परिकप्रतिस्पर्धायां निरतानामेतेषां गृहस्थानां वीराणां हेतोर्विश्वकल्याणमद्यतनसमाजे संकटग्रस्तम्। तर्हि तत्कल्याणं प्रार्थयता जीवेनोच्यते – **"विश्वं कल्याणमस्तु"**।

अपि विज्ञानमाशीर्वादोऽभिसम्पातो वेति प्रश्नः सर्वकालस्य। यस्य समाधानसूत्रमन्वेष्टुम् अद्यापि जना निरताः। किन्तु, वक्तुं कविना। नाट्येषु तु प्रायशः प्रहसनोचितस्य मुखसन्ध्येर्व्यवहारो लक्ष्यते। नान्दी-प्रस्तावना-भरतवाक्यादीनामपि प्रयोगोऽस्ति युज्यते विज्ञानस्य क्रमेणाग्रगतिः स्वयमेव तस्याशीर्वादपक्षं म्लानीकरोतीव। तस्य नवाविष्कारसमूहेन प्रतिमुहूर्तमेव धरणी नवसंकटखाते निमज्जिता भवति। विज्ञानाविष्कारस्य निष्ठुरा दिशो जीवस्य शतवार्षिके नाट्ये चन्द्रमसा मर्त्यमणेर्वर्णनायां मिलति –

**"दूरात् क्षतानि कुरुते कायवक्षो मनांसि नः।**
**विद्युद्दामक्षिपैर्यन्त्रैर्यन्त्रणादायिभिः सदा।।"**[xxxiv*]

अप्ययं विज्ञानस्याशीर्वादराशिः न पुनरभिसम्पातस्य लीलाविलासः? विंशशतकीयजीवस्य अभिप्रायस्य यथार्थव्याख्यानमद्याप्यस्माभिरन्विष्यते। आशीर्वादो वा अभिसम्पातो वा यद् भवतु विज्ञानस्यैतादृशी गम्यमानावस्था विश्वविध्वंसनकारिकेति प्रजापतेर्ब्रह्मणो श्रीमुखाच्छ्रावयति –

**"क्रियते चेन्न यन्त्रीयविज्ञानस्य नियन्त्रणम्।**
**शतवर्षान्तरे पृथ्वी नूनं ध्वस्ता भविष्यति।।"**[xxxv*]

परिशेषे वक्तुं शक्यते श्रीजीवस्य विंशशतकस्य सामाजिकावक्षयाश्रयिनाट्यनिकरः संस्कृतनाट्यसाहित्यं सुसमृद्धं करोत्यवश्यमेव। जीवः सरस्वतीराशेः सरलतया, अनाडम्बरपूर्णवाग्विन्यासानां व्यवहारेण स नाट्यकाहिन्यः सहृदयसामाजिकानां मर्मस्पर्शित्वेनोपस्थापितवान्। यद्यपि जीवस्य नाट्यानि न सम्यक्तया तावन्नाट्यलक्षणविचारशास्त्रानुसारीणि वर्तन्ते, तथापितेषामभिनययोग्यत्वात् सामान्यतयैतानि दृश्यत्वपर्यायभुक्तानीति वक्तुं युज्यन्ते। विषयवस्तूनामुपस्थापनरीतिं तथा काव्यवस्तूनामग्रगतिं विलोक्य विचार्य च एतन्नाट्यनिकरो व्यङ्ग्यात्मक इति कथयामः। केचिदेनं नाट्यनिकरं प्रहसनं कथयन्ति किन्तु, नाट्यलक्षणशास्त्रविहितं प्रहसनलक्षणं सम्यक्तयात्र नानुसृतं एतद्रचनासु। तस्यैतन्नाटकानि कासु श्रेणीष्वन्तर्भवन्ति, इति विषये जीवोऽपि सन्दिग्धः। कवेरेषु नाट्येषु एको

दिग्विशेषोऽपि लक्ष्यते। यत्र स बङ्गदेशे व्यवहृतानामनेकशब्दानां संस्कृते रूपान्तरतां सम्पादितवान्। यथा **चौरचातुरीये** –

बङ्गभाषायां – **''अन्धेरकिवादिनकिवाराता''।**

संस्कृतभाषायां – **''नेत्रहीनस्य मे यथा दिवा तथा रात्रिः''।**

**विवाहविडम्बने** –

बङ्गभाषायां –

**''भातछड़ालेकाकेरअभावहयना।''**

---

**अन्त्यटीका**

[xix] छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः (४/३/१२९) पाणिनीयसूत्रम्

[xx]''रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः'' (साहित्यदर्पणः)

[xxi]''नाट्यं नटप्रयोज्यम्'' साहित्यदर्पणस्य कुसुमप्रतिमाटीका, पृ. - ४४८

[xxii] ''अवस्था या तु लोकस्य सुखदुःखसमुद्भवा।

तस्यास्त्वभिनयः प्राज्ञैर्नाट्यमित्यभिधीयते।।''

(नाटकलक्षणरत्नकोशः, पृ. – २८)

[xxiii] ''लोकवृत्तानुकरणं नाट्यम्'' (नाट्यशास्त्रम् – १/१११) ''अवस्थानुकृतिर्नाट्यम्'' (दशरूपकम् – १/७)

[xxiv]''नाट्यं तन्नाटकम्'' – (अभिनयदर्पणः, कारिका - १४)

[xxv]''नाट्ये नाटके. ....'' (साहित्यदर्पणस्य रुचिरा टीका, पृ. – ४५०)

[xxvi] ''नाट्यं नटप्रयोज्यं नाटकादि'' – (साहित्यदर्पणस्य कुसुमप्रतिमा टीका, पृ. – ४४८)

[xxvii]*इति चिह्नेन सनाक्तीकृतोंऽशविशेषो रामजी-उपाध्यायस्य ''आधुनिक संस्कृतनाटक'' इति पुस्तकादुत्कलितो वर्तते। तत्रैव, पृ. - ८५०

[xxviii]*तत्रैव, पृ. - ८५५

[xxix]*धर्मो नाम कुकल्पनाल्पधिषणप्राणान्तकृद् भीषणो यन्त्रं किं च पुरोधसां द्रविणप्रदं दीनार्थद्राविणम्।

दौर्बल्यं भजतामलीकशरणं द्वन्द्वैककन्दं नृणाम्

श्रीणां मानसमोहनः स हि कथं नोत्सार्यतां मादृशैः।।''

तत्रैव, पृ. - ८५५

[xxx]तत्रैव, पृ. - ८५६

[xxxi]* तत्रैव, पृ. - ८५३

[xxxii]*तत्रैव, पृ. - ८४८

[xxxiii]*भोजने द्विगुणा मात्रा शयने च चतुर्गुणा।

कर्मकाले ख-मात्रा च ततः शूपर्णखास्वरः।। पृ. - ८४८

[xxxiv]*तत्रैव, पृ. - ८६०

[xxxv]*तत्रैव, पृ. – ८६०

**ग्रन्थपञ्जिका**


1. *आधुनिक संस्कृत साहित्य सञ्चयन.* सम्पादकः गिरीशचन्द्रपंतः. सहसम्पादकौ बलरामशुक्लः चन्द्रशेखरत्रिपाठी च. दिल्ली : विद्यानिधिप्रकाशन, २००८ (प्रथमसंस्करणम्)।
2. उपाध्यायः, रामजी. आधुनिक संस्कृतनाटक (प्रथमखण्डम्, द्वितीयखण्डं च). वाराणसी : चौखम्बाविद्याभवन, २०१४ (पुनर्मुद्रितसंस्करणम्)।
3. चट्टोपाध्यायः, रीता. *आधुनिक संस्कृत साहित्य* १९९०-२०१० छोटगल्प ओ नाटक. कलकाता : प्रग्रेसिभ पाब्लिशार्स, २०१२ (प्रथमप्रकाशः)।
4. त्रिपाठी, राधावल्लभः. *संस्कृतसाहित्य का अभिनव इतिहास.* वाराणसी : विश्वविद्यालय प्रकाशन, २०१३ (चतुर्थसंस्करणम्, प्रथमसंस्करणम् – २००१)।

5. दासः, करुणासिन्धुः. *संस्कृत नाट्यतत्त्वेर रूपरेखा.* कलकाता : संस्कृत वुक् डिपो, १४१५ बङ्गाब्दः (द्वितीयप्रकाशः, प्रथमप्रकाशः – १४०६)।
6. दासः, करुणासिन्धुः. *संस्कृतसाहित्येर इतिहास.* कलकाता : पश्चिमबङ्ग वांला अकादेमि, २००८ (प्रथमप्रकाशः)।
7. धनञ्जयः. *दशरूपकम्* (अवलोकवृत्तिना, बङ्गानुवादेन तथा विवृतिनामकव्याख्यानेन च सहितम्). सम्पादकौ सीतानाथ आचार्यः देवकुमारदासश्च. कलकाता : संस्कृतपुस्तकभाण्डार, २००७ (द्वितीयसंस्करणम्, प्रथमसंस्करणम् – १९९७)।
8. धनञ्जयः. *दशरूपकम्* (धनिकस्य अवलोकटीकया, चन्द्रकलाख्यहिन्दीव्याख्यया च समेतम्). व्याख्याकारः भोलाशंकरव्यासः. वाराणसी : चौखम्बा विद्याभवन, २०१५ (पुनर्मुद्रितसंस्करणम्)।
9. नन्दिकेश्वरः. *अभिनयदर्पणः* (श्रीअशोककुमारशास्त्रिणोऽनुवादसमेतः). सम्पादकः मानवेन्दु-बन्द्योपाध्यायः. कलकाता : सारस्वतकुञ्ज, २०१० (प्रथमप्रकाशः)।
10. पाणिनिः. अष्टाध्यायी (प्रभाख्यटीकया सनाथीकृता). सम्पादकः श्रीदेवेन्द्रकुमारविद्यारत्नः. कोलकाता : बलराम प्रकाशनी, २००३ (पुनर्मुद्रितसंस्करणम्)।
11. भरतः. *नाट्यशास्त्रम्* (बङ्गानुवादसमेतम्). प्रथमखण्डः. सम्पादकः सुरेशचन्द्रबन्द्योपाध्यायः. अनुवादकौ सुरेशचन्द्रबन्द्योपाध्यायः, छन्दा चक्रवर्त्ती च. कलिकाता: (अधुना कलकाता) : नवपत्रप्रकाशन।
12. मुखोपाध्यायः, अञ्जलिका. *संस्कृत काव्यचर्चाय वाङाली (सेकाल ओ एकाल).* कलिकाता (अधुना कलकाता) : संस्कृतपुस्तकभाण्डार, २०१३ (प्रथमसंस्करणम्)।
13. मुसलगाँवकरः, केशवः. *आधुनिकसंस्कृतपरम्परा.* वाराणसी : चौखम्बा विद्याभवन, २००४ (प्रथमसंस्करणम्)।
14. विश्वनाथः. *साहित्यदर्पणम्* (विवृति-विवृतिपूर्त्ति-विज्ञप्रिया-लोचन-कुसुमप्रतिमा-विमला-लक्षी-रुचिरासमेतम्). सम्पादकः प्रो.योगेश्वरदत्तशर्मापराशरः. दिल्ली : नागपाब्लिशार्स, १९९९ (प्रथमसंस्करणम्)।
15. सागरनन्दी. *नाटकलक्षणरत्नकोशः* (प्रभाख्यहिन्दीव्याख्यानोपेतः). व्याख्याकारः सम्पादकश्च बाबूलालशुक्लशास्त्री. वाराणसी : चौखम्बा संस्कृत सीरीज आफिस, १९७२ (प्रथमसंस्करणम्)।